तत्त्वावलिः ।

सेरपुराधिवासि-

श्रीचन्द्रकान्ततर्कालङ्कार-

प्रणीता ।

तत्कृत-टीकया समन्विता च ।

कलिकाता

कर्णओयालिस् ष्ट्रीट् १९८ सङ्ख्यक-भवने

काव्यप्रकाशयन्त्रे

श्रीजगन्मोहनतर्कालङ्कारेण

मुद्रिता ।

संवत् १९२६ ।

मुखबन्धः ।

प्रतापचन्द्रघोषेषु श्रीयुतेषु महात्मसु ।
अदो निवेत्ति यत्किञ्चित् कोऽपि तत्प्रीतिलेशभाक् ॥१॥

कस्यापि हेतोर्भवतोऽस्त्यमुष्मिन्
प्रेमा जने कोऽप्यथ वा न हेतोः ।
स्नेहः सतां कुत्र न भाति ? मेघो
मरुस्थली किं न करोति सिक्ताम् ? ॥ २ ॥

सेयं कृतिः स्निग्धजनस्य तस्मात्
विशेषतः श्रीशनिवेदिता च ।
भवत्कराम्भोजसमर्पिताभूत्
तत्त्वावलिस्तत्त्वविवर्जितापि ॥ ३ ॥

आच्छादयत्येव हि दोषजातं
स्नेहो बलीयानिति चाङ्करार्य्याः ।
निवेदितं यत् परदेवतायै
तद्भक्तिमद्भ्यस्तदपि प्रदेयम् ॥ ४ ॥

तदर्पितैषा, भवता कथञ्चित्
निरीक्ष्यते चेत्, कृतकृत्यता मे ।
लोको ह्यकिञ्चित्करमर्पयित्वा
मताय सन्तुष्यति वस्तुनीचैः ॥ ५ ॥

विज्ञापनम् ।

आसीदशेषगरिमास्पदतां दधानः
शास्त्रार्णवोन्मथनलब्धसदर्थरत्नः ।
मेधाविशेषमहिमामहिताग्र्यबुद्धिः
शुद्धान्तरः प्रथितकीर्त्तिरुदारचेताः ॥ १ ॥

दाता विनोदी विदुषां वरिष्ठः
परोपकारेषु सदानुरक्तः ।
लोकोपदेशार्थमुपात्तकायः
प्राबोधि साक्षादिव भक्तियोगः ॥ २ ॥

स राधाकान्तसिद्धान्त-वागीश इति विश्रुतः ।
वागीश इव वागीशः प्रमितोचितवागपि ॥ ३ ॥

योऽध्यापयामास परःसहस्रान्
अनन्यकाम्यानपि शिष्यसंघान् ।
यश्चान्तकाले विससर्ज देहं
सुरापगायाः सलिलान्तरेषु ॥ ४ ॥

विशेषतः सेरपुराभिधाना
विसारिभिः सा नगरी परापि ।
विपाण्डुरैर्यस्य यशोभिरुच्चैः
करैर्हिमांशोरिव राजते स्म ॥ ५ ॥

तदात्मजः स्वात्मनि चन्द्रकान्तः
तदंघ्रियुग्मं विधिवद्विचिन्त्य ।
कणादसूत्राण्यवलोक्य चैतां
ततान तत्त्वावलिमल्पतत्त्वाम् ॥ ६ ॥

जीवाष्टशैलक्षितिसम्मितेऽब्दे
शाके रवौ सामगृहं प्रपन्ने ।
वलक्षपक्षेऽपि कलानिधाने
क्षीणे दिनेशस्य दिने दिनादौ ॥ ७ ॥

समाप्तिमेषा गमिता कथञ्चित्
मया गुरूणां करुणाबलेन ।
खरामवर्षेण महर्षिपाद-
प्रदर्शिताशेषविशेषसारा ॥ ८ ॥

अबद्धवाक्यापि कृतिस्तदेषा
विद्वत्सभायामुपहासयोग्या ।
समर्प्यते श्रीशपदारविन्दे
मन्दः कथं सुन्दरवस्तुदः स्यात् ? ॥ ९ ॥

धीराः कुरुध्वं सुतराममुष्यां
तिरस्कृतिं वापि पुरस्कृतिं वा ।
तया न खिन्नोऽस्मि न वा प्रतीतो
दत्ता यदेषा जगदीश्वराय ॥ १० ॥

शुद्धिपत्रम्।

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
मुखबन्धे	६	मनस्थली किं न करोति सिक्तां।	स्थाणुं न किं सिञ्चति वन्ध्यमद्भिः।
२०	९	तत्र ते	त एते
२१	१३	तत्र ते	त एते
७	१६	नान्यथा	नान्यः
"	१४	स्तत्र ते	स्त एते
"	२०	आत्मकमाणि	आत्मकर्म्माणि
२५	१५	तीर्य्यग्गमनादि	तिर्य्यग्गमनादि
"	१६	"परेति।"	"परा" इति।
२६	६	निरपेक्षेण	नैरपेक्ष्येण
२७	९	निरपेक्षेण	नैरपेक्ष्येण
"	"	द्रव्यान्तरा	द्रव्यान्तर
२९	५	समवायि	समवायी
"	१३	इत्यादिन	इत्यादिम
३०	१२	कारणमिति	कारणत्वमिति
३४	११	"पटस्यासमवाय स्यात्"	"पटस्यासमवायी स्यात्"
३५	१	द्वितीया	द्वितयी
"	६	विज्ञेयात् समवायिता	विज्ञेयाऽसमवायिता।

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
३७	९, १०	किञ्चित् कालसत्त्वे सति	किञ्चित् कालासत्त्वे सति
४१	२	वजात्यं	वैजात्यं
"	१२	विकल्पे	विकल्प [रेकेशा
४२	१७	तथापि परमाख्वभिप्रायं	तथाप्याकाशादिव्यति-
४३	४	अशेषमूर्त्तसंयोगि सं- युक्तत्वमपि स्मृतं	* * * * * * * *
४४	८	चतुर्दशः	चतुर्दश
४८	१०	इन्द्रियर्विशेष	इन्द्रियविषय
"	१४	सन्निकर्षस्व	सन्निकर्षस्य
५०	१२	अभिलापसंसर्गयोग्य	अभिलापयोग्यसंसर्ग

५१। ११पंक्तौ "व्यावर्त्तयति तयेत्यर्थः।" (इत्यनन्तरं) तथाच प्रत्यक्षकाले, न घटादिशब्दस्योपयोगः, अपि तु तदभिलापकाल एवेति भावः। (इत्यधिकं भविष्यति) (एतदनन्तरं) "सामान्यादिकञ्च" "इत्यादि।" (इत्यादि ज्ञेयम्)

५२	१०	ततक्रम	तत्क्रम
"	२१	"श्वेतत्वात्"	"श्वेतत्वात्"
५४	१९	स्वरूपस्वैव	स्वरूपस्यैव

५५। ८ (पंक्त्यनन्तरं) अन्यथा सा प्रसज्येत दण्डादेर्भ्रामणादिना। (इत्यर्द्धमधिकं भविष्यति)

५५	२०	जनस्य	जन्यस्य
५८	११	चाक्षुषस्पर्श एव	चाक्षुषप्रत्यक्ष एव
"	१२	स्पर्शन	स्पार्शन

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
५८	१४	स्पर्शेन	स्पार्शन
"	२०	'वियेऽगो'	'वियोगो'
५९	१	तूपरित्वेन	तूपरिष्येन
६१	११	इति। योग्यविशेषगुणाः सुखादयः ॥ ५० ॥	इति ॥ ५० ॥
"	१२	"आत्मनो मानसं" इति अहं सुखी इत्याद्याकारकं	"आत्मनो मानसं" इति। योग्यविशेषगुणाः सुखादयः। अहं सुखी इत्याद्याकारकं
६३	१४	जीवमयोनि	जीवनयोनि
६८	९	"सात्मन्यन्यात्मसु"	"स्वात्मन्यन्यात्मसु"
७२	८	भूतवायुप्र	भूतवायुश्च
७७	१४	रूपेण रसानुमानं	रसेन रूपानुमानं
८१	१९	साध्यवद्वृत्तिर्हि	साध्यवदवृत्तिर्हि
८७	२१	घटादितरभेदस्य	घटादावितरभेदस्य
८९	६	तदन्यत्वं	तदन्यत्व
९०	१९	तदन्योभावव्याप्यत्वात्	तदन्योन्याभावव्याप्यत्वात्
"	२०	॥ ७६ ॥	॥ ७६ ॥ ७७ ॥
९२	१२	इतिप्रयोगः।	इति।
९३	५	तद्विसंवादो	तद्विसंवादे
९५	१५	सम्भव इति भावः ॥ ९ ॥	सम्भव इति भावः। तदेवं युतसिद्धिदर्श-

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
			नात् समवायेनापि गतमिति द्रष्टव्यम् ॥ ९ ॥
१००	५	ब्राह्मण	ब्राह्मणे
१०२	पृष्ठोपरि	प्रमाणपरिचिन्तननामकतृतीयपरिच्छेदे चतुर्थं प्रकरणम् ।	स्पर्शवत् द्रव्यनिर्णयो नाम चतुर्थः परिच्छेदः ।

इतः परं यत्र यत्र उपरि "प्रमाणपरिचिन्तनं" इति वर्त्तते, तत्र तत्र "स्पर्शवत् द्रव्यनिर्णयः" इति भविष्यति ।

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
१०४	५	मिष्वते	मिष्यते ।
"	१७	घूतादै	घृतादो
१०६	१३, १४	"नलक्ष्यतेऽस्य रूपन्तु—	"अस्य रूपन्तु—
१०९	९	दिन्त्येन	दिदन्त्वेन
११०	१	विद्यत	विद्यते
"	२	दरतः	दूरतः
"	८	'इदन्त्येन'	'इदन्त्वेन'
"	९	इदन्त्येन	इदन्त्वेन
११५	५	स्वतिक्षेप्या	प्रतिक्षेप्या
११७	१	देहेष्वप्यणु	देशेष्वप्यणु
११८	१९	"स्वाश्रयद्रव्यजातीयकरणानुभवस्तु यः" इत्यादि ।	लिङ्गानि विभ्रदयितुमाह "अनुमानानि" इत्यादि ॥ ७९ ॥ "स्वाश्रयद्रव्य—" इत्यादि ।

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
१३०	२०	शेदेषु	देशेषु
१३५	५	हृताः	हृताम्
१४५	१३	तद्गर्भिता	तद्गर्द्धिता

१४८। १२, १३ पंक्तिद्वयं (यदुक्तं "वेदान्तश्रवणात् तत्व-साक्षात्कारः" इति। तत्राह "केवलं श्रवणेनैव" इति ॥ ६२ ॥) भ्रमाल्लिखितम्। किन्तु १४९। १० पंक्त्यनन्तरं, तत्पंक्तिद्वयं, एवं ज्ञेयम्—(यदुक्तं "वेदान्तश्रवणात् तत्त्वसाक्षात्कारः" इति। तत्राह "केवलं श्रवणेनैव" इति ॥ ६५ ॥)

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
१५१	१२	सिषाधयिषा	सिषाधयिषया
१५६	१६	नामकः	नाम
१५७	७	सन्निकष	सन्निकर्ष
"	१०	यौदपद्यं	यौगपद्यं
१६१	८	संयोग	सङ्कोच
१६५	१६	तद्पहित	तदुपहित
१६६	१	श्याम	श्यामं
१७२	१४	मते	मतेपि
१७७	७	समाप्तौ	सप्ताष्टौ
१८१	६	समुदितो	समुदिता
१८३	४	सन्निकर्षोऽति	सन्निकर्षो न
"	१९	काचिदनुपपत्तिरिति	न काचिदनुपपत्तिरिति
१८५	८	विशेषः	विशेष
१८६	१९	"रसादिवदिष्टात्यस्तु"	"रसादिवदिष्टाप्यस्तु"

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
१८९	९	तद्धेतु	तत्वेतु
१९२	५	क्रखत्व	क्रखत्व
"	१७	चतुविध	चतुर्विध
२००	६	मसम्भविः	मसम्भवि
२०१	२	विमागा	विभागा
२०५	१०	हस्तकम	हस्तकर्म
२११	१८	मपेच्यः	मपेच्य
२१४	९	निश्चयाभाव—	निश्चयाभावस्य
२१६	५	सम्यगप्यदिप्रत्यतः	सम्यगप्यादिप्रत्यतः ।
२१८	१५	संयोदात्मचेतसोः	संयोगादात्मचेतसोः
२१९	१	सस्कारात्	संस्कारात्
२२०	७	आर्षं	आर्षं
"	८	यौगि	योगि
"	९	दुचिरे	दूचिरे
२२३	११	संश्रय	संश्रये
२२५	१८	हृदयम	हृदयम्
२२८	५	स्त्रीस्तथा	धीस्तथा
"	७	दुःखं	दुःख
"	१४	॥ २ ॥	॥ २ ॥ ३ ॥
२३२	४	मंथापि	मथापि
२३३	१	योऽयः	योऽर्थः
२४९	१७	मैार्व्यग्राः	मैार्व्यग्रा

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
२५०	२०	प्रसरणम	प्रसरणम्
२५४	१२	दुष्टमेव	दृष्टमेव
२५६	१६	तत्त्वाबला	तत्वाबलौ
२५८	५	व्यावृत्तिवुद्धि	व्यावृत्तबुद्धि
२५९	९	अननुगतप्रत्ययादि	अनुगतप्रत्ययादि
"	११	अनुगतेनाप्यनुगत	अननुगतेनाप्यनुगत
२६१	२	बाधकाभावाश्च	बाधकाभावाच्च
२७०	१३	घटमत्त्वे	घटसत्त्वे
२७४	९	नञथा	नञर्था
२७६	६	अव्युत्पत्ति	अप्युत्पत्ति

तत्त्वावलिः ।

मङ्गलाचरणम् ।

मायासहायोऽपि सदा स्वतन्त्रः
सृजत्यवत्यत्ति जगन्मुहुर्यः ।
तं नित्यबोधं श्रुतिजातयोनिं
महेश्वरं सादरमानतोऽस्मि ॥

शवासनां दिग्वसनां शिवानीं
शिवां श्मशानेषु विकाशमानाम् ।
दैतेय-दावानल-लोलजिह्वां
कालीं करालेन्दुमुखीं नमामि ॥

आराध्यते यो यमिभिर्हृदब्जे
विशुद्धबोधेन समाधिमद्भिः ।
बालेन्दुमौलिं तमलभ्यमन्यै-
र्हरं हरन्तं दुरितं नमामि ॥

पदार्थ-याथार्थ्य-विचक्षणं तं
समाधि-साक्षात्कृत-वस्तुतत्त्वम् ।
योगर्द्धिभिः संयमिनां वरिष्ठं
कणादनामानमहं प्रपद्ये ॥

परःसहस्रैः समुपास्यमानं
शिष्यैः पितुः पादसरोजयुग्मम् ।
विशेषभक्त्या हृदये निधाय
वैशेषिकाणां मतमातनोमि ॥

तत्त्वावलिः ।

प्रथमः परिच्छेदः ।

अथातो धर्म्ममेवादौ व्याख्यास्यामो विशेषतः ।
तत्त्व-ज्ञान-निदानत्वात् तदेव हि विमृग्यते ॥ १ ॥
निःश्रेयसाभ्युदययोर्यतः सिद्धिर्भवत्यलम् ।
स धर्म्मस्तत्प्रवचनाद् आम्नायानां प्रमाणता ॥ २ ॥

अथात इत्यादि । हि यतः, सर्व्वैर्मुमुक्षुभिर्मुक्तिसिद्धये संसार-निदानस्य मिथ्याज्ञानस्योन्मूलनार्थं तत्त्वज्ञानमेव मृग्यते, धर्म्म एव च तन्निदानम्, अतः कारणात्, प्रथमं धर्म्ममेव विशेषतः कथयिष्याम इत्यर्थः ॥ १ ॥

धर्म्मलक्षणमाह, निःश्रेयसेति । निःश्रेयसं मुक्तिः । अभ्युदयः स्वर्गादिः । ननु एवम्भूते धर्म्मे किं प्रमाणम्? न तावत् वेदः, तत्-प्रामाण्यस्यैवासिद्धेः, इत्याशङ्क्य वेदप्रामाण्यमुपपादयति, तत्प्रवच-नादिति । तस्य धर्म्मस्य प्रवचनात् कथनात् । आम्नायानां वेदा-नाम् ॥ २ ॥

प्रामाणिकार्थबोधाय यद्धि वाक्यं प्रकल्पते ।
तत् प्रमाणं भवत्येव लोकानामेष निर्णयः ॥ ३ ॥
प्रामाणिकत्वं धर्मस्य सापेक्षत्वादिहेतुभिः ।
न्यायाचार्य्यैः प्रयत्नेन निजग्रन्थे निरूपितम् ॥ ४ ॥
यद्वेश्वरेण कथनाद् वेदप्रामाण्यमिष्यते ।
वाक्यानां रचना तत्र बुद्धिपूर्व्वा प्रतीयते ॥ ५ ॥

एतदेवोपपादयति, प्रामाणिकेति । प्रकल्पते समर्थं भवति । यद्धि वाक्यं प्रामाणिकमर्थमवगमयति, तत् प्रमाणमिति व्याप्तिर्लोके दृष्टा । अवगमयति च वेदवाक्यमपि प्रामाणिकं धर्ममिति तदपि प्रमाणमिति भावः ॥ ३ ॥

अथैवम् अन्योन्याश्रयः । तथा हि, वेदप्रतिपाद्यतया धर्मस्य प्रामाण्यं प्रतिपादकस्य वेदस्य प्रामाण्यमपेक्षते इति वेदप्रामाण्यापेक्षं धर्मप्रामाण्यम् । प्रामाणिक-धर्म-प्रतिपादकतया वेदप्रामाण्यमपि धर्मस्य प्रामाणिकत्वमपेक्षते इति धर्मप्रामाण्य-सापेक्षं वेदप्रामाण्यमिति कथं नान्योन्याश्रयः ? इत्याशङ्क्य, प्रकारान्तरेण धर्मप्रामाण्यं साधयति, प्रामाणिकत्वम् इति । सापेक्षत्वादीति । "सापेक्षत्वाद् अनादित्वाद् वैचित्र्याद् विश्ववृत्तितः । प्रत्यात्म-नियमाद् भुक्तेरस्ति हेतुरलौकिकः ॥" इति कारिका अत्र द्रष्टव्या । न्यायाचार्य्यैः उदयनैः निजग्रन्थे न्यायकुसुमाञ्जलौ ॥ ४ ॥

वेदप्रामाण्यमपि प्रकारान्तरेण साधयति, यद्वेति । सिद्धे हि

संज्ञाकर्म्म ब्राह्मणे यत् तद् वक्तुर्बुद्धिलक्षणम् ।
दानस्तुतिर्बुद्धिपूर्व्वा तद्वदेव प्रतिग्रहः ॥ ६ ॥
यथार्थबुद्धिर्यस्यास्ति स्वर्गापूर्व्वादिगोचरा ।
स एव कर्त्ता वेदानां स चान्यो न महेश्वरात् ॥ ७ ॥

वेदवाक्यानां बुद्धिमत्-कर्त्तृकत्वे इतरबाधात् ईश्वरकर्त्तृकत्वं सेत्स्यतीति बुद्धिमत्-कर्त्तृकत्वं तावत् साधयति, वाक्यानां रचनेति॥ ५॥

संज्ञाकर्म्मेति। संज्ञाकर्म्म नामकरणम्। ब्राह्मणं वेदभागविशेषः। वेदभागविशेषे यन्नामकरणं तदपि वक्तुर्बुद्धिमवगमयति। लम्बकर्णोत्येवमादिकं हि नाम, तत्कर्त्तुर्बुद्धिमवगमयति, इति लोके दृष्टम्। दानस्तुतिरिति। 'गां दद्यात्' इत्याद्युपदेशो हि दानस्येष्टसाधनताज्ञानपूर्व्वक एव सम्भवति। यथा लोके 'नृपतिः सेव्यः' इत्याद्युपदेशस्तदिष्टसाधनताज्ञानपूर्व्वको दृष्टस्तथेहापीति विवेचनीयम्। प्रतिग्रह इति स्वप्रतिपादिकां श्रुतिमुपलक्षयति ॥ ६ ॥

तदेवं वेदवाक्यानां बुद्धिपूर्व्वकत्वमुपपाद्य इदानीमीश्वरकर्त्तृकत्वं साधयितुमाह, यथार्थेति। अयमर्थः; स्वयं हि ज्ञातमर्थं परान् प्रतिपादयितुकामेन शब्दः प्रयुज्यते। तत्राप्युपदेशवाक्यानि यथार्थज्ञानविषयार्थ-पराण्येव भवन्ति। यो हि जानाति यथार्थमेव भोजनं तृप्तिसाधनं, स एव परानुपदिशति, 'तृप्तिकामो भुञ्जीत' इति। दययैव हि परोपदेश इति तावत् लोकप्रसिद्धमेव। यथार्थतया ज्ञातमेवार्थमुपदिशति लोक इत्यपि निर्व्विवादमेव।

वेदवक्तृतया यस्य सिद्धानुमितिरस्य तु ।
सर्व्वदोष-विनिर्मुक्ततयैवोपस्थितिर्भवेत् ॥ ८ ॥
सम्भाव्यन्ते भ्रमादिभ्यो वचसामविशुद्धयः ।
ते चेश्वरे न विद्यन्ते, ताः स्युस्तद्वचसां कथम् ? ॥ ९ ॥

तथा च "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्येवमादेरुपदेशकस्यापि स्वर्गादिगोचरयथार्थज्ञानम् आवश्यकमिति ईश्वरकर्त्तृकत्वमेव सिध्यति, अन्यस्य तदसम्भवादिति भावः ॥ ७ ॥

ननु भ्रमादपि लोके उपदेशो दृश्यते इति कथं यथार्थज्ञान-सिद्धिरित्याशङ्क्य भ्रमकारणस्य दोषस्याभावात् न तज्ज्ञानस्य भ्रमत्व-सम्भव इत्याह, वेदवक्त्रित्यादिना । अयमाशयः ; अवधृतमेवोप-दिशति लोकः, न तु सन्दिग्धम् । तत्र च करणदोषादवधारणं भ्रमात्मकमपि भवति, इति न नियमः । ईश्वरस्य तु सर्व्वज्ञस्य सर्व्वशक्तेः कुतः करणदोषसम्भावना, येन तदीयज्ञानस्य भ्रमत्व-शङ्का । न हि वेदवक्तृतया अनुमेयस्य पुरुषोत्तमस्य दोषवत्तयोप-स्थितिः सम्भवति कारणाभावात् । नहि लिङ्गमन्तरेण किञ्चिदनु-मेयतया भासते, न चात्र किमपि लिङ्गमुपलभ्यते । पुरुषाणां दोष-जन्य-भ्रमदर्शनात्, पुरुषत्वसामान्यादीश्वरेऽपि तदनुमानाशाप्रयो-जकमेव इति प्रमाणपरिचिन्तने व्यक्तीभविष्यति । साधयिष्यते च सर्व्वज्ञत्वमीश्वरस्यात्मानुभूतिप्रकरणे ॥ ८ ॥

एवञ्च सति, सम्भाव्यन्ते इत्यादि ॥ ९ ॥

अतीन्द्रियत्वादर्थानाम् अतिविस्तारतस्तथा ।

तत्कर्तृत्वं तदन्येषां यदि सम्भाव्यते, वद ॥ १० ॥

शब्दादर्थप्रतीतिर्हि सङ्केतादेव नान्यथा ।

स्वर्गापूर्व्वादिशब्दानां कः सङ्केतयिता भवेत् ॥ ११ ॥

स्वर्गादि यो विजानाति सङ्केतयितुमर्हति ।

स्वर्गादिशब्दं तत्रार्थे, नेश्वरादपरस्तु सः ॥ १२ ॥

शब्दस्यैष स्वभावश्चेद् आर्य्य-म्लेच्छादि-जातिषु ।

एकस्यैवार्थ-वैषम्यं शब्दस्येति न साम्प्रतम् ॥ १३ ॥

अन्येषां वेदकर्तृत्वासम्भवं दर्शयति, अतीन्द्रियत्वादिति । यदीति किमर्थेऽव्ययम् । तदन्येषां वेदकर्तृत्वं किं सम्भाव्यते ? अपि तु नैवेत्यर्थः । "छन्दांसि जज्ञिरे तस्मात्" इत्याद्यागमा अप्यनुसन्धेया ॥ १० ॥

अन्येषां कर्तृत्वाभावे हेतुमाह, शब्दादिति ॥ ११ ॥

ननु यः कश्चन सङ्केतयिता भविष्यतीत्याशङ्क्याह, स्वर्गादीति । यो हि स्वर्गादिकमर्थं जानाति, स एव स्वर्गादिशब्दं तदर्थे सङ्केतयितुमर्हति नान्यः । पदार्थज्ञानसापेक्षत्वात् सङ्केतस्य । न च स्वर्गादिकमतीन्द्रियम् अर्व्वाग्दृशा ज्ञातुं शक्यम् । इतीश्वर एव सङ्केतयिता सिध्यतीति भावः ॥ १२ ॥

अथ शब्दः स्वभावादेवार्थं गमयति, इत्याशङ्कते, शब्दस्यैष स्वभाव इति । दूषयति, चेदिति । अयमर्थः, एकस्मादेव शब्दात् आर्य्यै-

न केनचित् प्रकारेण स्वभावस्याप्यतिक्रमः ।
कदाचित् शक्यते कर्त्तुं विभिन्नार्थधियः कुतः ? ॥ १४ ॥
तैजसस्य प्रकाशस्य रूपप्रत्ययहेतुता ।
न तस्य व्यभिचारोऽस्ति जातिभेदेषु जातुचित् ॥ १५ ॥
वाक्यत्वात् पौरुषेयत्वम् इदानीन्तन-वाक्यवत् ।
आप्तोक्तता चानुमेया महाजनपरिग्रहात् ॥ १६ ॥

रेकविधः म्लेच्छैस्वान्यविधोऽर्थः प्रतीयते। न चैतत् शब्दविशेषस्यार्थविशेष-प्रतिपादकत्वस्वभावत्वे भवितुमर्हति, इत्याह, आर्य्येति। एकस्यैव शब्दस्यार्थवैषम्यम् इति न साम्प्रतम् इति न युज्यते इत्यर्थः ॥ १३ ॥

एतदेवाह, न केनचित् इति। केनचिदपि प्रकारेण कस्मिन्नपि काले स्वभावस्यातिक्रमः कर्त्तुं न शक्यते इत्यर्थः। स्वभावस्यातिक्रमाभावे फलितमाह, विभिन्नार्थेति। कुतः कारणात्? एकस्मादेव शब्दात् जातिविशेषेष्वर्थविशेषबुद्धयः सम्भवन्तीत्यर्थः। शब्दस्य सङ्केताधीनार्थ-प्रतिपादकत्वे तु नैष दोषः, जातिभेदे सङ्केतस्यापि भेदसम्भवादित्यनुसन्धेयम् ॥ १४ ॥

स्वभावस्य जातिभेदेऽपि व्यभिचाराभावे दृष्टान्तमाह,—तैजसस्येति। रूपप्रत्ययहेतुता स्वभाव इति शेषः। तस्य जातिभेदे व्यभिचाराभावमाह, न तस्येति। जातुचित् कदाचिदपि ॥ १५ ॥

वेदा न केनचित् प्रणीता अपि तु नित्या इति मीमांसकमत-

कस्याप्यलौकिकी तावत् स्वर्गापूर्वादिकल्पना ।
सम्भाव्यते कथं नाम ? येन प्रामाण्य-संशयः ॥ १७ ॥
न च सम्भावनामात्राद् वस्तु सिध्यति किञ्चन ।
प्रमाणागोचरं तस्माद् अकिञ्चित्करमेव तत् ॥ १८ ॥
सम्भाव्यते पदार्थस्य सतोऽप्यनुपलम्भनम् ।
प्रतिपद्येमहि स्वैरं बन्ध्यापुत्त्रं न तावता ॥ १९ ॥
आसीचेत् कल्पकः कश्चित् वेदानां प्राक्तनैस्तदा ।

निरासायाह, वाक्यत्वात् इति । पौरुषत्वेऽपि भ्रान्तपुरुषकृतत्वा-शङ्कामपनयति, आप्तोक्ततेति । आप्तः अभ्रान्तः ॥ १६ ॥

ननु कोऽपि दुर्विदग्धः स्वर्गादिफलकतया यागादिं कल्पयामास, इत्यपि सम्भाव्यते ? इति पुनरप्याप्तोक्तत्वसंशयात् प्रामाण्यसंशयो वेदस्य इत्याशङ्क्याह, कस्यापीति । अलौकिकी स्वर्गादिकल्पना कथं सम्भाव्यते ? न कथञ्चिदित्यर्थः ॥ १७ ॥

न च प्रमाणाभावे सम्भावनामात्राद् वस्तुसिद्धिरस्तीत्याह, न चेति । प्रमाणागोचरं किमपि वस्तु सम्भावनामात्रात् न सिध्यती-त्यर्थः । उपसंहरति, तस्मादिति । तत् सम्भावनम् ॥ १८ ॥

एतदेवाह, सम्भाव्यते इति । विद्यमानस्यापि पदार्थस्यानुप-लम्भनं सम्भाव्यते इति, न तावन्मात्रेण प्रमाणागोचरमपि बन्ध्यापुत्त्रं प्रतिपद्येमहि इति वस्त्वर्थः । सतोऽपि विद्यमानस्यापि । स्वैरमिति क्रियाविशेषणम् ॥ १९ ॥

सोऽवश्यमुपलभ्येत धूर्त्तानामग्रणीरपि ॥ २० ॥
उपलम्भे, तदुक्तेषु विषयेषु न जातुचित् ।
बुद्धिमन्तः प्रवर्त्तेरन् कायक्लेशादिकारिषु ॥ २१ ॥
एतस्मिन्ननृतं नास्ति कथं ब्रूयात् तदीश्वरः ।
जन्मान्तरफलत्वं तु कुत्रचित् परिकल्प्यते ॥ २२ ॥

बाधकमप्याह, आसीच्चेदिति । यदि कोऽपि वेदानां कल्पक आसीत, तदा स धूर्त्तानामग्रणीरपि तत्समकालं विद्यमानैरन्यैरवश्यम् उपलभ्येत । तस्मान्न कोऽपि कल्पक आसीदिति भावः ॥ २० ॥

अथ तदानीन्तनैरुपलब्ध एव स इत्याशङ्क्याह, उपलम्भे इति । तथा च पूर्व्वेषां प्रवृत्त्यभावे परेषामप्यप्रवृत्तिरेव युज्यते इति परेषां प्रवृत्तिदर्शनात् पूर्व्वेषामपि महाजनानां प्रवृत्तिरव्याहतेति सुष्ठूक्तम् "आप्तोक्तता चानुमेया महाजनपरिग्रहात्" इति ॥ २१ ॥

बौद्धास्तु अनृत-व्याघात-पुनरुक्तदोषेभ्यो वेदाप्रामाण्यं वदन्ति । तथाहि पुत्त्रेष्टौ कृतायामपि पुत्त्रो नोत्पद्यते, तथाच "पुत्त्रकामः पुत्त्रेष्टिं कुर्य्यात्" इति वाक्यं मिथ्या । एवं पूर्व्वापर-पराहतमपि किञ्चिद् वेदवाक्यमुपलभ्यते । तथाहि "उदिते जुहोति, अनुदिते जुहोति समयाध्युषिते जुहोति" इति होमे उदितादिकालो विहितः । एवं "श्यावोऽस्याहुतिमभ्यवहरति, य उदिते जुहोति, शबलोऽस्याहुतिमभ्यवहरति, योऽनुदिते जुहोति, श्यावशबलावस्याहुतिमभ्यवहरतो यः समयाध्युषिते जुहोति" इति विहित एवोदितादिकालो निन्द्यते इति व्याघातः । व्याघाताद्यन्यतरन्-

कारीर्य्यादौ विशेषो यः स सर्व्वत्र न विद्यते ।
तस्माज्जन्मान्तरेऽप्यास्ताम् अन्येषां फलहेतुता ॥ २३ ॥

यद्वा वैगुण्यतोऽङ्गानां फलानुदयकल्पना ।
साङ्गाद्धि वैदिकादाङ्गः कर्म्मणः फलसम्भवम् ॥ २४ ॥

न व्याघातोऽप्यभ्युपेत्य यं कञ्चित् कालमादितः ।
अन्यकालादरः पश्चात् निन्दावादेन निन्द्यते ॥ २५ ॥

मिथ्येति श्लिष्टतरम् । एवं पुनरुक्तिरपि वेदे दृश्यते । तथाहि "त्रिः प्रथमामन्वाह त्रिरुत्तमाम्" इति प्रथमोत्तम-सामिधेन्योस्त्रि-र्वचनमनर्थकं, प्रलापमात्रमिति । तत्रानृतं निरस्यति एतस्मिन्निति । तदा कथमिष्टौ कृतायामपि पुत्रो नोत्पद्यते ? इत्यत्राह, जन्मेति । कुत्रचित् ऐहिक-फलाभावस्थले ॥ २२ ॥

ननु कारीर्य्यादिवदैहिकमात्रफलत्वमत्रापि किं न स्यादित्याश-ङ्क्याह, कारीर्य्यादाविति । कारीरी यज्ञविशेषः । तत्र हि शुष्यत्-शस्य-सञ्जीवनकाम एवाधिकारीति जन्मान्तरफलत्वासम्भवात् ऐहिकमात्रफलत्वमेव । शुष्यदिति हि शतृप्रत्ययश्रवणात् वर्त्त-मानकालावच्छेदेन शुष्यतां शस्यानां सञ्जीवनमेव फलमिति कुतो जन्मान्तरफलकत्व-सम्भवः । इह तु पुत्रकामस्याधिकारात् पुत्र एव फलमिति जन्मान्तरफलकत्वमपि सम्भवति । न ह्यैहिक-पुत्रकामस्याधिकारश्रुतिरस्ति येनैहिकपुत्र एव फलं स्यादिति भावः ॥ २३ ॥ २४ ॥

व्याघातं निरस्यति, नेति । तथा च एकस्मिन्नेव होमे वैक-

अभ्यासमात्रादेतस्मिन् पुनरुक्तिर्न शङ्क्यते ।
यस्मादभ्यस्यते जातु न किञ्चिन्निष्प्रयोजनम् ॥ २६ ॥
द्रव्यं गुणाश्च कर्म्माणि तथा जातिविशेषकौ ।
समवायः षड़ेते हि भावत्वात् मुनिनेरिताः ॥ २७ ॥

ल्पिकतयोक्तानाम् उदितादिकालानामन्यतमकालं होमनिमित्तत्वे-नेच्छया प्रागभ्युपेत्य पश्चात् तत्परित्यागेन कालान्तरपरिग्रहः। "श्यावोऽस्याहुतिम्" इत्यादिना निन्द्यते। विकल्पस्थले एकविध-स्यैव शास्त्रार्थत्वादिति कुतो व्याघातावसरः। अत एवोक्तं "विक-ल्पेनोभयः शास्त्रार्थः" इति ॥ २५ ॥

पुनरुक्तिं निरस्यति, अभ्यासमात्रादिति। जातु कदाचित्। अयमर्थः — सप्रयोजनोऽभ्यासोऽनुवादः, निष्प्रयोजनोऽभ्यासः पुन-रुक्तिः। अनुवादस्तु न दोषाय प्रयोजनवत्त्वात्। पुनरुक्तिश्च दोषा-यैव निरर्थकत्वात्। प्रकृते त्वनुवाद एव, न पुनरुक्तिरित्यदोषः। तथाहि "पञ्चदशावरेण वाग्वज्रेणावबाधे तमिमं भ्रातृव्यम्" इति सामिधेनीनां पञ्चदशत्वं श्रूयते। एकादशैव च सामिधेन्यः प्रकृतौ पठ्यन्ते इति सामिधेनीनां पञ्चदशत्वोपपत्तये प्रथमोत्तमसामिधे-न्योस्त्रिर्वचनमर्थवदेवेति नानुपपत्तिः। 'पञ्चदशावरेण" इति त्वट-श्चार्थमेवेति ध्येयम्। तथाच गौतमीयं सूत्रम् "अनुवादोपपत्तेश्च" इति ॥ २६ ॥

पदार्थानुद्दिशति, द्रव्यमित्यादि। अभावः सप्तम इति। यद्यपि

अभावः सप्तमस्तेषां तत्त्वज्ञानादशेषतः।

निवृत्तिलक्षणाद् धर्म्मात् निःश्रेयसमिति स्थितिः॥ २८॥

"धर्म्मविशेषप्रसूतात् द्रव्य-गुण-कर्म्म-सामान्य-विशेष-समवायानां पदार्थानां साधर्म्म्य-वैधर्म्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्" इति सूत्रे षडेव पदार्था उद्दिष्टास्तथापि तेषां कथनं भावत्वाभिप्रायेण, वस्तुतस्त्वभावोऽपि पदार्थान्तरतया मुनेरभिमतः। अत एव नवमाध्याये प्रत्यक्षप्रतीतिसिद्धाश्चतुर्विधा अभावा अपि महर्षिणैव व्युत्पादिताः। अत एव च "कार्य्याभावात् कारणाभावः" इत्यादि सूत्रं साधु सङ्गच्छते। तथाच "षसामपि पदार्थानां साधर्म्म्यमस्तित्वम्" इति भाष्यव्याख्याने "षसां द्रव्यादीनाम्, अपि शब्देनाभावस्याप्युपग्रहः" इति जगदीशः। न्यायलीलावत्यामपि "अभावस्य वक्तव्यो निःश्रेयसोपयोगित्वात् भावप्रपञ्चवत्, कारणाभावेन कार्य्याभावस्य सर्व्वसिद्धत्वादुपयोगित्वसिद्धेः" इत्युक्तम्। द्रव्यकिरणावल्यामपि "एते च पदार्थाः प्रधानतयोद्दिष्टाः, अभावस्तु स्वरूपवानपि नोद्दिष्टः, प्रतियोगि-निरूपणाधीन-निरूपणत्वात्, न तु तुच्छत्वात्" इत्यभिहितम्। सिद्धान्तमुक्तावल्यामपि सप्तैव पदार्थानुद्दिश्य "एते च पदार्था वैशेषिकप्रसिद्धाः" इत्युक्तम्। प्रस्थानभेदेऽपि "वैशेषिकतन्त्रे द्रव्य-गुण-कर्म्म-सामान्य-विशेष-समवायानां षसां पदार्थानामभाव-सप्तमानां साधर्म्यवैधर्म्याभ्यां व्युत्पादनम्" इत्युक्तम्। अशेषत इति साधर्म्य-वैधर्म्याभ्यामित्यर्थः। धर्म्मादिति प्रयोज्यत्वं पञ्चम्यर्थः, अन्वयश्चास्य पदार्थतत्त्वज्ञाने॥ २७॥ २८॥

शक्ति-सादृश्य-संख्यादि पराभिमत-वस्तुषु ।
एतेषां लक्षणायोगो व्यवच्छेद्यो मुनेर्मते ॥ २८ ॥

शक्तिः पदार्थान्तरमिति मीमांसकाः। तथाहि तृणारणि-मणीनां वह्निकारणता सर्व्वसिद्धा। तत्र यदा तृणेन वह्निर्जन्यते, तदाऽरणेर्व्यभिचारः, एवं यदाऽरणिना वह्निर्जन्यते तदा तृणस्य व्यभिचारः, एवमन्यत्रापीति परस्परव्यभिचारात् कस्यापि कारणत्वं न सम्भवतीति, वह्नित्वावच्छिन्नस्याकस्मिकत्वापत्तिः। अतस्तृणा-दीनां कारणतानिर्वाहाय तृणारणिमणिसाधारणी वह्न्यनुकूलैका शक्तिः कल्प्यते। एवञ्च सति वह्न्यनुकूलैकशक्तिमत्त्वेनैव तृणादीनां कारणत्वं ; न तु तृणत्वादिनेति न व्यभिचारावसरः। एवं सत्यपि वह्नौ प्रतिबन्धकमणौ सन्निहिते दाहो न जन्यते, तत्राप्युत्तेजक-सन्निधाने दाहो जन्यते। तथाच वह्नौ दाहिका शक्तिः स्वीकार्य्या, सन्निहितस्य प्रतिबन्धकमणिस्तां शक्तिं नाशयति कुण्ठयति वा, तत्रापि समवहित उत्तेजकमणिस्तां जनयति तत्कुण्ठत्वं नाशयति वा। इत्य-भ्युपेयम्। एवं सादृश्यमपि पदार्थान्तरं, तद्धि न द्रव्यं, सामान्येऽपि सादृश्यप्रतीतेः। नापि गुणादिः, तथात्वादेव। नाप्यभावः भावत्वे-नानुभवात्। एवं सङ्ख्यापि पदार्थान्तरं, नासौ गुणः, गुणेऽपि तत्-प्रतीतेः। इति परेषां मतम्। तत्र तृणजन्यतावच्छेदकतया, अरणि-जन्यतावच्छेदकतया, मणिजन्यतावच्छेदकतया च, वह्नौ जाति-त्रयमभ्युपेयते। तथाच विजातीयवह्निं प्रति तृणत्वादिना कार-णत्वस्वीकारात् न परस्परव्यभिचार इति तृणादौ कारणतावच्छे-

आत्यन्तिकी दुःखनिवृत्तिरस्मिन्
निःश्रेयसं न्यायनयेऽपि सिद्धम्।
सा तैर्थिकानामपि लक्षणेषु
संवादतः सर्व्व-मत-प्रसिद्धा ॥ ३० ॥
वैशेषिकानाञ्च गुणावलीनां
निःशेषनाशावधिकत्वमस्याः।

दिका शक्तिरप्रामाणिकी। एवं दाहं प्रत्यपि वह्नेरिव प्रतिबन्धक-मण्यभावस्यापि कारणत्वमिति न, सत्यपि प्रतिबन्धके दाहः। न चैवं सत्यपि प्रतिबन्धके कथमुत्तेजकसमवधाने दाह, इति वाच्यम्। उत्तेजकाभाव-विशिष्ट-मण्यभावस्यैव हेतुत्वस्वीकारात्। इति दाहानुकूला शक्तिरपि नास्ति। एवं सादृश्यमपि स्वरूपसम्बन्ध-भेदो विलक्षणधर्म्मवत्त्वरूपं वा यथायथं द्रव्याद्यात्मकमेवेति नानुपपत्तिः। अन्यद् बहुतरं सुधीभिरूहनीयम्। संख्यान्तर्भावो वक्ष्यते ॥ २९ ॥

निःश्रेयसं लक्षयति आत्यन्तिकीति। अस्मिन् वैशेषिकमते। न्यायमतेऽपि आत्यन्तिक-दुःखनिवृत्तिर्निःश्रेयसमिति सिद्धमित्यर्थः। सा आत्यन्तिकी दुःखनिवृत्तिः। तैर्थिकानां, शास्त्रकाराणामिति यावत्। अयमर्थः — अन्येषामपि वादिनामपवर्गलक्षणेषु "दुःखात्यन्ताभावो मुक्तिः" "नित्यसुखाविर्भावो मुक्तिः" इत्येवमादिषु सर्व्वेष्वेव दुःखनिवृत्तेः संवादोऽस्तीति, सर्व्वतन्त्र-सिद्धान्त-सिद्धमिदं लक्षणमिति भावः ॥ ३० ॥

आत्यन्तिकत्वं खलु तन्निवृत्तिर्न
प्रागभावात्मकतां जहाति ॥ ३१ ॥
स्वनाशहेतुप्रतिषेधनाच्च
साध्यत्वमस्यापि कथञ्चिदस्तु ।
फलं न हेत्वन्तरमन्तरेण
तत्प्रागभावत्वमशङ्कनीयम् ॥ ३२ ॥

किं पुनर्दुःखनिवृत्तेरात्यन्तिकत्वमित्याकाङ्क्षायामाह, वैशेषिकेति । वैशेषिकगुणा वक्ष्यन्ते । तेषां निःशेषेण यो विनाशस्तदवधिकत्वमेव दुःखनिवृत्तेरात्यन्तिकत्वमित्यर्थः । तन्निवृत्तिरिति तस्य दुःखस्य निवृत्तिः सा चासौ निवृत्तिश्चेति वा । तथाच दुःखप्रागभाव एव दुःखनिवृत्तिरित्याशयः ॥ ३१ ॥

नन्वनादित्वेनासाध्यत्वात् प्रागभावो न पुरुषार्थ इत्याशङ्क्याह, स्वनाशेति । स्वस्य नाशो यस्मादिति व्युत्पत्त्या स्वनाशः प्रतियोगी, तद्धेतूनां प्रतिषेधात् प्रागभावस्यापि कथञ्चित् साध्यताऽस्तु । तथाच कारणविघटनमुखेन प्रागभावस्यापि साध्यत्वमिति वर्त्तुलार्थः । प्रागभावस्य प्रतियोगिजनकत्वात् प्रतियोग्यापत्तिमाशङ्क्याह, फलमिति । हेत्वन्तरं सहकारि कारणं विना न फलम् । अयमाशयः—न प्रागभावश्चरमसामग्री, येन तन्मात्रादेव कार्य्यस्यावश्यम्भाविता, तथा सति तावन्तमपि कालं कार्य्यानुत्पत्त्यसम्भवात् । अपि तु सहकारि-कारण-कलाप-समवहितः प्रागभावः फलमुत्पादयति, तथाच

समानतन्त्रस्वरसोऽप्यमुष्मिन्
अत्र प्रवृत्तिर्विदुषां स्वतोऽपि।
शोकाकुलानां विषभक्षणादौ
दृष्टे सुखेच्छामपि सम्प्रवृत्तेः ॥ ३३ ॥

यथैव सहकारिविरहादेतावन्तं कालं न कार्य्यमुत्पादयामास, तथा सहकारिविरहादेवाग्रेऽपि नोत्पादयिष्यतीति न किञ्चिदनुचितम्। न चैतावतापि तस्य प्रागभावलक्षतिरित्याह तदित्यादि। प्रतियोगि-जनकोह्यभावः प्रागभाव इत्युच्यते। जनकत्वञ्च स्वरूपयोग्यतामात्र-मिति कुतस्तस्य प्रागभावत्वक्षतिः। अतएवोक्तं "सहकार्य्यभावेन कार्य्यानुत्पत्तेर्नाकारणता।" इति ॥ ३२ ॥

दुःखप्रागभावस्य मुक्तित्वे गोतमसम्मतिमाह, समानेति। "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावा-दपवर्गः" इति सूत्रेण समानतन्त्रस्य गौतमीयस्याप्यस्मिन् स्वरसः प्रतीयते। तत्र हि दोषापाये प्रवृत्त्यपायः प्रवृत्त्यपाये जन्मापाय इति कारणाभावात् कार्य्याभावाभिधानं दुःखप्रागभावरूपमेवापवर्गमव-गमयति इति विभावनीयम्। ननु तथापि नासौ परमपुरुषार्थः, निरुपाधिकेच्छागोचरत्वाभावात्, दुःखकाले हि सुखं नोत्पद्यते इति सुखार्थिनामेव तत्र प्रवृत्तिरित्यत्राह, अत्र प्रवृत्तिरिति। नहि दुःखनिवृत्तीच्छा सुखेच्छौपाधिकी, विनापि सुखेच्छां दुःखनिवृ-त्तीच्छा-दर्शनादित्याह, शोकाकुलानामिति। दुःखनिवृत्तिमात्रार्थि-नामिति शेषः ॥ ३३ ॥

दुःखान्तकानां विनिवृत्तिमात्रं
मृतस्य तस्मिन् खलु काङ्क्षणीयम् ।
अतः पुमर्थोऽयमितो विवादे
तुल्यः परेषामपि तत्प्रसङ्गः ॥ ३४ ॥

अल्पीयसीं वीक्ष्य सुखप्रवृत्तिं
संसारमध्ये बहुलञ्च दुःखम् ।
धीरास्तदर्थं किल वीतरागाः
सर्व्वं समुत्सृज्य भृशं यतन्ते ॥ ३५ ॥

हेतोः समुच्छेदन एव पुंसां
व्यापारजालं परिकल्पते तत् ।

एतदेव स्पष्टयति, दुःखान्तकानामिति । दुःखान्यन्तुदत्वा-दन्तका इव तेषामित्यर्थः । मात्रपदेन सुखव्यवच्छेदः । उपसंहरति, अत इति । परेषामपीति । सुखेच्छापि दुःखाभावौपाधिकीत्येव किं न स्यादिति भावः ॥ ३४ ॥

ननु तथाप्यपवर्गे दुःखवत् सुखमपि हीयते इति तुल्यायव्ययतया नासौ पुरुषार्थः इत्याशङ्क्याह, अल्पीयसीमिति । दुःखशतमिश्रमपि सुखलवं बहुमन्यमानानां रागान्धानां प्रवृत्त्यभावेऽपि दुःखलवमिश्रमपि सुखमनिच्छतां विवेकिनां प्रवृत्तिः सम्भवत्येव । तदर्थं अपवर्गार्थम् । अस्य च यतन्ते इत्यनेनान्वयः । किलेत्यस्मिन् अर्थे सार्व्विकसम्मतिं द्योतयति ॥ ३५ ॥

अनागतातीतभवद्विकल्पः
खपुष्पकल्पः कुत एव दोषः ॥ ३६ ॥
निष्काम-कर्म्मार्जित-पुण्यपुञ्जात्
चित्तप्रसत्तौ क्रमशो नराणाम् ।
पदार्थतत्त्वप्रमितिस्ततोऽपि
स्यादात्मभिन्नेतरतः खबुद्धिः ॥ ३७ ॥
क्रमान्निदिध्यासनयोगयोगात्
अथात्मसाचात्कृतिरात्मनि खे ।
अद्धावतामात्मवतां परस्तात्
सवासना नश्यति पूर्वबुद्धिः ॥ ३८ ॥

ननु तथापि दुःखनिवृत्तिर्न पुरुषार्थः अतीतदुःखस्य निवृत्तत्वात्, अनागतदुःखनिवृत्तेरशक्यत्वात्, वर्त्तमानदुःखस्य तु प्रयत्नमन्तरेणापि निवृत्तेरित्याशङ्क्याह, हेतोरिति । तथाच संसारनिदानस्य सवासनमिथ्याज्ञानस्योच्छेदः पुरुषव्यापारसाध्य इति तदर्थं प्रवृत्तिः । तत् इति तस्मादित्यर्थः । अस्य च खपुष्पकल्प इत्यत्रान्वयः । अयमाशयः न वयं दुःखध्वंसं पुरुषार्थमाचक्ष्महे, अपि तु दुःखानुत्पत्तिं, सा च कारणाभावसाध्येति कारणस्य सवासनमिथ्याज्ञानस्योच्छेदाय प्रवृत्तिर्निराबाधैवेति कुतोऽनागतादिविकल्पावसरः ॥ ३६ ॥

अपवर्गप्रकारं दर्शयति निष्कामेति । खम् आत्मा ॥ ३७ ॥

दोषस्ततः कारणमन्तरेण
व्यपैति तस्मात् न भवेत् प्रवृत्तिः ।
न सम्भवेत् जन्म कुतस्तु दुःखं
निर्द्वन्द्वतस्तिष्ठति केवलात्मा ॥ ३९ ॥

सुखात् तत्साधने रागो दुःखात् द्वेषः प्रजायते ।
तन्मयत्वाच्च तौ स्यातां, विषयाभ्याससम्भवः ॥ ४० ॥
संस्कारः सुदृढः कश्चित् तन्मयत्वमिति स्मृतः ।
क्वचित् जातिविशेषात्तावदृष्टादपि कुत्रचित् ॥ ४१ ॥
कारणं तत्र मोहोऽपि तत्र ते दोषसंज्ञिताः ।

अथ अनन्तरम् । आत्मनि, मनसि । स्वे स्वकीये । आत्मवतां यत्नवताम् । पूर्वबुद्धिः, मिथ्याज्ञानम् ॥ ३८ ॥ ३९ ॥

इदानीं तदेव स्पष्टयितुमादौ तावद्दोषं लक्षयति, सुखादिति । स्रगादिसेवनात् तावत् सुखमुत्पद्यते, तस्माच्च तत्साधने स्रगादौ राग इच्छा भवति । अहिकण्टकादिजन्य-दुःखाच्च तत्साधने द्वेषो भवति । रागद्वेषयोः प्रयोजकान्तरमाह, तन्मयत्वाच्चेति । तौ राग-द्वेषौ । तन्मयत्वं लक्षयति, विषयेति ॥ ४० ॥ सुदृढ इति यदृशात् कामिनीम् अलभमानस्य कामातुरस्य सर्वत्र कामिनीदर्शनम्, एकदा भुजङ्गमदष्टस्य सर्वत्र भुजङ्गमदर्शनञ्च । प्रयोजकान्तरमाह, क्वचि-दिति । जातिविशेषादिति यथा मनुष्यादीनामन्नपानादौ रागः,

धर्म्माधर्म्मनिमित्तानि, रागद्वेषसमुद्भवा ॥ ४२ ॥
प्रवृत्तिर्द्वारमेतेषां प्रेत्यभावस्ततो भवेत्।
धर्म्माधर्म्मकृतो देहसम्बन्धो जन्म, देहतः ॥ ४३ ॥
प्राणादेर्विप्रयोगो यः स एव मरणं मतः।
एतत् संसारमित्याहुः प्रेत्यभावमथापरे ॥ ४४ ॥
परेऽजरञ्जरीभावम् अन्ये बन्धं प्रचक्षते।
आत्मकर्म्मसु सत्स्वेष प्रेत्यभावो निवर्त्तते ॥ ४५ ॥
तदैव मोक्षो व्याख्यातः कथ्यन्ते तानि साम्प्रतम्।

नकुलानां भुजङ्गमे द्वेष इत्यादि। प्रयोजकान्तरमाह, अदृष्टादिति। यथा दमयन्त्यादेर्नलादौ ॥ ४१ ॥ कारणं तत्रेत्यादि। तत्र, रागद्वेषयोर्मोहोऽपि कारणमित्यर्थः। मुग्ध एव रज्यति द्वेष्टि चेति भावः। तथाच गौतमीयं सूत्रं "प्रवर्त्तनालक्षणा दोषाः" इति, "तत् त्रैराश्यं रागद्वेषमोहार्थान्तरभावात्" इति च। तत्र ते इत्यादि दोषसंज्ञितास्तत्र ते रागद्वेषमोहाः धर्माधर्मनिमित्तानि इत्यर्थः। दोषाणां धर्माधर्महेतुत्वे द्वारमाह रागेति। रागात् यागादौ प्रवृत्तिस्ततो धर्मः। द्वेषात् हिंसादौ प्रवृत्तिस्ततोऽधर्म इति विवेक्तव्यम् ॥ ४२ ॥ ४३ ॥

नन्वस्य प्रेत्यभावस्य कथं निवृत्तिरित्यत्राह, आत्मकर्मस्विति ॥ ४५ ॥

तानि, आत्मकर्माणि। साम्प्रतम्, इदानीम्। श्रवणं, शाब्द-

श्रवणं मननं योगो निदिध्यासनमासनम् ॥ ४६ ॥
प्राणायामः शमादीनि वैराग्यादिकमेव च ।
सर्वमन्यत् परित्यज्य समीरणनिरोधतः ॥ ४७ ॥
यदात्मनि मनःस्थैर्य्यं स योग इति कथ्यते ।
एतस्मात् परमेवात्म-साक्षात्कारः प्रजायते ॥ ४८ ॥
सहकारित्वमन्येषां यथासम्भवमूह्यताम् ।
द्रव्यादितत्त्वविज्ञानम् आत्मकर्म्माद्यमित्यतः ॥ ४९ ॥
मननौपयिकत्वाच्च तत्त्वमेतन्न निष्फलम् ।
कर्म्माणि कानिचित् ज्ञानादपि नश्यन्ति तत्क्षणात् ।
भोगादेव ज्ञानिनोऽपि क्षीयन्ते कानिचित् पुनः ॥ ५० ॥

बोधः । मननम्, अनुमानम् । योगो वक्ष्यते । निदिध्यासनं, ध्यानम् । आसनं, पद्मस्वस्तिकाद्यासनम् ॥ ४६ ॥

प्राणायामः, रेचकपूरककुम्भकलक्षणः । शमः, अन्तरिन्द्रिय-निग्रहः । आदिपदात् दमादिपरिग्रहः । वैराग्यादीत्यादिपदात् भक्त्यादिपरिग्रहः । आत्मभिन्नविषयमात्रं परित्यज्येत्यर्थः ॥ ४७ ॥

नन्वेवं योगाभ्यास एव कर्त्तव्यः, किमनेन शास्त्रेण ? इत्याशङ्क्याह, द्रव्यादीति । तथाच द्रव्यादि-तत्त्वज्ञानार्थं मननार्थञ्च, एतत्-शास्त्रस्य प्रागेवावश्यकत्वमिति भावः ॥ ४९ ॥

ननु तथापि कर्माशयस्य दुरुच्छेदत्वात् कथं मोक्ष इत्याश-

वादितर्कतमिस्रायामपि चक्षुःप्रकाशिका ।
मोहान्धमनसामेषा सुरम्यामृतचन्द्रिका ॥ ५१ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कारप्रणीतायां
तत्त्वावलौ अमृतचन्द्रिका नाम
प्रथमः परिच्छेदः ॥ १ ॥

ञ्चाह, कर्माणीति । तथाचाप्रारब्धानां ज्ञानात्, प्रारब्धानाञ्च भोगात् क्षयानन्तरमेव मोक्ष इति भावः ॥ ५० ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायाममृतचन्द्रिकाख्य-
तत्त्वावलि-टीकायां प्रथमः परिच्छेदः ॥ १ ॥

रत्नसञ्चयः ।

द्वितीयः परिच्छेदः ।

पृथिव्यापस्तथा तेजो वायुराकाशमेव च ।
कालो दिगात्मा च मनो द्रव्याण्येतानि वै नव ॥ १ ॥
रूपं रसस्तथा गन्धः स्पर्शः संख्यास्तथैव च ।
परिमाण-पृथक्त्वे च संयोगश्च विभागकः ॥ २ ॥
परत्वमपरत्वञ्च बुद्धयः सुखमेव च ।
दुःखमिच्छा द्वेषयत्नौ मुनिनैते प्रकीर्त्तिताः ॥ ३ ॥
च-शब्देन गुरुत्वञ्च द्रवत्वं स्नेह एव च ।
संस्कारश्च तथा धर्माधर्मौ शब्दाः समुचिताः ॥ ४ ॥
प्रसिद्धगुणभावत्वादेते नोक्तास्तु कण्ठतः ।
चिन्तनीया गुणास्तस्मात् चतुर्विंशतिसंख्यया ॥ ५ ॥

द्रव्याणि विभजते पृथिव्याप इति ॥ १ ॥
गुणान् विभजते रूपं रस इत्यादि ॥ २ ॥
'च-शब्देन' इत्यादि "रूप-रस-गन्धस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः" इति सूत्रस्थ-चकारेणेत्यर्थः ॥ ४ ॥

उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं ततः ।
प्रसारणञ्च गमनमिति कर्माणि पञ्च च ॥ ६ ॥
भ्रमणं रेचनञ्चैव नमनोन्नमनं तथा ।
ऊर्द्ध्वज्वलनमन्यच्च गमनेऽन्तर्भवेद्ध्यति ॥ ७ ॥
परापरविभेदेन सामान्यं द्विविधं तयोः ।
व्यापकं परमत्राद्यैरपरं व्याप्यमुच्यते ॥ ८ ॥
विशेषाः परमाणूनां धर्मा व्यावर्त्तका मताः ।
सम्बन्धभेद एवास्मिन् समवाय इति स्मृतः ॥ ९ ॥
विशेषाणामनन्तत्वादेकत्वादितरस्य च ।
विभागासम्भवः पश्चात् लक्षणादि प्रवक्ष्यते ॥ १० ॥
चतुर्विधः स्मृतोऽभावः प्रागभावस्तदादिमः ।
प्रध्वंसोऽन्यः परो भेदोऽपरस्त्वात्यन्तिको मतः ॥ ११ ॥

कर्माणि विभजते "उत्क्षेपणम्" इत्यादि ॥ ६ ॥

भ्रमणादीनामपि गमन एवान्तर्भाव इत्याह, "भ्रमणं रेचनम्" इत्यादि । "अन्यत्" तीर्य्यग्गमनादि ॥ ७ ॥

सामान्यं विभजते "परेति ।" तयोः इति निर्धारणे षष्ठी ॥ ८ ॥

"विशेषाः" इति । "सम्बन्धभेदः" सम्बन्धविशेषः ॥ ९ ॥

ननु विशेषसमवाययोर्विभागः कथं नोक्तः ? इत्याशङ्कायामाह, "विशेषाणाम्" इति । "इतरस्य" समवायस्य ।१०॥

अभावं विभजते "चतुर्विधः" इति । "भेदः" अन्योन्याभावः॥११॥

भेदादन्ये पुनः सर्वे संसर्गाभाव संज्ञिताः ।
अन्योन्याभावसंसर्गाभावभेदात् द्विधाप्यसौ ॥ १२ ॥
तमो द्रव्यादिवैधर्म्यादभावः, पृथिवी न तत् ।
स्पर्शाभावात्तदुद्भूतरूपाभ्युपगमादपि ॥ १३ ॥
निर्गन्धत्वाच्च नो पृथ्वी, नीलरूपाश्रयत्वतः ।
आलोकनिरपेक्षेण चाक्षुषत्वाच्च नेतरत् ॥ १४ ॥

अन्यथाप्यभावं विभजते "भेदादन्ये" इति । "द्विधापि" इति, विभज्यते इति शेषः । "असौ" अभावः ॥ १२ ॥

रूपवत्त्वात् गतिमत्त्वाच्च तमोऽपि द्रव्यमिति केचित्, तन्निरस्य, तस्याप्यभावेऽन्तर्भावमाह, "तम" इति । तत्र पृथिवी तम इत्याशङ्कां निरस्यति "पृथिवी" इति । "तत्" तमः । तमसः पृथिवीत्वाभावहेतुमाह, "स्पर्शाभावात्" इति । तथाच स्पर्शवत् द्रव्याधीनैव पृथिव्युत्पत्तिरिति तमसस्तत्त्वे तस्मिन्नपि स्पर्शोऽनुभूयेत, न चैवम् । अथास्त्वनुद्भूत एव स्पर्शस्तमसि, इत्याशङ्कां निरस्यति "तदुद्भूत" इति । तथाचोद्भूतरूपस्योद्भूतस्पर्शव्याप्यत्वात् उद्भूतरूपवतोऽनुद्भूतस्पर्शासम्भवः ॥ १३ ॥

पृथिवीत्वाभावे हेत्वन्तरमाह, "निर्गन्धत्वाच्च नो पृथ्वी" इति । तम इत्यनुसज्यते । तमसो जलादित्वमपि निरस्यति, "नीलरूपाश्रयत्वतः" इति । अथ तमो दशमं द्रव्यमेवास्तु, उद्भूतरूपस्योद्भूतस्पर्शव्याप्यत्वन्तु पृथिव्यामेव इत्याशङ्कायां वा "नीलरूपाश्रयत्वतः" इत्याद्युपतिष्ठते । द्रव्यान्तरस्य नीलरूपाश्रयत्वाभावात् नीलरूपस्य गुरु-

द्रव्यान्तरेणावरणात् तेजसो गच्छता पुनः ।
तद्गच्छत्-द्रव्यसाधर्म्यात् तस्याप्यस्तु गतिभ्रमः ॥ १५ ॥
अस्तित्वमभिधेयत्वं ज्ञेयत्वादिकमेव च ।
सप्तानामपि साधर्म्यं षण्णां भावत्वमिष्यते ॥ १६ ॥
ऋते च नित्यद्रव्येभ्य आश्रितत्वमुदाहृतम् ।

त्वादिनान्तरीयकत्वादित्याशयः । ननु शब्दमात्रविशेषगुणकाकाशवत् नीलरूपमात्रविशेषगुणकं तमो भविष्यतीत्याशङ्कायामाह, "आलोक" इत्यादि । नीलरूपवत् यदि तमः स्यात्, आलोकनिरपेक्षेण चाक्षुषं न स्यात्, अभ्युपगम्यते च तत् द्रव्यन्तरावादिभिरिति भावः । "इतरत्" जलादि, द्रव्यान्तरं वा ॥ १४ ॥

ननु तमसोऽभावत्वे कथं तस्य गतिमत्त्वं प्रतीयते इत्यत्राह, "द्रव्यान्तरेणावरणात्" इति । गच्छता द्रव्यान्तरेण तेजस आवरणात्, गच्छत्-द्रव्य-साधर्म्यात् तमसोऽपि गतिभ्रम इत्यर्थः । अयमाशयः । तेजोऽभाव एव तमः, तेन यत्रैव देशे तेजोऽभावस्तत्रैव तम इत्यभिलप्यते । एवञ्च सति गच्छता द्रव्येण तेजस आवरणात् आवरकस्य द्रव्यस्य च गमनात् सुतरामेव तमसोऽपि गतिभ्रम उपपद्यते इति विभावनीयम् । रूपवत्ताप्रतीतिरपि भ्रान्तिरेव पार्थिवनैल्यस्य तत्राभिमानादिति बोध्यम् ॥ १५ ॥

साधर्म्य-वैधर्म्ये वक्तुं प्रक्रमते "अस्तित्वमभिधेयत्वम्" इत्यादि । "ज्ञेयत्वादि" इत्यादिपदात् प्रमेयत्वादिपरिग्रहः । "साधर्म्यं" समानो धर्मः ॥ १६ ॥

द्रव्यादीनाञ्च पञ्चानाम् अनेकसमवायिता ॥ १७ ॥
निर्गुणत्वं निष्क्रियत्वं गुणादीनां प्रकीर्त्तितम् ।
अन्यथाप्युपपत्तिः स्यात् प्रत्ययव्यवहारयोः ॥ १८ ॥
द्रव्यादीनां त्रयानान्तु द्रव्यवत्त्वमनित्यता ।
कार्य्यत्वं कारणत्वञ्च सत्तावत्त्वं तथैव च ॥ १९ ॥
तद्व्याप्यजातिमत्त्वञ्च धर्माधर्मनिमित्तता ।
अर्थशब्दाभिधेयत्वमपि वैशेषिके मते ॥ २० ॥

"ऋते च नित्यद्रव्येभ्यः" इत्यादि । नित्यद्रव्याणि विहायाश्रितत्वं साधर्म्यम्, अर्थादन्येषाम् । नित्यद्रव्यन्तु न कुत्राप्याश्रितमिति फलितार्थः । "अनेकसमवायिता" इति । अनेकत्वं समवायित्वञ्च द्रव्यादि-पञ्चानां साधर्म्यमित्यर्थः । यद्यपि घटादीनां प्रत्येकमनेकत्वं नास्ति, तथाप्यनेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं तदर्थः । एवं सर्वत्राप्यूह्यम् । तादृशोपाधिश्च द्रव्यत्वादिः ॥ १७ ॥

ननु गुणादीनां निर्गुणत्वे गुणादिषु कथमेकत्वादि प्रतीतिर्व्यवहारश्च इत्यत्राह,—"अन्यथाप्युपपत्तिः स्यात्" इति । अन्यथापि, गुणादीनां गुणवत्वं विनापि । तत्र हि धीविशेषविषयत्वमादायैव तादृशप्रत्ययो व्यवहारश्चोपपद्यते इति भावः ॥ १८ ॥

"द्रव्यादीनां त्रयाणान्तु" इत्यादि श्लोकद्वयस्यायमर्थः । द्रव्यगुणकर्मणां द्रव्यवत्त्वम्, अनित्यत्वं, कार्य्यत्वं, कारणत्वं, सत्तावत्त्वं, सत्ताव्याप्यजातिमत्त्वं, धर्माधर्मनिमित्तत्वम्, अर्थशब्दाभिधेयत्वञ्च साधर्म्यमित्यर्थः ॥ १९ ॥ २० ॥

सजातीयारम्भकत्वं द्वयोर्ज्ञेयं न कर्मणाम् ॥ २१ ॥
कार्य्यकारणवध्यत्वाभावो द्रव्ये, गुणेषु च ।
तत् द्वयं, कार्य्यवध्यत्वं ज्ञेयं कर्मसु केवलम् ॥ २२ ॥
त्रयाणां द्रव्यमाद्यानां समवायि निमित्तकम् ।
तेषामसमवायि तु हेतुर्गुण इहोच्यते ॥ २३ ॥

"सजातीयारम्भकत्वम्" इति । द्वयोर्द्रव्यगुणयोः सजातीयारम्भकत्वं साधर्म्यं न कर्मणामित्यर्थः ॥ २१ ॥

"कार्य्यकारणवध्यत्वाभावः" इति । कार्य्यञ्च कारणञ्च कार्य्यकारणे, तयोर्वध्यः कार्य्यकारणवध्यः, तस्य भावः कार्य्यकारणवध्यत्वं, तदभावः द्रव्यस्य साधर्म्यम् । द्रव्यं, स्वकारणं स्वकार्य्यञ्च न हन्तीति वस्त्वर्थः । गुणेषु च तत् द्वयं, कार्य्यवध्यत्वं कारणवध्यत्वञ्चेत्यर्थः । यथा आदिमं शब्दं द्वितीयः शब्दो नाशयति, इत्यादि न शब्दस्य कार्य्यवध्यत्वम्, एवमन्तिमं शब्दमुपान्त्यः शब्दो नाशयतीति अन्तिमशब्दस्य कारणवध्यत्वमिति द्रष्टव्यम् । "कार्य्यवध्यत्वम्" इत्यादि । कर्मसु केवलं कार्य्यवध्यत्वमेव न तु कारणवध्यत्वमपीत्यर्थः । स्वजन्योत्तरसंयोगेन कर्मनाशादिति भावः ॥ २२ ॥

"त्रयाणां द्रव्यमाद्यानाम्" इत्यादि । समवायिनिमित्तकमिति निमित्तशब्दोऽत्र कारणपर्य्यायः । आद्यानां त्रयाणां द्रव्यगुणकर्मणां द्रव्यं समवायिकारणमित्यर्थः । गुणस्तु तेषामसमवायि कारणमिति पराद्धस्यार्थः ॥ २३ ॥

व्यतिरेकोपलम्भान्न द्रव्याणां कर्म कारणम् ।
स्फुटं खण्डपटोत्पत्तिर्विना कर्मैव दृश्यते ॥ २४ ॥
द्रव्यमेकमनेकेषां द्रव्याणां कार्य्यमिष्यते ॥ २५ ॥
एकद्रव्योद्भवं द्रव्यं न किञ्चिदपि जातुचित् ॥ २६ ॥
हेतुर्नासमवाय्यस्ति योगस्तन्तोर्न चांशुकैः ।
वेमाद्यभिहतस्तत्र महांस्तन्तुर्विनश्यति ॥ २७ ॥

ननु कर्मापि द्रव्याणां कारणमेव, तत् कथं नोक्तम्? इत्याह,— "व्यतिरेकोपलम्भात्" इत्यादि। कर्म द्रव्याणां न कारणं, व्यभिचारदर्शनादित्यर्थः। व्यभिचारमेवाह,—"स्फुटम्" इति। महापटनाशे विनैवावयवकर्म पूर्वावस्थितेभ्य एव संयोगेभ्यः खण्डपटोत्पत्तिः स्फुटं दृश्यते इत्यर्थः। तथाचासमवायिकारणसंयोगजनकतयैव कर्मणामुपयोगो न पुनस्तेषामपि कारणमिति भावः ॥ २४ ॥

"द्रव्यमेकमनेकेषाम्" इत्यादि। अनेकद्रव्यकार्य्यत्वं द्रव्याणां साधर्म्यमित्यर्थः ॥ २५ ॥

ननु यत्रैकेन तन्तुना तानप्रतितानक्रमेण पट उत्पद्यते तत्र द्रव्यस्यैकद्रव्यकार्य्यतापीत्याशङ्क्याह, "एकद्रव्योद्भवम्" इति। जातुचित् कदाचिदपि किञ्चिदपि द्रव्यम् एकद्रव्योद्भवं नेत्यर्थः ॥ २६ ॥

कुत एतदित्यत्राह,—"हेतुर्नासमवाय्यस्ति" इति। असमवायि कारणं नास्ति, एकतन्तुकपटे इति शेषः। अन्यस्यान्येन संयोगो भवति, न तु स्वस्यैव स्वेन संयोगः सम्भवति। तथाचासमवायि-

द्वित्वप्रभृतयः संख्या द्विपृथक्त्वादयो गुणाः।
संयोगाश्च विभागाश्च नैकद्रव्यसमुद्भवाः ॥ २८ ॥
नानेकद्रव्यसाध्यन्तु कर्मानेकेष्ववृत्तितः।
शरीरकर्मसामग्री व्याप्तावयवकर्मणा ॥ २९ ॥

कारणाभावात् नैकतन्तुकः पट इत्यर्थः। ननु अंशुकतन्तुसंयोगो-ऽसमवायिकारणमस्तु इत्याशङ्क्याह,—"योगस्तन्तोर्न चांशुकैः" इति। अंशुकैः सह तन्तोः संयोगो नास्ति। तयोरयुतसिद्धत्वेन तदसम्भवादित्यर्थः। अथैवमेकेनैव तन्तुना पटः कथमुत्पन्नो दृश्यते इत्य-त्राह,—"वेमाद्यभिहतः" इत्यादि। तथाच वेमाद्यभिघातेन महत-स्तन्तोर्नाशात् तदानीमुत्पन्नैर्बहुभिरेव तन्तुभिस्तत्र पट आरभ्यते इति भावः ॥ २७ ॥

"द्वित्वप्रभृतयः सङ्ख्याः" इत्यादि। "नैकद्रव्यसमुद्भवाः" इति, अनेकद्रव्यारब्धत्वममीषां साधर्म्यमित्यर्थः ॥ २८ ॥

"नानेकद्रव्यसाध्यन्तु" इति। कर्म तु अनेकद्रव्यसाध्यं नेत्यर्थः। तत्र हेतुमाह,—"अनेकेष्ववृत्तितः" इति। अयमर्थः, न हि द्रव्य-योर्द्रव्येषु वा कर्म समवैति, येन द्वाभ्यां बहुभिर्वा द्रव्यैरेकं कर्मा-रभ्येत। ननु शरीरकर्म शरीरे तदवयवेषु च समवैति, कथ-मन्यथा शरीरे चलति, हस्तादावपि तत्प्रत्ययः इत्यत्राह,—"शरीर-कर्मसामग्री" इति। "अवयवकर्मणा" इति अवयवानां कर्माणि दस्या इति व्युत्पत्त्या अवयवकर्मसामग्र्या इत्यर्थः। तथाचाव-यविकर्मसामग्र्या अवयवकर्मसामग्री-व्याप्तत्वात् तथा प्रत्यय इति भावः ॥ २९ ॥

संयोगानामनेकेषां द्रव्यमेकं फलं विदुः ।
रूपादीनामनेकेषाम् एकं रूपादिकं तथा ॥ ३० ॥

प्रयत्न-संयोग-गुरुत्वकानाम्
उत्क्षेपणाद्येकमवेहि कार्य्यम् ।
तथैव संयोगविभागवेगाः
स्युः कर्मणां कार्य्यतया प्रसिद्धाः ॥ ३१ ॥

कारणं समवायीति द्रव्येषु व्यवह्रियते ।
तत्रैव केवलं कार्य्यसमवायोपलम्भनात् ॥ ३२ ॥

"संयोगानामनेकेषाम्" इति । यथा बहूनां तन्तुसंयोगानां पटरूपमेकं द्रव्यं फलम् । "रूपादीनामनेकेषाम्" इति । आदिशब्दो रसादिपरिग्रहार्थः । तथाच समवायिकारणगतानां बहूनां रूपादीनाम् अवयविद्रव्यगतम् एकं रूपादिकार्य्यमित्यर्थः ॥ ३० ॥

"प्रयत्नसंयोगगुरुत्वकानाम्" इत्यादि । उत्क्षेपणकर्त्तुः प्रयत्नः, तस्यैव हस्तनोदनम्, उत्क्षेप्यलोष्टादीनां गुरुत्वम्, एतत् त्रयं हि कारणमुत्क्षेपणस्य । "उत्क्षेपणादि" इत्यादिपदमवक्षेपणादिसंग्रहार्थम् । "तथैव संयोगविभागवेगाः" इति । वेगः, वेगाख्यसंस्कारः । स्थितिस्थापकसंस्कारोऽपि कर्मकार्य्यमित्यन्ये ॥ ३१ ॥

"कारणं समवायीति" इत्यादि । समवायिकारणत्वं द्रव्याणां साधर्म्यमित्यर्थः । तत्र हेतुमाह,—"तत्रैव केवलम्" इत्यादि । न हि समवायेन कार्य्याधारता द्रव्यभिन्ने वर्त्तते इत्यर्थः ॥ ३२ ॥

तेषां संयोगवत्त्वाच्च तथात्वं केचिदूचिरे ।
तत्त्वेऽपि च निमित्तत्वमपरे चारुचेतसः ॥ ३३ ॥
सद्भावात् समवायस्य कारणे समवायिनि ।
भवेदसमवायित्वं संयोगादिषु कर्म्मणाम् ॥ ३४ ॥
कारणैकार्थसम्बन्धात् कार्य्यरूपरसादिषु ।

"तेषां संयोगवत्त्वाच्च" इत्यादि । 'तेषां' द्रव्याणां 'संयोगवत्त्वात्' संयोगाश्रयत्वात् । संयोगपदम् असमवायिकारणाभिप्रायम् । चकारः पूर्वोक्तसमुच्चयार्थः । असमवायिकारणाश्रयत्वाच्च द्रव्याणां समवायिकारणत्वमिति फलितार्थः । असमवायिकारणानां समवायिकारणवृत्तित्वात्, असमवायिकारणाश्रयत्वं यदि द्रव्याणां, तदा सुतरामेव तेषां समवायिकारणत्वमिति भावः । "तत्त्वेऽपि च" इति । द्रव्याणां तत्त्वेऽपि समवायिकारणत्वेऽपि निमित्तकारणत्वमित्यपरेषां मतम् । अत्रापि "संयोगवत्त्वात्" इत्यनुषज्यते । अयमाशयः । पटं प्रति तन्तूनां समवायिकारणत्वेऽपि तुरीतन्तुसंयोगद्वारा निमित्तकारणत्वमपि तेषां विद्यते, तुरीवत् ॥ ३३ ॥

"सद्भावात् समवायस्य" इत्यादि । संयोगादिषु कर्म्मणामसमवायिकारणत्वं भवेत् । तत्र हेतुमाह, 'सद्भावात्' इत्यादि । समवायिनि कारणे (अर्थात् संयोगादीनां समवायिकारणे) समवायस्य (अर्थात् कर्म्मणां समवायस्य) सद्भावात्, विद्यमानत्वादित्यर्थः । एषैव कार्य्यैकार्थप्रत्यासत्तिरुच्यते ॥३४॥

"कारणैकार्थसम्बन्धात्" इत्यादि । कारणेन समवायिकारणेन

तत्त्वं रूप-रसादीनां कारणे समवायिनाम् ॥ ३५ ॥

पटस्यासमवायी स्यात् संयोगः समवायिषु ।

समवायात्, क्वचित् तत्त्वं तस्मात् तत्समवायिषु ॥ ३६ ॥

सह, एकस्मिन्नर्थे सम्बन्धात्, कार्य्यरूपादिषु कारणे समवायिनां कारणवृत्तीनां रूपादीनां तत्त्वम् असमवायिककारणत्वमित्यर्थः । यथा घटरूपं प्रति कपालरूपस्य । घटरूपं प्रति हि घटः समवायिकारणं, स च कपाले वर्त्तते । कपालरूपमपि कपाले वर्त्तते, इति घटरूपस्य समवायिकारणेन सह एकस्मिन् कपाले कपालरूपस्य सम्बन्धोऽस्त्येव इति द्रष्टव्यम् । एषैव कारणैकार्थप्रत्यासत्तिरुच्यते ॥ ३५ ॥

"पटस्यासमवाय स्यात्" इत्यादि । 'समवायिषु' समवायिकारणेषु तन्तुषु, 'समवायात्' समवायसम्बन्धेन विद्यमानत्वात्, 'संयोगः' तन्तुसंयोगः, पटस्य असमवायिकारणं स्यादित्यर्थः । "क्वचित्" इत्यादि । 'तत्त्वम्' असमवायिकारणत्वं, 'तस्मात्' समवायात्, 'तत्समवायिषु' इति 'तत्' पदं समवायिपरं, समवायि-समवायिषु इति तदर्थः । तथाच; समवायिकारणस्य यत् समवायिकारणं, तत्र समवायादपि क्वचिद् असमवायिकारणत्वमिति वर्त्तुलार्थः । यथा तूलपिण्डगतमहत्त्वं प्रति तूलपिण्डावयवगतसंयोगस्य । भवति हि महत्त्वं प्रति तूलपिण्डस्य समवायिकारणता, तूलपिण्डं प्रति च तूलपिण्डावयवानां समवायिकारणता, तत्र च समवायेन संयोगो विद्यते इति भावः । तथाच संयोगस्यापि प्रत्यासत्तिद्वयेनैवासमवायिकारणतेत्याशयः ॥ ३६ ॥

वैशेषिकमते तेषां तदेषा द्वितीया गतिः ।
काचित् कारणता लघ्वी काचित् च महती मता ॥ ३७ ॥
संयुक्तसमवायेन वह्नेर्वैशेषिकं पुनः ।
पाकजेषु निमित्तं स्यादन्यदूह्यं मनीषिभिः ॥ ३८ ॥
कार्य्यं यत् समवेतं स्यात् समवायि तदिष्यते ।
तत्रापि समवेतानां विज्ञेयात् समवायिता ।
तदन्यत् कारणं यत्तु तन्निमित्तमिहोच्यते ॥ ३९ ॥

उपसंहरति "वैशेषिकमते तेषाम" इत्यादि । 'तेषाम्' असमवायिकारणानां, "काचित्" इति । कार्य्यैकार्थ-समवायात् कारणता लघ्वी, कारणैकार्थ-समवायाच्च कारणता महती इति वैशेषिकाणां परिभाषाऽत्र स्मर्त्तव्या ॥ ३७ ॥

"संयुक्तसमवायेन" इत्यादि । अग्नेः 'वैशेषिकं' विशेषगुण औष्ण्यं, 'पाकजेषु' पाकजरूपादिषु, निमित्तकारणं स्यादित्यर्थः । 'संयुक्तसमवायेन' इति, पाकजरूपादीनां वह्निसंयुक्ते वस्तुनि समवायादित्यर्थः । तथाच पाकजरूपादिकं प्रति स्वाश्रयसंयोगसम्बन्धेन औष्ण्यस्पर्शस्य निमित्तकारणत्वमिति भावः । 'अन्यदूह्यं मनीषिभिः' इति 'अन्यत्' धर्मादीनां निमित्तकारणत्वम् ॥ ३८ ॥

समवायिकारणादीना लक्षणमाह, "कार्य्यं यत्समवेतं स्यात्" इति "समवायि" इति समवायिकारणमित्यर्थः । "तत्रापि" इति । 'तत्र' समवायिकारणे । तथाच समवायिकारणसमवेतं यत् कारणं,

कारणत्वं त्रिधा तस्मात् नियतं पूर्ववर्त्तिता ।
अन्यथा सिद्धिशून्यानां तदन्यद्वास्तु किञ्चन ॥ ४० ॥
यत्कार्य्यं प्रति यस्य स्याद् अवश्यं पूर्ववर्त्तिता ।
सर्वं तद्भिन्नमेतस्मिन् अन्यथासिद्धिमत् स्मृतम् ॥ ४१ ॥
दण्डाभावाद् घटाभावाद् वैपरीत्यानवेक्षणात् ।
कार्य्यकारणभावोऽस्ति कादाचित्कत्वतस्तथा ॥ ४२ ॥

तदसमवायिकारणमित्यर्थः । "तदन्यत्" इति, समवायिकारणा-समवायिकारणभिन्नं यत् कारणं, तन्निमित्तकारणमित्यर्थः ॥ ३९ ॥

उपसंहरति "कारणत्वं त्रिधा तस्मात्" इति । 'तस्मात्' समवायिकारणासमवायिकारण-निमित्तकारणानां भेदात्, 'कारणत्वं त्रिधा' भिद्यते इति शेषः । किं पुनः कारणत्वं यस्यायं विभाग इत्याकाङ्क्षायां कारणत्वं लक्षयति "नियतम्" इत्यादि । 'तत्' कारणत्वम् । 'अन्यत्' स्वरूपसम्बन्धविशेषरूपम् । तथाच अन्यथासिद्धि-शून्यवृत्ति यन्नियतपूर्ववर्त्तित्वं तदेव कारणत्वम्, अथवा स्वरूप-सम्बन्धविशेष एव कारणत्वमित्यर्थः ॥ ४० ॥

अन्यथासिद्धिं लक्षयति । "यत्कार्य्यं प्रति" इत्यादि । 'एतस्मिन्' कार्य्ये ॥ ४१ ॥

इदानीं कार्य्यकारणभाव एव नास्तीति वदन्तं प्रति कार्य्य-कारणभावं व्यवस्थापयति "दण्डाभावात्" इत्यादि । 'दण्डाभावात्' इति पञ्चम्यर्थः । प्रयोज्यत्वम्, अन्वयश्चास्य घटाभावे । 'घटाभावात्' इति पञ्चम्यर्थो हेतुत्वम्, अन्वयश्चास्य 'कार्य्यकारणभावोऽस्ति' इति

न हेतुफलभावेन विना भवति जातुचित् ।
प्रवृत्तिर्वा निवृत्तिर्वा जगतः स्यात् निरीहता ॥ ४३ ॥
न भावो न भवत्येव नाप्यहेतोर्न वान्यतः ।
नियतावधिकं यस्मात् कार्य्यजातं समीक्ष्यते ॥ ४४ ॥

वक्ष्यमाणेन। तथाच दण्डाभावप्रयोज्यो घटाभावः दण्डघटयोः कार्य्यकारणभावमाक्षिपति, कारणाभाव एव हि कार्य्याभावं प्रयोजयति। इतरथा घटाभाव-प्रयोज्योऽपि दण्डाभावः स्यात्, न च तथा दृश्यते। इत्येतदेवाह, "वैपरीत्यानवेक्षणात्" इति। कार्य्य-कारणभावसद्भावे हेत्वन्तरमाह, "कादाचित्कत्वतः" इति। किञ्चि-त्कालसत्त्वे सति किञ्चित्कालसत्त्वं कादाचित्कत्वम्। तच्च घटादीना-मनुभूयते, न च तदपि कारणापेक्षामन्तरेण सम्भवति। अन्यथा हि घटादिकं स्यादेव वा, न स्यादेव वा, न तु कदाचित् स्यादिति भावः ॥ ४२ ॥

कार्य्यकारणभावसद्भावे हेत्वन्तरमाह, "न हेतुफलभावेन" इति। 'हेतुफलभावेन' कार्य्यकारणभावेन 'विना' 'जातुचित्' कदाचिदपि 'प्रवृत्तिः' 'निवृत्तिर्वा' न 'भवति' इत्यर्थः। प्रवृत्तिं प्रति हि इष्टसाधनताज्ञानस्य, निवृत्तिं प्रति च अनिष्टसाधनता-ज्ञानस्य हेतुत्वं, न च कार्य्यकारणभावमन्तरेण तादृशज्ञान-सम्भवः। अतः कार्य्यकारणभावाभावे 'जगतः' 'निरीहता' निश्चे-ष्टता 'स्यात्' इत्यर्थः ॥ ४३ ॥

भावो न भवति अहेतोर्वा भवति अलीकाद्वा भवति इति मतं

कारणानामसत्त्वे तु सत्त्वं कार्य्येषु दुर्लभम् ।
सर्वत्राभावसौलभ्यान्नियमो नोपपद्यते ॥ ४५ ॥
न च चूर्णी-कृताद्बीजाद् अङ्कुरोत्पत्तिरीच्यते ।
नापि कार्य्यं सदेवासीद् इत्येतदपि साम्प्रतम् ॥ ४६ ॥

निरस्यति "न भावो न भवत्येव" इत्यादि । भावो न भवत्येव इति न इत्यर्थः । 'अन्यतः' अलीकात् । हेतुमाह, "नियतावधिकम्" इत्यादि । यस्मात् कार्य्यं नियतावधिकं दृश्यते, तस्मात् नैतदित्यर्थः । उत्पत्त्यभावे अहेतोरलीकाद्वा भावे हि, कार्य्यस्याकस्मिकत्वापत्त्या नियतावधिकत्वं नोपपद्यते इति भावः ॥ ४४ ॥

इदानीमसतः सदुत्पत्तिं विशेषतो निरस्यति "कारणानाम्" इत्यादि । कारणस्यासत्त्वे मृत्कार्य्यस्य मृत्त्ववत् असत्कार्य्यस्यासत्त्व-प्रसङ्ग इति भावः । किञ्च "सर्वत्र" इति । तथाचाभावस्य हेतुत्वे तस्य सर्वत्र सुलभत्वात् सर्वत्र सर्व्वोत्पत्तिप्रसङ्ग इत्यर्थः ॥ ४‡ ॥

ननु कुसूलस्थानि वीजानि नाङ्कुरमुत्पादयन्ति, किन्तु क्षेत्रे विकीर्णानि तानि ध्वंसद्वारा अङ्कुरमुत्पादयन्ति इति व्यक्तमभावस्य कारणत्वम् इत्याशङ्क्याह, "न च चूर्णीकृतात्" इति । अभावस्य कारणत्वे चूर्णीकृतादपि वीजादङ्कुरोत्पत्तिः स्यात् । न च तथा दृश्यते, अतो नाभावस्य कारणत्वमित्यर्थः । यत्तु कुसूलस्थानि वी-जानि नाङ्कुरमाभरन्ते, तत् सहकारिविरहादेव । क्षेत्रे विकी-र्णानामपि वीजानां न निरन्वयनाश इति नानुपपत्तिरिति भाव्यम् । साङ्ख्यमतं दूषयति "नापि" इति । 'साम्प्रतं' युक्तम् ॥ ४६ ॥

अभिव्यक्तेरभिव्यक्तावनवस्था प्रसज्यते ।
वैपरीत्येऽपराद्धं किम् अन्यैरपि घटादिभिः ॥ ४७ ॥
नियमानुपपत्तिर्नो तत्स्वभावत्वसम्भवात् ।
अन्वयव्यतिरेकाभ्यामेव सोऽप्यवगम्यते ॥ ४८ ॥
तैरप्यभ्युपगन्तव्यः स्वभावः कथमन्यथा ।
तन्तुष्वेव पटव्यक्तिर्नान्येष्वित्येष निर्णयः ॥ ४९ ॥
वैदिक्यन्वयगम्यैव हेतुता लौकिकी पुनः ।

साङ्ख्यमतदूषणे हेतुमाह, "अभिव्यक्तेः" इति । अयमर्थः, अभिव्यक्तिः किं सती अभिव्यज्यते, उतासती उत्पद्यते ? आद्ये अनवस्था, द्वितीये अभिव्यक्तेरसत्या उत्पत्तिस्वीकारे तुल्ययुक्त्या घटादीनामपि असतामेवोत्पत्तिरिति सदेव कार्य्यमिति रिक्तं वचः इति भावः ॥४७॥

असतामुत्पत्तिस्वीकारे तन्तुभ्य एव पटोत्पत्तिर्न कपालेभ्य इति नियमो नोपपद्यते असत्त्वाविशेषात् सर्वत्र सर्वोत्पत्तिप्रसङ्गात् इत्याशङ्क्याह, "नियमानुपपत्तिर्नो" इति । अयमर्थः, कस्यचित् कारणस्य कस्यचिदेव कार्य्यस्य जनकत्वं स्वभाव इति न सर्वत्र सर्वोत्पत्तिः । स च स्वभावोऽन्वयव्यतिरेकावगम्यो भवति, सत्यां मृदि घटदर्शनात् असत्याञ्च अदर्शनादिति भावः ॥ ४८ ॥

परैरपि स्वभावोऽवश्यमभ्युपगन्तव्य इत्याह, "तैरपि" इति । 'तैरपि' सत्कार्य्यवादिभिरपि, स्वभावोऽभ्युपगन्तव्यः । अन्यथा पटाभिव्यक्तिस्तन्तुष्वेव न कपालेषु इति नियमो न स्यादित्यर्थः ॥ ४९ ॥

अन्वयव्यतिरेकाभ्यां द्वाभ्यामेवावगम्यते ॥ ५० ॥

फलानन्तर्य्यनियमे हेतुता वैदिकी मता ।

वैकल्पिकी कारणता सुस्थितैवं भविष्यति ॥ ५१ ॥

वैजात्यकल्पनेनापि नात्र निर्वाहसम्भवः ।

विकल्पोऽपि तदा न स्यात् वाजपेयाश्वमेधवत् ॥ ५२ ॥

इदानीं कारणत्वे कश्चिद्विशेषमाह, "वैदिकी" इति । वैदिकी कारणता केवलमन्वयगम्या, अन्वयज्ञानादेव तत्र प्रवृत्त्युपपत्तेः । लौकिकी तु कारणता अन्वयव्यतिरेकावगम्या, नान्वयमात्रगम्या इत्यर्थः ॥ ५० ॥

वैदिकीकारणता अन्वयमात्रगम्या इत्येतदेवाह, "फलानन्तर्य्यनियमे", इति । फलस्यानन्तर्य्यनियम इत्यर्थः । यदनन्तरमेव फलावश्यम्भावः तस्यैव वैदिकी कारणता न तु तद्व्यतिरेकेण फलव्यतिरेकोऽप्यावश्यक इति भावः । तदेवोपपादयति "वैकल्पिकी" इति । अन्यथा वैदिककारणताया अपि अन्वयव्यतिरेकगम्यत्वे "यवैर्यजेत व्रीहिभिर्वा यजेत" इत्यत्र एकस्मिन्नेव फले यवकरणकस्य व्रीहिकरणकस्य च यागस्य हेतुतया, यवकरणकयागनिष्पाद्ये फले व्रीहिकरणक-यागस्य, व्रीहिकरणक-याग-निष्पाद्ये च फले यवकरणक-यागस्य व्यतिरेकात् कस्यापि न कारणत्वं स्यात् । कारणतया अन्वयमात्रगम्यत्वे तु यवकरणक-यागान्वये व्रीहिकरणक-यागान्वये च फलसद्भावात् उभयोरपि कारणत्वं निर्वहतीति भावः ॥ ५१ ॥

अथ वैजात्यस्य कार्य्यतावच्छेदकत्वकल्पनया यवकरणकयागस्य

लौकिकी हेतुता यत्र तृणारणिमणिस्थले ।
वैजात्यं कल्प्यते तत्र चिन्त्यमन्यन्मनीषिभिः ॥ ५३ ॥
जात्यादीनां त्रयाणान्तु नित्यभावत्वमुच्यते ।
असामान्यविशेषत्वं जन्यता शून्यभावता ॥ ५४ ॥
निमित्ततान्यहेतुत्वशून्यभावत्वमेव च ।
धीमात्रहेतुभावत्वं स्वात्मकं सत्त्वमित्यपि ॥ ५५ ॥
क्रियावत्त्वं गुणित्वञ्च समवायिनिमित्तता ।
सङ्ख्यादिपञ्चवत्त्वञ्च विज्ञेयं द्रव्यलक्षणम् ॥ ५६ ॥

व्रीहिकरणकयागस्य च न परस्परव्यभिचार इत्याशङ्क्याह, "वैजात्यकल्पनेनापि" इति । 'अत्र' विकल्पस्थले । हेतुमाह, "विकल्पोऽपि" इति । वैजात्यकल्पने अन्यस्मिन्नेव फले यवकरणक-यागस्य कारणता, अन्यस्मिन्नेव च व्रीहिकरणकयागस्येति विभिन्नफलकतया विकल्प एव न स्यादिति भावः ॥ ५२ ॥

"असामान्यविशेषत्वम्" इति । सामान्यञ्च विशेषश्च सामान्यविशेषौ, न विद्येते सामान्यविशेषौ यत्र, तस्य भावः तत्त्वम् । सामान्यं सत्ता, विशेषो द्रव्यत्वादिः ॥ ५४ ॥

इदानीं द्रव्याणामेव साधर्म्यं विशेषतो वक्तुं द्रव्यलक्षणं तावदाह, "क्रियावत्त्वम्" इत्यादि । क्रियावद्वृत्तिपदार्थविभाजकोपाधिमत्त्वं तदर्थः, नातो निष्क्रिये गगनादावव्याप्तिः । एवमन्यत्रापि । "समवायिनिमित्तता" इति । निमित्तशब्दोऽत्र कारणपर्यायो द्रष्टव्यः ।

द्रव्याणां गुणवत्त्वं स्यात् तथा द्रव्यत्वयोगिता ।
अनाश्रितत्वनित्यत्वे द्रव्यैः सावयवैर्विना ॥ ५७ ॥
तद्वदन्त्यविशेषित्वम् एतेषामेव कीर्त्तितम् ।
क्षितिर्जलञ्च ज्वलनं पवनात्ममनांसि च ॥ ५८ ॥
अनेकत्वममीषां स्याद् विशेषित्वं तथैव च ।
अनात्मनामथैतेषां परत्वमपरत्वकम् ॥ ५९ ॥
मूर्त्तत्वं कर्मवत्त्वञ्च वेगवत्त्वञ्च कीर्त्तितम् ।
दिक्कालौ गगनञ्चात्मा निष्क्रियाणि प्रचक्षते ॥ ६० ॥
क्रियावद्वस्तुवैधर्म्यात् प्राच्यां यातीति या मतिः ।

"सङ्ख्यादिपञ्चवत्त्वम्" इति । तेषामेकैकवत्त्वमेव लक्षणं न तु मिलितवत्त्वम् अव्यावर्त्तकत्वादिति ध्येयम् ॥ ५६ ॥

"द्रव्यैः सावयवैर्विना" इति । निरवयवद्रव्याणां नित्यत्वमनाश्रितत्वञ्च साधर्म्यमित्यर्थः ॥ ५७ ॥

"तद्वदन्त्यविशेषित्वम्" इति । अन्तेऽवसाने वर्त्तते इति अन्त्यः, स चासौ विशेषश्चेति, तद्वत्त्वमित्यर्थः । सामान्यात्मकविशेषव्यवच्छेदार्थमन्त्यपदम् । 'एतेषां' निरवयवद्रव्याणाम् । यद्यपि सामान्येनोक्तं, तथापि परमाण्वभिप्रायं द्रष्टव्यम् ॥ ५८ ॥

"विशेषित्वं तथैव च" इति । विशेषित्वं विशेषवत्त्वम् । विशेषाश्च क्षितित्वादयः ॥ ५९ ॥

"क्रियावद्वस्तुवैधर्म्यात्" इत्यादि । क्रियावद्वस्तुवैधर्म्यम् अमू-

प्राच्यां रौतीतिवत् सापि विशेषणतयेष्यते ।
अद्य यातीति या बुद्धिः साद्य रौतीतिवन्मता ॥ ६१ ॥
तेषां सर्वगतत्वञ्च महत्त्वं परमं तथा ॥ ६२ ॥
अशेषमूर्त्तसंयोगि-संयुक्तत्वमपि स्मृतम् ।
पञ्चानामक्षहेतुत्वं भूतत्वञ्च प्रकीर्त्तितम् ।
बाह्यैकैकेन्द्रियग्राह्य-विशेषगुणयोगिता ॥ ६३ ॥
चतुर्णां स्पर्शयोगित्वं द्रव्यारम्भकता तथा ।
प्रत्यक्षत्वं त्रयाणां स्यात् रूपवत्त्वं द्रवत्वकम् ॥ ६४ ॥

त्तत्वम्, अपकृष्टपरिमाणराहित्यमिति यावत्। तर्हि प्राच्यां याति, अद्य याति, इत्यादौ दिक्कालयोः कथं कर्माधारता इत्याशङ्क्य दिक्कालकृतविशेषणताविशेषसम्बन्धेनैव तथा प्रतीतिर्न समवाय-सम्बन्धेनेत्याह, "प्राच्यां यातीति या मतिः" इत्यादि ॥ ६१ ॥

"तेषां सर्वगतत्वञ्च" इत्यादि । 'तेषां' गगनकालदिगात्मनाम् । 'सर्वगतत्वं' सर्वमूर्त्तसंयोगित्वम् ॥ ६२ ॥

"पञ्चानामक्षहेतुत्वम्" इत्यादि । 'पञ्चानां' क्षित्यप्तेजोमरुद्व्योम्नाम् । 'अक्षहेतुत्वम्' इन्द्रियहेतुत्वम् । 'भूतत्वञ्च' इति अत्रापि पञ्चानामित्यनुषज्यते । भूतत्वमेवाह,—'बाह्यैकैकेन्द्रियग्राह्यविशेष-गुणयोगिता' इति ॥ ६३ ॥

"चतुर्णां स्पर्शयोगित्वम्" इति । 'चतुर्णां' क्षित्यप्तेजोमरुताम् । 'त्रयाणां' क्षित्यप्तेजसाम् ॥ ६४ ॥

गुरुत्वमाद्ययोर्ज्ञेयं रसवत्त्वं तथैव च ।
नैमित्तिकद्रवत्वन्तु विज्ञेयं क्षितितेजसोः ॥ ६५ ॥
भूतानामात्मनाञ्चैव ज्ञेया वैशेषिका गुणाः ।
अव्याप्यवृत्तिक्षणिकास्त एव गगनात्मनाम् ॥ ६६ ॥
रूप-गन्ध-रस-स्पर्शाः स्नेहोऽदृष्टञ्च भावना ।
शब्दो बुद्ध्यादयः षट् च गुणा वैशेषिका अमी ॥ ६७ ॥
रूपाद्येकादश गुणाः संस्कारो गुरुता तथा ।
द्रवत्वञ्च क्षिताविते गुणा ज्ञेयाश्चतुर्दश ॥ ६८ ॥
त एव गन्धरहिताः सस्नेहाः सलिले मताः ।
अष्टौ स्पर्शादयो रूपं द्रवत्वं वेग एव च ॥ ६९ ॥

"गुरुत्वम्" इति । 'आद्ययोः' क्षितिजलयोः ॥ ६५ ॥

"भूतानामात्मनाञ्चैव" इति । भूतात्मनां विशेषगुणवत्त्वं साधर्म्यमित्यर्थः । 'त एव' विशेषगुणा एव । तथाचाकाशात्मनाम् अव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वं साधर्म्यमित्यर्थः । स्वाधिकरणवृत्त्यभावप्रतियोगित्वम् अव्याप्यवृत्तित्वं, तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वं क्षणिकत्वम् ॥ ६६ ॥

विशेषगुणानाह,—"रूप-गन्ध-रस-स्पर्शाः" इत्यादि । 'अदृष्टं' धर्माधर्मौ । 'भावना' भावनाख्यः संस्कारः । विशेषा एव वैशेषिकाः । स्वार्थे ठक् ॥ ६७ ॥

"अष्टौ स्पर्शादयः" इत्यादि । 'वेगः' वेगाख्यसंस्कारः ॥ ६९ ॥

तेजसां मरुतां तेषु द्रवत्वं रूपमन्तरा ।
पञ्च सङ्ख्यादयः शब्दस्तथाकाशे प्रकीर्त्तिताः ॥ ७० ॥
काले सङ्ख्यादयः पञ्च दिश्यप्येते गुणा मताः ।
आत्मनां भावना धर्माधर्मौ सङ्ख्यादिपञ्चकम् ॥ ७१ ॥
बुद्धिप्रभृतयः षट् च गुणाः प्रोक्ताश्चतुर्दश ।
बुद्धिरिच्छा प्रयत्नश्च पञ्च सङ्ख्यादयस्तथा ॥ ७२ ॥
एते महेश्वरे ज्ञेया गुणा वैशेषिके मते ।
सङ्ख्यादयः पञ्च वेगः परत्वञ्चापरत्वकम् ॥ ७३ ॥
मनसः स्युर्गुणास्तेषां वैधर्म्यमपि चिन्त्यताम् ॥ ७४ ॥

क्षितौ जले चैव चतुर्दश स्यु-
स्तेजःसु चैकादशसङ्ख्यकास्ते ।
नवैव वायोर्गगने षडेव
दिक्कालयोः पञ्च गुणा भवन्ति ॥ ७५ ॥
जीवात्मनाञ्चापि चतुर्दश
स्युरष्टौ महेशे मनसस्तथैव ।

"द्रवत्वं रूपमन्तरा" इति । द्रवत्वं रूपञ्च विना तयेव मरुता-मित्यर्थः ॥ ७० ॥

"तेषां वैधर्म्यमपि चिन्त्यताम्" इति । भावत्वं येषां साध-

इत्येष वैशेषिक-कोविदानां

नयः, सुधीभिः स्वयमूह्यमन्यत् ॥ ७६ ॥

कृतौ लोकहितायैष कणादनयनीरधेः ।

तमःसञ्चयसम्भेदी यत्नतो रत्नसञ्चयः ॥ ७७ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कारप्रणीतायां तत्त्वावलौ
रत्नसञ्चयो नाम द्वितीयः
परिच्छेदः ॥ २ ॥

र्म्यमुक्तं, तदभावस्य वैधर्म्यमित्यादिरीत्या वैधर्म्यं चिन्त्यतामित्यर्थः ॥ ७४ ॥

उपसंहरति "क्षितौ जले चैव" इत्यादि ॥ ७५ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावली
रत्नसञ्चयनामकद्वितीयपरिच्छेदटीका
समाप्ता ॥ २ ॥

प्रमाणपरिचिन्तन-नामक-

तृतीयपरिच्छेदे

प्रथमं प्रकरणम् ।

मानाधीना मेयसिद्धिरिति सङ्क्षेपतोऽधुना ।
मेयप्रामाणिकत्वार्थं प्रमाणं परिचिन्त्यते ॥ १ ॥
प्रमा निर्णेष्यते तस्याः करणं मानमिष्यते ।
द्विविधं तत् कणादानां प्रत्यक्षं लैङ्गिकं तथा ॥ २ ॥
साक्षात्त्वयोगिविज्ञानं प्रत्यक्षं तत् विचक्षणाः ।
लौकिकालौकिकत्वाभ्यां द्विधा भिन्नं प्रचक्षते ॥ ३ ॥

"प्रमा निर्णेष्यते" इत्यादि। प्रत्यक्षलैङ्गिकभेदेन, द्विविधापि 'प्रमा' 'निर्णेष्यते' अनुपदमेव व्युत्पादयिष्यते, 'तस्याः' प्रमायाः करणमेव प्रमाणमित्यर्थः। "द्विविधं तत् कणादानाम्" इति। कणादानां मते 'तत्' प्रमारूपं ज्ञानं प्रत्यक्षलैङ्गिकभेदेन द्विविधमित्यर्थः। आर्षविज्ञानस्य प्रमात्वेऽपि तत् प्रत्यक्षान्तर्गतमिति बोधविलासे वक्ष्यते। तथाच प्रमाया द्वैविध्यात् तत्करणं प्रमाणमपि द्विविधमिति भावः ॥ २ ॥

प्रत्यक्षं लक्षयति विभजते च "साक्षात्त्वयोगिविज्ञानम्" इत्यादि।

अक्षार्थसन्निकर्षोत्थं विज्ञानं लौकिकं विदुः।
तदेवालौकिकं यत् स्यात् सन्निकर्षादलौकिकात् ॥ ४ ॥
सविकल्पं निर्विकल्पम् इत्यप्याद्यं द्विधा मतम्।
शुक्लोऽयं घट इत्यादि सविकल्पकमुच्यते ॥ ५ ॥
प्रकारतादिरहितं यज्ज्ञानन्तु विशृङ्खलम्।
घटादीनां निर्विकल्पं तदिष्टं तदतीन्द्रियम् ॥ ६ ॥

'तत्' प्रत्यक्षं 'विचक्षणाः' लौकिकालौकिकभेदेन द्विविधमाहुरित्यर्थः ॥ ३ ॥

लौकिकमलौकिकञ्च क्रमेण लक्षयति "अक्षार्थसन्निकर्षोत्थम्" इत्यादि। अक्षाणि इन्द्रियाणि, अर्थाः विषयाः। इन्द्रियविषयसन्निकर्षजन्यं विज्ञानं लौकिकमित्यर्थः। "तदेव" इत्यादि। 'तदेव' अक्षार्थसन्निकर्षोत्थं विज्ञानमेव, अलौकिकसन्निकर्षजम्, अलौकिकं स्यादित्यर्थः। अर्थात् लौकिकसन्निकर्षजं लौकिकमिति द्रष्टव्यम्। तथाच सन्निकर्षस्य लौकिकालौकिकतया तज्जन्यविज्ञानस्यापि लौकिकालौकिकत्वं विवेक्तव्यम् ॥ ४ ॥

"सविकल्पं निर्विकल्पम्" इत्यादि। 'आद्यं' लौकिकम्। अलौकिकन्तु सविकल्पकमेवेति भावः ॥ ५ ॥

"प्रकारतादिरहितम्" इत्यादि। 'घटादीनां' 'विशृंखलं' प्रकारताद्यनवगाहि (घटघटत्वे इत्याकारकं) 'यत्' 'ज्ञानम्' अस्ति, 'तत्' 'निर्विकल्पम्' 'इष्टं' तच्च अतीन्द्रियमित्यर्थः ॥ ६ ॥

सविकल्पकमेतस्य लिङ्गमाहुर्मनीषिणः।
विशेषणज्ञानजं हि विशिष्टज्ञानमिष्यते ॥ ७ ॥
सौगतप्रमुखास्त्वाहुर्न मानं सविकल्पकम्।
अर्थानामभिलापेन कुतः सम्बन्धसम्भवः ?।
ज्ञानं घटः पट इति येन नामानुरञ्जितम् ॥ ८ ॥
न वा जात्यादि किञ्चित् सद्-विद्यते परमार्थतः।
येनेन्द्रियेण गृह्येत तद्वैशिष्ट्यं घटादिषु ॥ ९ ॥
सतः स्वलक्षणस्यापि सम्बन्धो नासता सह।

अतीन्द्रियत्वे तदभ्युपगमे किं प्रमाणमित्यत आह,—"सविकल्पकमेतस्य" इत्यादि। तल्लिङ्गत्वमुपपादयति "विशेषणज्ञानजं हि" इति। विशिष्टज्ञाने हि विशेषणज्ञानं कारणं, सविकल्पकञ्च विशिष्टज्ञानम्, अतस्तत्रापि विशेषणज्ञानेन भवितव्यम्, अतो निर्विकल्पक-घटत्वादिज्ञानमेव विशेषणज्ञानमिति भावः ॥७॥

सौगतादीनां मतं निरसितुमुत्थापयति "सौगतप्रमुखास्त्वाहुः" इत्यादि। सविकल्पकस्याप्रामाण्ये क्रमेण हेतुमाह,—"अर्थानाम्" इत्यादि। 'अभिलापेन' नाम्ना। तथाच विषयाणां नाम्ना सम्बन्धाभावात् घट इति नामानुरञ्जितं ज्ञानं न प्रमाणमिति भावः ॥८॥

किञ्च "न वा जात्यादि" इत्यादि। जात्यादिकिञ्चिदपि परमार्थ-सत् नास्ति, तथाच कुतः घटादिषु जात्यादिवैशिष्ट्यमिन्द्रियग्राह्यं भवतु, येन जात्याद्युल्लेखितज्ञानं प्रमाणं स्यादिति भावः ॥ ९ ॥

न चासदिन्द्रियग्राह्यं नैवं व्याप्तेरनिश्चयात् ॥ १० ॥
चाक्षुषप्रत्ययेऽप्यस्ति नामवैशिष्ट्यसम्भवः ।
तस्योपनीतभानन्तु चन्दनं सुरभीतिवत् ॥ ११ ॥
यद्वा न भासते संज्ञा-वैशिष्ट्यं तत्र किन्त्वसौ ।
स्मृत्या व्यावर्त्तयत्यर्थं अभावप्रत्यये यथा ॥ १२ ॥

किञ्च "सतः खलक्षणस्यापि" इत्यादि। 'असता' जात्यादिना, 'स्वलक्षणस्य' 'सतः' घटादेः सम्बन्धोऽपि नास्ति, असत्त्वादेव सम्बन्धायोगादित्यभिप्रायः। "न चासत्" इति। नापि 'असत्' परमार्थतोऽविद्यमानं जात्यादि, 'इन्द्रियग्राह्यं' भवति, असत्त्वादेवेत्यर्थः। तथाच विशिष्टज्ञानस्यालीकालम्बनतया अभिलापयोग्यसंसर्गप्रतिभासत्वेनाप्रामाण्यमिति भावः। तदेतन्मतं दूषयति "नैवं व्याप्तेरनिश्चयात्" इति। अभिलापसंसर्गयोग्यप्रतिभासत्वमप्रामाण्यव्याप्यमित्यत्र सन्देहादित्यर्थः। इन्द्रियार्थसन्निकर्षजत्वेन निर्विकल्पकवत् तस्यापि प्रामाण्यमित्यभिप्रायः ॥ १० ॥

बाधकमुद्धरति "चाक्षुषप्रत्ययेऽप्यस्ति" इत्यादिना। कुतश्चाक्षुषप्रत्यये नाम वैशिष्ट्यसम्भव इत्यत आह,—"तस्योपनीतभानन्तु" इत्यादि। सुरभिचन्दनमिति चाक्षुषप्रत्यये यथा सौरभस्योपनीतभानं, तथा घट इत्यादिचाक्षुषप्रत्ययेऽपि 'तस्य' नाम्नः, उपनीतभानमस्तु इत्यर्थः ॥ ११ ॥

"यद्वा न भासते" इत्यादि। अथवा 'तत्र' चाक्षुषप्रत्यये 'संज्ञा-

प्रतियोग्यत्र सामान्यादिकञ्च परमार्थ-सत् ।
प्रसाधयिष्यते तस्मात् प्रमाणं तदपीष्यताम् ॥ १३ ॥
द्रव्यापेक्षं गुणापेक्षं कर्म्मापेक्षञ्च कुत्रचित् ।
ज्ञानं द्रव्येषु विज्ञेयं जात्यपेक्षं तथैव च ॥ १४ ॥
नान्योन्यहेतुकाः पूर्वापरीभावे च सत्यपि ।
व्यभिचारात् पटस्तम्भमठकुम्भादिबुद्धयः ॥ १५ ॥
न हेतुफलभावात्तु तत्क्रमः कारणक्रमात् ।

वैशिष्ट्यं' 'न भासते' 'किन्तु' 'असौ' संज्ञा, 'स्मृत्या' स्मरणेन, 'अर्थं' 'व्यावर्त्तयति' । अत्र दृष्टान्तः "अभावप्रत्यये यथा" इत्यादि ॥ १२ ॥

"प्रतियोगि" इति । 'प्रतियोगि' यथा स्मरणेन अभावबुद्धावर्थं व्यावर्त्तयति तथेत्यर्थः । "सामान्यादिकञ्च" इत्यादि । जात्यादिकमपि परमार्थसदेव साधयिष्यते, तस्मात् सविकल्पकमपि प्रमाणमिष्यतामित्यर्थः ॥ १३ ॥

"द्रव्यापेक्षम्" इत्यादि । एतच्च दन्ती, शुक्लः, पाचकः, वृक्षः, इत्येवमादौ क्रमेण बोध्यम् ॥ १४ ॥

ननु घटज्ञानानन्तरं यत्र पटज्ञानं तत्र घटज्ञानस्यापि पटज्ञानं प्रति किं कारणत्वमस्ति? इत्यत्राह, "नान्योन्यहेतुकाः" इत्यादि । सत्यपि पूर्वापरीभावे पटस्तम्भादिबुद्धयो न परस्परहेतुकाः, व्यभिचारादित्यर्थः ॥ १५ ॥

ननु कार्य्यकारणभावाभावे तादृशबुद्धीनां पौर्वापर्य्यं कुत

समूहालम्बना बुद्धिर्यौगपद्ये प्रजायते ॥ १६ ॥
द्रव्यापेक्षं जात्यपेक्षं ज्ञानन्तु गुणकर्मसु ।
अयोग्यद्रव्यगन्धादिप्रत्यक्षेऽप्येतदक्षतम् ॥ १७ ॥
ज्ञानं कर्मगुणापेक्षम् अभावाद् गुणकर्मणाम् ।
गुणकर्मसु नास्त्येव श्वेतत्वात् समवायिनः ।
श्वैत्यबुद्धेश्च बुद्धिः स्यात् श्वेते एते तु कारणे ॥ १८ ॥

इत्यत्राह, "न हेतुफलभावात्तु" इति । 'हेतुफलभावात्' कार्य्य-कारणभावात्, 'तत्क्रमः' तासां बुद्धीनां क्रमः पौर्बापर्य्यं नेत्यर्थः । कुतस्तर्हि क्रम इत्यत्राह, "कारणक्रमात्" इति । स्वस्वकारणक्रमा-देव तत क्रम इत्यर्थः । अतएव यत्र कारणानां यौगपद्यं तत्र युग-पदेव घटपटादिज्ञानमिति दर्शयति, "समूहालम्बना" इत्यादि ॥१६॥

"द्रव्यापेक्षं जात्यपेक्षम्" इत्यादि । गुणकर्मसु यत् ज्ञानं तत् द्रव्यं जातिञ्चापेक्षते । आश्रयमन्तरेण केवलगुणाद्युपलम्भासम्भ-वात्, रूपत्वाद्यनवगाहिरूपादिप्रत्ययासम्भवाच्चेति भावः । वाय्वा-नीतसुरभ्युपलम्भे कथं द्रव्यापेक्षत्वमित्यत्राह, "अयोग्यद्रव्य" इति । तत्राप्ययोग्यमेव द्रव्यं सन्निकर्षघटकमिति द्रव्यापेक्षत्वं, तत्राप्यक्ष-तमेवेत्यर्थः ॥ १७ ॥

"ज्ञानं कर्मगुणापेक्षम्" इत्यादि । 'गुणकर्मसु' 'गुणकर्मणाम्' 'अभावात्' गुणकर्मापेक्षं ज्ञानं तत्र नास्तीत्यर्थः । "श्वेतत्वात् समवायिनः" इत्यादि । 'समवायिनः' अर्थात् श्वैत्यसमवायिनः, 'श्वेतत्वात्' समवायसम्बन्धेन श्वैत्यवत्त्वात्, 'श्वैत्यबुद्धेश्च' 'श्वेते' श्वैत्य-

एनं भोजय शाल्यन्नम् अयमेष त्वया कृतम् ।
बुद्ध्यपेक्षमिदं बुद्धि-विषयेषूपलम्भनात् ॥ १९ ॥
अज्ञाते व्यवहारस्तु विषये नास्ति तादृशः ।
अन्वयव्यतिरेकाभ्याम् एवैतदवगम्यते ॥ २० ॥
समस्तानि तु कर्माणि गुणाः संख्यादयस्तथा ।
योग्यद्रव्यगतान्येव गृह्यन्ते काश्यपे मते ॥ २१ ॥
यत्सामान्यविशेषेषु ज्ञानं तत् तत एव हि ।
सामान्यं वा विशेषो वा यतस्तेषु न विद्यते ॥ २२ ॥
येनेन्द्रियेण यत्किञ्चिद् वस्तुसाक्षात् कृतं भवेत् ।
तेनैव तदभावोऽपि तद्धर्मोऽपीति निश्चयः ॥ २३ ॥

युक्ते वस्तुनि, 'बुद्धिः' प्रत्यक्षं, 'स्यात्' इत्यर्थः । तत्र च, 'एते' समवायसम्बन्धेन श्वैत्यवत्त्वं, श्वेतत्वबुद्धिश्च, 'कारणे' इत्यर्थः ॥ १८ ॥

"एनं भोजयशाल्यन्नम्" इत्यादि । 'एनम्' इति इदं शब्दसमानार्थक 'एन' शब्दः, 'अयम्' इत्यत्रेदम् शब्दश्च प्रत्यक्षविषये शक्तः, इति बुद्धिविशेषणिकैव तादृशधीरिति भावः । 'एषः' इति एतत् शब्दोऽपि बुद्ध्यारूढे शक्त इति तद् बुद्धिरपि बुद्धिविशेषणिकैव । 'त्वया कृतम्' इत्यपि युष्मच्छब्दस्य स्वजन्यबोधाश्रयतया वक्तुरभिप्रायविषये शक्तत्वात् बुद्धिविशेषणकमेवेति द्रष्टव्यम् ॥ १९ ॥

"यत्सामान्यविशेषेषु" इत्यादि । सामान्यादिज्ञाने सामान्याद्यन्तरापेक्षा नास्ति । तत्र हेतुः "सामान्यं वा" इत्यादि ॥ २२ ॥

तत्र चेन्द्रियसंयोगात् द्रव्याणां स्यादिह ग्रहः ।
संयुक्तसमवायेन द्रव्यत्वगुणकर्म्मणाम् ॥ २४ ॥
एषैव रीतिरेष्टव्या चितित्वादिग्रहेष्वपि ।
संयुक्तसमवेतेषु समवायेन गृह्यते ॥ २५ ॥
गुणत्वादि तथाशब्दः समवायेन केवलम् ।
समवेतेषु शब्देषु समवायेन गृह्यते ॥ २६ ॥
शब्दत्व-कत्व-खत्वादि प्रत्यचमसतां पुनः ॥ २७ ॥
भवेदिन्द्रियसम्बन्ध-विशेषणतया परम् ।
प्रतीतेः पूर्वमप्येषा विद्यतेऽतो न दूषणम् ॥ २८ ॥
इदानीं कश्चिदध्यचे विशेषः प्रतिपाद्यते ।
आलोकसहकारेण चचुरध्यचकारणम् ।

इदानीं केन सन्निकर्षेण कस्य प्रत्यचमित्येतदाह, "तत्र चेन्द्रियसंयोगात्" इत्यादि ॥ २४ ॥

"प्रत्यचमसतां पुनः" इति । असताम् अभावानाम् ॥ २७ ॥

"भवेदिन्द्रियसम्बन्ध" इत्यादि । 'परं' केवलम्, इन्द्रियसम्बन्धविशेषणता सम्बन्धेन असतां प्रत्यचं भवेदिति पूर्वेण सम्बन्धः। अथैवमन्योन्याश्रयः, यतो विशेषणतायां सत्यां प्रत्यचं, तस्मिंश्च सति विशेषणता इत्यत्राह, "प्रतीतेः" इत्यादि । 'विद्यते' इति तदुभयस्वरूपस्यैव विशेषणतात्वादिति भावः ॥ २८ ॥

तमस्यवस्थितं तस्मान्न किञ्चित् चक्षुषेच्यते ॥ २९ ॥
द्रव्याणां संस्कृताद्रूपात् महत्त्वाद्बहिरक्षजम् ।
अनेकद्रव्यवत्त्वाच्च प्रत्यक्षं खलु जायते ॥ ३० ॥
महत्त्वेनान्यथासिद्धिर् अनेकद्रव्यवत्त्वगा ।
अपि तद्वैपरीत्यस्य सम्भवात् तन्न शोभनम् ॥ ३१ ॥
जनकस्यान्यथासिद्धिर्जन्येनान्यस्य नान्यतः ।
इति चेत् युगपत् यस्मिन् अन्वयव्यतिरेकयोः ।
ग्रहस्तत्रान्यथासिद्धिरेकस्यापि न साम्प्रतम् ॥ ३२ ॥

"द्रव्याणां संस्कृताद्रूपात्" इत्यादि। संस्कारस्य उद्भवोऽनभिभवश्चेत्यनुपदमेव व्यक्तीभविष्यति। तथाच वहिरिन्द्रियजन्यद्रव्यप्रत्यक्षं प्रति, संस्कृतरूपं, महत्त्वम् अनेकद्रव्यवत्वञ्च कारणमित्यर्थः ॥ ३० ॥

अनेकद्रव्यवत्त्वस्य कारणत्वमाक्षिपति "महत्त्वेनान्यथासिद्धिः" इति। तथाचानेकद्रव्यवत्त्वं महत्त्वेनान्यथासिद्धमिति न तस्य कारणत्वमिति भावः। समाधत्ते "अपि तद्वैपरीत्यस्य" इति। तथाच महत्त्वेनानेकद्रव्यवत्त्वस्यान्यथासिद्धिवत् अनेकद्रव्यत्त्वेन महत्त्वस्यान्यथासिद्धिरित्यपि वक्तुं शक्यते इत्यर्थः ॥ ३१ ॥

पुनः शङ्कते "जनकस्यान्यथासिद्धिः" इति। अनेकद्रव्यवत्त्वं हि महत्त्वप्रयोजकं, तथाच महत्त्वेनैव तस्यान्यथासिद्धिरुचिता, कुलालेन कुलालजनकस्येव इत्यभिप्रायः। 'अन्यस्य' जनस्य। 'अन्यतः'

महत्त्वोत्कर्षतो यत्र प्रत्यक्षोत्कर्ष ईक्ष्यते।
अनेकद्रव्यवत्त्वस्य तत्रोत्कर्षोऽपि सम्भवेत्॥ ३३॥
लुतातन्तुभवं जालमप्युत्कृष्टमहत्त्ववत्।
द्विहस्तादिमितं दूरान्न प्रत्यक्षं प्रतीयते॥ ३४॥
अनेकद्रव्यवत्त्वस्य विशेषादेव दृश्यता।
लुतामात्रस्य तत्रापि चिन्त्यमन्यन्मनीषिभिः॥ ३५॥
तस्मात् प्रमाणसिद्धत्वादेतस्याप्यस्तु हेतुता।
प्रामाणिकं गौरवं हि नाचार्य्या दोषमूचिरे॥ ३६॥

जनकेन। समाधत्ते "इति चेत्" इति। यत्र जन्यजनकयोरुभयोरपि युगपदन्वयव्यतिरेकौ गृह्येते, तत्र कस्यापि अन्यथासिद्धिर्न युज्यते। विपक्षे बाधकमाह, "अन्यथा ला प्रसज्येत" इति। 'सा' अन्यथासिद्धिः। तथाच युगपदन्वयव्यतिरेकग्रहेऽपि अन्यथासिद्ध्यभ्युपगमे दण्डादिकारणतापि न स्यादित्यर्थः॥ ३२॥

ननु दूरादौ महत्त्वोत्कर्षतः प्रत्यक्षोत्कर्षदर्शनात् महत्त्वमेव कारणमित्याशङ्क्य महत्त्वोत्कर्षस्थलेऽनेकद्रव्यवत्त्वोत्कर्षस्यापि सम्भवात् विनिगमनाभावात् इत्याह, "महत्त्वोत्कर्षतो यत्र" इत्यादि॥३३॥

इदानीम् अनेकद्रव्यवत्त्वोत्कर्षाधीनं प्रत्यक्षमाह, "लुतातन्तुभवं जालम्" इत्यादिश्लोकद्वयेन॥ ३४॥ ३५॥

उपसंहरति,—"तस्मात् प्रमाणसिद्धत्वात्" इति। 'एतस्य' अनेकद्रव्यवत्त्वस्य॥ ३६॥

प्रतीकद्वयसम्पन्ना येऽपि साक्षात् घटादयः ।
ते परम्परयानेकद्रव्यवन्तो भवन्त्यपि ॥ ३७ ॥
महत्त्वविरहादेव परमाणोरदृश्यता ।
तथा रूपोद्भवाभावाच्चाक्षुषोंऽशुर्न दृश्यते ॥ ३८ ॥
नास्ति मध्यन्दिनोल्कायां रूपानभिभवः पुनः ॥ ३९ ॥
रूपाभावादनध्यक्षः पवनो गगनादिवत् ।
अन्यत्रोपाधिसद्भावात् नास्ति सत्प्रतिपक्षता ॥ ४० ॥
केवलस्य तु साध्यस्याव्यापकत्वेऽपि न क्षतिः ।

अथानेकद्रव्यवत्त्वस्य प्रत्यक्षहेतुत्वे साक्षादवयवद्वयारब्धानां घटादीनां कथं प्रत्यक्षता ? इत्यत्राह, "प्रतीकद्वयसम्पन्नाः" इति । 'प्रतीकद्वयसम्पन्नाः' अवयवद्वयसम्पन्नाः ॥ ३७ ॥

"नास्ति मध्यन्दिनोल्कायाम्" इति । सौरतेजोभिरभिभवादिति भावः ॥ ३९ ॥

"रूपाभावादनध्यक्षः" इत्यादि । तथाच वायुर्न प्रत्यक्षः नीरूपवद्द्रव्यत्वात् गगनवदित्यनुमानात् वायोरप्रत्यक्षत्वमिति भावः । ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् घटवदिति सत्प्रतिपक्षता ? इत्यत्राह, "अन्यत्र" इति । 'अन्यत्र' वायुः प्रत्यक्ष इत्युक्तानुमाने । 'उपाधिसद्भावात्' इति । तथाच उद्भूतरूपवत्त्वं तत्रोपाधिरिति भावः ॥ ४० ॥

रूपादावात्मनि च साध्याव्यापकत्वादुद्भूतरूपवत्त्वस्य कथमुपा-

पक्षसाधनधर्माभ्याम् अवच्छिन्नस्य तत्त्वतः ॥ ४१ ॥
सर्वत्ररूपसद्भावात् तद्विना स्पर्शमात्रतः ।
प्रत्यक्षादर्शनात् नास्ति तत्र तस्यापि हेतुता ॥ ४२ ॥
एवञ्च सति लोकानां चान्द्रालोके विहायसि ।
पक्षिकाण्डादिसंयोग-वियोगाध्यक्षता भवेत् ॥ ४३ ॥
स्पर्शस्य हेतुतायान्तु प्रभाऽनध्यक्षतामियात् ।

धित्वमित्यत्राह, "केवलस्य" इत्यादि। तथाच केवलसाध्याव्यापकत्वेऽपि पक्षधर्मवह्निद्रव्यत्वावच्छिन्नस्य, साधनधर्मप्रत्यक्षस्पर्शावच्छिन्नस्य वा, साध्यस्य व्यापकत्वादुपाधित्वम् इत्यर्थः। 'तत्त्वतः' व्यापकत्वात् ॥ ४१ ॥

ननु चाक्षुषस्पर्श एव रूपवत्त्वं तन्त्रं तत्रैव तदन्वयव्यतिरेकानुविधानस्योपलम्भात्, स्पर्शेन प्रत्यक्षे तु उद्भूतस्पर्शवत्त्वमात्रमेव प्रयोजकमस्तु इत्याशङ्क्याह, "सर्वत्र रूपसद्भावात्" इति। तथाच स्पर्शेन प्रत्यक्षस्थलेऽपि रूपस्य विद्यमानत्वात्, तत्र तत्कारणताऽभावो न भवितुमर्हति विनिगमनाविरहादिति भावः। अथास्तु स्पर्शस्यापि हेतुता ? इत्यत्राह, "तद्विना स्पर्शमात्रतः" इत्यादि। 'तद्विना' रूपं विना। तथाच रूपान्वयव्यतिरेकानुविधायित्वात् रूपस्यैव हेतुतेति भावः ॥ ४२ ॥

"एवञ्च सति लोकानाम्" इत्यादि। 'एवञ्च सति' रूपस्य हेतुत्वे सति। 'वियोगो' विभागः। स्पर्शस्य हेतुत्वे तु चान्द्रालोकस्य उद्भूतस्पर्शाभावात् नैतदुपपद्यते इति भावः ॥ ४३ ॥

तथात्वे तूपरित्वेन इत्यध्यत्वं न सम्भवेत् ॥ ४४ ॥
यद्यध्यक्षो भवेद्वायुस्तदा घटपटादिवत् ।
तत्सङ्ख्याद्युपलम्भेऽपि कथमस्य न तत्त्वता ॥ ४५ ॥
फुत्कारादिषु सङ्ख्यादेः प्रत्यक्षत्वेऽपि केषुचित् ।
नियमो नास्ति सर्वासु व्यक्तिष्वनुपलम्भनात् ॥ ४६ ॥
गृह्यते स्वच्छवस्त्राने पृष्ठलग्नेऽपि वस्तुनि ।

स्पर्शस्य हेतुत्वे दोषान्तरमाह, "स्पर्शस्य हेतुतायान्तु" इति । अथ प्रभाया अप्रत्यक्षत्वे इष्टापत्तिरित्यत्राह, "तथात्वे" इति । "न सम्भवेत्" इति । प्रभाया एवोपरिदेशत्वादिति भावः ॥ ४४ ॥

वायोः प्रत्यक्षत्वे दोषमाह, "यद्यध्यक्षो भवेद् वायुः" इत्यादि । वायुर्यदि प्रत्यक्षः स्यात् तदा घटादिवत् तदीयसङ्ख्याद्युपलम्भेऽपि तत्त्वं स्यात्, न चैवं, तस्मान्न प्रत्यक्ष इति भावः ॥ ४५ ॥

ननु वायुगतसङ्ख्यादिप्रतीतिरप्यस्त्येव, तथाहि फुत्कारादौ सङ्ख्या तावदुपलभ्यत एव । एकः फुत्कारः, द्वौ फुत्काराविल्यादिप्रतीतिः । फुत्कारादिस्थले परिमाणमपि हस्तवितस्त्यादिरूपं गृह्यत एव, एवमुभयपार्श्वगतयोर्वाय्वोः पृथक्त्वमपि गृह्यते, एवं वायुगतपरत्वापरत्वयोरपि प्रत्यक्षता, इत्यत्राह, "फुत्कारादिषु सङ्ख्यादेः" इत्यादि । फुत्कारादिषु केषुचित् स्थलेषु सङ्ख्यादेः प्रत्यक्षत्वेऽपि न नियमेन वायुगतसङ्ख्यादिप्रत्यक्षं सर्वासु वायुव्यक्तिषु तदनुपलम्भात् । वायोः प्रत्यक्षत्वे तु कुत्राप्यनुपलम्भो न स्यादिति भावः ॥ ४६ ॥

सङ्ख्याद्यनार्जवावस्थादोषादेव तदग्रहः ॥ ४७ ॥
प्रत्यक्षत्वेऽपि धर्मस्य धर्मिणस्तन्न विद्यते ।
नैतद्विचित्रमन्यत्राप्येतादृगुपलम्भनात् ॥ ४८ ॥
अन्ये प्रत्यक्षमिच्छन्ति पवनस्यापि सूरयः ।
वदन्ति हेतुतां ते तु स्पर्शस्य स्पार्शनम्प्रति ॥ ४९ ॥
विद्यमानेऽपि रूपेऽतः स्पार्शनं नैव जायते ।

ननु व्यक्तिपरतया नियम एव नास्ति, येन वायोः प्रत्यक्षत्वे सर्वत्रैव सङ्ख्यादिग्रहापत्तिः, अपि तु जातिपरतयैव नियमः। वायुजातीयस्य च सङ्ख्याद्युपलम्भः प्रागेव दर्शितः इति नानुपपत्तिः। कथमन्यथा उभयवादिसिद्धप्रत्यक्षेऽपि एकलग्नवस्त्रादौ सङ्ख्यादेरनुपलम्भः, इत्याशङ्क्य व्यक्तिपरतयैव नियम इत्यभिप्रायेणाह, "गृह्यते ऋज्ववस्थाने" इत्यादि ॥ ४७ ॥

ननु वायुधर्मस्य स्पर्शस्य प्रत्यक्षत्वे धर्मिणो वायोः, प्रत्यक्षत्वाभाव इति कथमुपपद्यते ? इत्यत्राह, "प्रत्यक्षत्वेऽपि धर्मस्य" इत्यादि। 'तत्' प्रत्यक्षत्वम्। 'अन्यत्र' गगने, तत्र हि धर्मस्य शब्दस्य श्रावणप्रत्यक्षविषयत्वेऽपि धर्मिणो गगनस्याप्रत्यक्षत्वमुभयवादिसिद्धमिति भावः ॥ ४८ ॥

"अन्ये प्रत्यक्षमिच्छन्ति" इति। स्पर्शस्यैवेत्यर्थः। सर्वं वाक्यं सावधारणमिति न्यायात्। तथाच स्पार्शनप्रत्यक्षे स्पर्शस्यैव कारणत्वं, न रूपस्यापीति तेषामाशयः ॥ ४९ ॥

प्रभायास्तद्गतानाञ्च गुणादीनां कथञ्च न ॥ ५० ॥
आत्मनो मानसं योग्य-विशेषगुणयोगतः ।
अहं सुखीत्येवमादि केवलस्य न जातुचित् ॥ ५१ ॥
रूप-गन्ध-रस-स्पर्शशब्दसंज्ञास्तु ये गुणाः ।
वाह्यैकैकेन्द्रियग्राह्यास्ते सर्वे परिकीर्त्तिताः ॥ ५२ ॥
चक्षुषा गृह्यते रूपं गन्धो घ्राणेन गृह्यते ।
रसो रसनया स्पर्शस्त्वचा श्रोत्रेण चान्तिमः ॥ ५३ ॥
अनेकद्रव्यवृत्तित्वात् तथा रूपविशेषतः ।
रूपाणामुपलब्धिस्तदणुरूपेषु नास्ति सा ॥ ५४ ॥

स्पार्शनप्रत्यक्षे स्पर्शस्य कारणतां समर्थयति, "विद्यमानेऽपि" इति । योग्यविशेषगुणाः सुखादयः ॥ ५० ॥

"आत्मनो मानसम्" इति । अहं सुखी इत्याद्याकारकम् आत्मनो मानसमिति पूर्बेणान्वयः । केवलस्य आत्मनः 'जातुचित्' कदाचिन्न मानसमित्यर्थः । तथाच योग्यविशेषगुणयोगेनैवात्मनः प्रत्यक्षं, न तु केवलम् अहमित्याकारकमिति भावः ॥ ५१ ॥

इदानीं रूपप्रत्यक्षे विशेषमाह, "अनेकद्रव्यवृत्तित्वात्" इति । अनेकद्रव्यसमवायादित्यर्थः । "रूपविशेषतः" इति । रूपगतो यो विशेषस्तस्मादित्यर्थः । तद्गतविशेषश्च उद्भूतत्वम्, अनभिभूतत्वं, रूपत्वञ्च । "तदणुरूपेषु नास्ति" इति । 'तत्' तस्मात्, 'अणुरूपेषु' 'सा' उपलब्धिः, 'नास्ति' इत्यर्थः । एवं चाक्षुषस्य रूपस्योद्भवा-

तथा गन्धे रसे स्पर्शे तद्विशेषवशाद् ग्रहः ।
तदभावान्न गृह्यन्ते सन्तोऽप्येते क्वचित् क्वचित् ॥ ५५ ॥
तदेवं हेतुतैतेषां वाह्यैकैकेन्द्रियग्रहे ।
ततो गुरुत्वं नाध्यक्षं स्पार्शनं केचिदूचिरे ॥ ५६ ॥
अतीन्द्रियगुरुत्वादेः प्रतिबन्धकताथ वा ।
प्रत्यक्षे कल्प्यते तेषां तत्त्वमस्ति स्वभावतः ॥ ५७ ॥

भावात् सुवर्णशुक्लरूपादेस्तानभिभवाभावात् न प्रत्यक्षत्वम् । सुवर्ण-प्रत्यक्षन्तु रूपान्तरेणापीत्यनुसन्धेयम् ॥ ५४ ॥

"तथा गन्धे रसे स्पर्शे" इत्यादि । "तद्विशेषवशात् ग्रहः" इति 'तद्विशेषः' उद्भूतत्वम्, अनभिभूतत्वं, गन्धत्वादिकञ्च ॥ ५५ ॥

उपसंहरति,—"तदेवं हेतुतैतेषाम्" इति । 'एतेषां' रूपत्वादीनाम् । तथाच वाह्यैकैकेन्द्रियग्राह्यत्वं प्रतिरूपत्वादीनां पञ्चानां जातीनामन्यतमस्य कारणत्वम् इति भावः । एवञ्च रूपत्वाद्यभावात् गुरुत्वस्य न प्रत्यक्षता इत्याह, "ततो गुरुत्वम्" इति । 'ततः' तस्मात् ॥ ५६ ॥

"अतीन्द्रियगुरुत्वादेः" इत्यादिलिखितश्लोकस्यायमर्थः । अथवा लौकिकप्रत्यक्षसामान्यं प्रत्येव अतीन्द्रियगुरुत्वादिगुणानां गुरुत्वत्वादिरूपेण प्रतिबन्धकता कल्प्यते । कुतो गुरुत्वादीनामतीन्द्रियत्वमित्यत्राह, "तेषाम्" इत्यादि । 'तेषां' गुरुत्वादीनाम् । 'तत्त्वम्' अतीन्द्रियत्वम् । स्वभावत एवेत्यर्थः ॥ ५७ ॥

द्रवत्वसंयोगविभागवेगाः
परापरत्वे परिमाणसङ्ख्याः।
स्नेहः पृथक्त्वं खलु रूपिवृत्तेः
स्याच्चाक्षुषं स्पार्शनमप्यमीषाम् ॥ ५८ ॥

बुद्धिप्रभृतियत्नान्त-गुणानां मानसं विदुः।
निर्विकल्पादृते ज्ञानात् यत्नाज्जीवनकारणात् ॥ ५९ ॥

एकत्वमात्मनो यच्च महत्त्वं परमञ्च यत्।
तयोर्मानसमिच्छन्ति केचित् नेच्छन्ति केचन ॥ ६० ॥

कर्मणाञ्चापि जातीनां पूर्ववच्चाक्षुषादिकम्।
विप्पष्टा चलतीत्येषा प्रतीतिः सार्वलौकिकी ॥ ६१ ॥

"द्रवत्वसंयोगविभागवेगाः" इत्यादि। 'रूपिवृत्तेः' रूपवत्-द्रव्यवृत्तेः ॥ ५८ ॥

"बुद्धिप्रभृति" इत्यादि। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानाम्। निर्विकल्पं ज्ञानं जीवनयोनियत्नञ्च विनेत्यर्थः। तयोरतीन्द्रियत्वादिति भावः ॥ ५९ ॥

"एकत्वम्" इत्यादि। आत्मन एकत्वस्य आत्मनः परममहत्परिमाणस्य च मानसं केचिदिच्छन्ति, केचिन्नेच्छन्तीत्यर्थः ॥ ६० ॥

"कर्मणाञ्चापि जातीनां पूर्ववत् चाक्षुषादिकम्" इति। 'पूर्व-वत्' इत्यनेन तदाश्रयस्य रूपवत्त्वादिकमतिदिश्यते। 'चाक्षुषादि-

तथा सर्वेन्द्रियग्राह्यसमवायान्महर्षिणा ।
सत्तागुणत्वयोर्ज्ञानं सार्वेन्द्रियमुदीरितम् ॥ ६२ ॥

साक्षात्कारे त्वभावस्य स्मरणं तद्विरोधिनः ।
वदन्ति कारणं योग्यानुपलम्भनमेव च ॥ ६३ ॥

वक्ष्यमाणस्य तर्कस्य तत्रास्ति सहकारिता ।

कम्' इत्यादिपदात् स्पार्शनादिग्रहः । तथाच कर्मणां चाक्षुषं स्पार्शनञ्च, जातीनाञ्च कासाञ्चित चाक्षुषं यथा रूपत्वादीनां, कासाञ्चित् घ्राणजं यथा गन्धत्वादीनाम्, इत्याद्यनुसन्धेयम् । कर्मणां प्रत्यक्षत्वं नास्तीति प्राभाकराः । तान् प्रत्याह, "विस्पष्टा चलतीत्येषा" इत्यादि ॥ ६१ ॥

"तथा सर्वेन्द्रियग्राह्यसमवायात्" इत्यादि । तथाच घ्राणग्राह्ये गन्धे रसनाग्राह्ये रसे, चक्षुर्ग्राह्ये रूपादौ, त्वगिन्द्रियग्राह्ये स्पर्शादौ, श्रोत्रग्राह्ये शब्दे, मनोग्राह्ये बुद्ध्यादौ च, सत्तागुणत्वयोः समवायात् आश्रयाणाञ्च यथायथं सर्वेन्द्रियग्राह्यत्वात्, तयोरपि सुतरां सर्वेन्द्रियग्राह्यतेति भावः ॥ ६२ ॥

"साक्षात्कारे त्वभावस्य" इत्यादि । 'तद्विरोधिनः' अभावविरोधिनः, प्रतियोगिन इति यावत् । 'योग्यानुपलम्भनं' 'योग्यस्य' प्रत्यक्षयोग्यस्य, प्रतियोगिनः । 'अनुपलम्भनम्' उपलब्ध्यभावः । तथाचाभावप्रत्यक्षं प्रति प्रतियोगिस्मृतिः, योग्यानुपलब्धिश्च कारणमित्यर्थः ॥ ६३ ॥

सुतरां तत्र नाध्यक्षं यत्र नावतरत्यसौ ॥ ६४ ॥
यद्यत्र भूतले कश्चिद्घटः स्यात् प्रतिपन्नवत्।
उपलभ्येत न त्वेवं तस्मान्नास्तीति शिष्यते ॥ ६५ ॥
प्रागभावोऽन्यसामग्रीव्यङ्ग्यः प्रोक्तो मनीषिभिः।
अनादित्वेऽप्यतस्तस्य प्रत्यक्षं नास्ति सर्वदा ॥ ६६ ॥
विरोधियोग्यतापेक्षा भेदाध्यक्षे न विद्यते।
आधारयोग्यतामात्रं तत्रापेक्ष्यं प्रचक्षते ॥ ६७ ॥
स्तम्भः पिशाचो नेत्येवं स्तम्भादौ योग्यवस्तुनि।
पिशाचादेरयोग्यस्य भेदः प्रत्यक्षमीक्ष्यते ॥ ६८ ॥
अलौकिकः सन्निकर्षस्त्वेकः सामान्यलक्षणः।

"वक्ष्यमाणस्य तर्कस्य तत्रास्ति सहकारिता" इत्यादि। 'तत्र' अभावप्रत्यक्षे। 'असौ' तर्कः ॥ ६४ ॥

तं तर्कमाह, "यद्यत्र भूतले कश्चित्" इत्यादि। 'प्रतिपन्नवत्' उपलब्धभूतलवत्। 'न त्वेवं' न तु उपलभ्यते। तथाचान्धकारे तादृशतर्कासम्भवात् तत्र घटाभावस्य न चाक्षुषं, स्पार्शनन्तु तत्रापि भवत्येव, तत्र तादृशतर्कावतारसम्भवात् इत्यनुसन्धेयम् ॥ ६५ ॥

अन्योन्याभावप्रत्यक्षे विशेषमाह, "विरोधियोग्यतापेक्षा" इत्यादि। अन्योन्याभावप्रत्यक्षे अधिकरणयोग्यतैव तन्त्रं न प्रतियोगियोग्यतापीत्यर्थः। तथाचान्योन्याभावप्रत्यक्षे प्रतियोगिस्मृतिः, प्रतियोग्यनुपलब्धिः अधिकरणयोग्यता च कारणमिति भावः ॥ ६७ ॥

ज्ञानलक्षणकश्चान्यः परो योगज उच्यते ॥ ६९ ॥

यं कञ्चिद्घटमालम्ब्य घटत्वेऽक्षसमागमे ।

तदाश्रयेषु सर्वेषु ज्ञानं सामान्यलक्षणात् ॥ ७० ॥

चन्दनं सुरभीत्यादौ ज्ञानलक्षणतः पुनः ।

प्रत्यक्षं सौरभस्याङ्गस्विन्त्यमन्यन्मनीषिभिः ॥ ७१ ॥

रज्जुसर्पादिबोधेऽपि सर्पत्वादेरुपस्थितिः ।

एवमेव, यतस्तस्मिन् न चक्षुः सन्निकृष्यते ॥ ७२ ॥

लौकिकप्रत्यक्षमभिधायेदानीमलौकिकं प्रत्यक्षमभिधीयते । तत्र तावदलौकिकसन्निकर्षस्य 'सामान्यलक्षण-ज्ञानलक्षण-योगज'-भेदात् त्रैविध्यमाह, "अलौकिकः सन्निकर्षः" इत्यादि ॥ ६९ ॥

"यं कञ्चिद् घटमालम्ब्य" इत्यादि । यथा च यं कमपि घटमवलम्ब्य घटत्वेन सममिन्द्रियसम्बन्धे जाते, घटत्ववतीनां सर्वासां व्यक्तीनां ज्ञानं, सामान्यलक्षणसन्निकर्षजन्यमित्यर्थः । अत्र जातिरेव तदाश्रयप्रत्यक्षे सन्निकर्ष इति द्रष्टव्यम् ॥ ७० ॥

"चन्दनं सुरभीत्यादौ" इत्यादि । सुरभि चन्दनमित्यादिप्रत्यक्षे ज्ञानलक्षणसन्निकर्षादेव सौरभादेर्भानमिति भावः । अत्र च ज्ञानमेव सन्निकर्षः । तच्च यद्विषयकं तस्यैव सन्निकर्षभावमापद्यते इत्यनुसन्धेयम् ॥ ७१ ॥

भ्रमस्थलेऽपि प्रकारांशभानं ज्ञानलक्षणसन्निकर्षादेवेत्याह, "रज्जुसर्पादिबोधेऽपि" इत्यादि । 'एवमेव' ज्ञानलक्षणसन्निकर्षादेव । 'तस्मिन्' सर्पत्वादौ ॥ ७२ ॥

योगजात् सन्निकर्षाच्च योगिनां सर्ववस्तुषु ।
प्रत्यक्षं जायते ते तु योगिनो द्विविधाः स्मृताः ॥ ७३ ॥
एकेषामात्ममनसोः सन्निकर्षादनन्तरम् ।
चिन्तायामादरात् सत्यां साक्षात् योगजधर्मतः ॥ ७४ ॥
तच्चिन्तामन्तरेणैव त्वलंप्रत्ययशालिनाम् ।
समाधौ, कृतकृत्यानाम् अन्येषामपि योगिनाम् ॥ ७५ ॥
स्वात्मन्यन्यात्मसु द्रव्यान्तरेषु गुणकर्मसु ।
उत्पद्यते तथान्येषु ज्ञानं प्रत्यक्षसंज्ञकम् ॥ ७६ ॥

"योगजात् सन्निकर्षाच्च" इत्यादि । योगाभ्यासजनितो धर्मविशेष एव योगजः सन्निकर्षः । 'सर्ववस्तुषु' अतीन्द्रियेष्वपि ॥ ७३ ॥

"एकेषामात्ममनसोः" इत्यादि । 'एकेषां' युञ्जानानाम् ; 'सन्निकर्षात्' इत्यत्र 'योगजधर्मतः' इति वक्ष्यमाणस्य संबन्धः । तथाच योगजधर्मानुगृहीतेन मनसा आत्मनः संयोगे सति, 'आदरात्' 'चिन्तायां' च, साक्षात् कर्त्तव्यवस्तुविषयिण्यां, सत्यां निदिध्यासने सतीति यावत् । 'प्रत्यक्षसंज्ञकं ज्ञानम् उत्पद्यते' इति तृतीयश्लोकेनान्वयः ॥ ७४ ॥

"तच्चिन्तामन्तरेणैव" इत्यादि । 'समाधौ' ध्याने, 'अलम्प्रत्ययवतां' 'तच्चिन्तामन्तरेणैव' साक्षात् कर्त्तव्यवस्तुविषयकचिन्तां विनैवेत्यर्थः । अस्यापि पूर्ववद् अग्रिमश्लोकेनान्वयः । 'अन्येषां' युक्तानाम् । तथाचैकेषां ध्यानापेक्षा, अन्येषां नेति फलितार्थः ॥ ७५ ॥

अस्माकमप्यात्मबोधः कदाचिदुपलभ्यते ।
अविद्यया तिरस्कारात् असत्कल्पः स सन्नपि ॥ ७७ ॥
अविचिन्त्यप्रभावो हि धर्मो योगज इष्यते ।
सिन्धुपानादिकं तत्र दृष्टान्तो नास्त्यसम्भवः ॥ ७८ ॥
सार्वज्ञ्याभावसाध्यत्वे पुरुषत्वं न साधनम् ।
विपक्षबाधकस्तर्कस्तत्र नास्ति हि कश्चन ॥ ७९ ॥
प्रभाकरो न जानाति मीमांसां पुरुषत्वतः ।
यथाहमित्यमुष्यापि प्रामाण्यं नान्यथा कथम् ॥ ८० ॥

"स्वात्मन्यन्यात्मसु" इत्यादि । 'द्रव्यान्तरेषु' आकाशादिषु, 'अन्येषु' सामान्यविशेषादिषु ॥ ७६ ॥

ननु कथमप्रत्यक्षेषु परात्माकाशादिषु प्रत्यक्षं सम्भवति, परात्मनः परस्यातीन्द्रियत्वात्, वहिर्द्रव्यप्रत्यक्षकारणस्य रूपादेराकाशादिष्वभावाच्च । कथं वा, चक्षुरादिकमनपेक्ष्य मनसा वहिर्विषयग्रहणं "चक्षुराद्युक्तविषयं परतन्त्रं वहिर्मनः" इत्युक्तेः । कथं वा अतीतानागतविषयेषु प्रत्यक्षं, प्रत्यक्षे विषयस्यापि कारणत्वात् । इत्याशङ्क्याह, "अविचिन्त्यप्रभावो हि" इत्यादि ॥ ७८ ॥

नन्वेतावता योगिनः सर्वज्ञत्वमुपपादितं, तच्चानुपपन्नं, विवादाध्यासितः पुरुषो न सर्वज्ञः पुरुषत्वात् अहमिव, इत्यनुमानविरोधादित्याशङ्क्याह, "सार्वज्ञ्याभावसाध्यत्वे" इत्यादि । तथाचोक्तस्थले व्याप्तिरेवाप्रामाणिकीति भावः ॥ ७९ ॥

तादृशानुमानाभ्युपगमे च प्रसिद्धमीमांसकस्यापि प्रभाकरस्य

तेषामप्यात्मवृत्तीनां गुणानां लौकिकं पुनः।
मनः संयोगवत् स्वात्मसमवायाद् विचिन्त्यताम्॥ ८१॥

इति श्रीचन्द्रकान्त-तर्कालङ्कारप्रणीतायां तत्त्वावलौ
प्रमाणपरिचिन्तनाभिधेय-तृतीयपरिच्छेदस्य
प्रथमं प्रकरणम्।

मीमांसानभिज्ञत्वमापद्येत इति सोपहासमाह, "प्रभाकरो न जानाति" इत्यादि॥ ८०॥

अस्माकमिव योगिनामपि आत्मवृत्तिबुद्ध्यादिषु लौकिकमपि प्रत्यक्षं भवतीत्याह, "तेषामप्यात्मवृत्तीनाम्" इत्यादि। 'तेषां' योगिनाम्॥ ८१॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां
प्रमाणपरिचिन्तननामकतृतीयपरिच्छेदस्य
प्रथमप्रकरणम्।

प्रमाणपरिचिन्तन-नामक-

तृतीयपरिच्छेदे

द्वितीयः प्रकरणम् ।

व्याप्तियुक्तः पक्षधर्मो लिङ्गमित्यभिधीयते ।
यत् तेन जनितं ज्ञानं तल्लैङ्गिकमिति स्मृतम् ॥ १ ॥
अस्येदं कार्य्यमस्येदं कारणं तद्विरोधि तत् ।
संयोग्ये तच्च तस्येदं समवायीति लैङ्गिकम् ॥ २ ॥
इदन्तु परिसङ्ख्यानम् उदाहरणमात्रतः ।

प्रत्यक्षं निरूप्य लैङ्गिकं निरूपयति, "व्याप्तियुक्तः पक्षधर्मः" इत्यादि । व्याप्तिः पक्षश्च वक्ष्यते । व्याप्तिविशिष्टः सन् पक्षवृत्तिर्यो भवति, तल्लिङ्गं, तत् प्रयोज्यं ज्ञानं लैङ्गिकमित्यर्थः ॥ १ ॥

लैङ्गिकमुदाहरति,—"अस्येदं कार्य्यमस्येदम्" इत्यादि । 'अस्य' साध्यस्य, 'इदं' साधनं 'कार्य्यम्' इति व्यवहारो यत्र, तत् कार्य्य-लिङ्गकमिति फलितार्थः । यथा धूमादग्नेरनुमानम् । 'अस्येदं कारणम्' इति, कारणलिङ्गकं, यथा वृष्टितो नदीवृद्धेरनुमानम् । अन्यदुदाहरिष्यते, 'संयोग्ये तच्च' इति चकारेण 'अस्य' इत्यनु-कृष्यते ॥ २ ॥

"इदन्तु परिसङ्ख्यानम्" इत्यादि । 'उदाहरणमात्रतः' इति ल्यब-

अस्येदं व्याप्यमेतावज्ज्ञानं तत्र प्रयोजकम् ॥ ३ ॥
साध्यादन्यद्भवेत् लिङ्गं साध्यमाभासतां व्रजेत्।
अर्थान्तरं कुत्रचित् स्यात् लिङ्गमर्थान्तरेष्वपि ॥ ४ ॥
संयोगी समवायी च विरोधी च विरोधिनः।
एकार्थसमवायी च हेतुरित्येव गीयते ॥ ५ ॥
त्वग्वत् शरीरमेतत्वात् संयोगीत्येवमादिषु ॥ ६ ॥

लोपे पञ्चमी। तथाच उदाहरणमात्रप्रदर्शनार्थं, पूर्वोक्तपरिसङ्ख्यानं, न नियमार्थमिति भावः। किं तर्हि लैङ्गिके नियतम्? इत्यत्राह, "अस्येदं व्याप्यमेतावज्ज्ञानम्" इति। तथाच व्याप्यत्वग्रहमात्रं लैङ्गिके तत्त्वं, न पुनरस्येदं कार्य्यमित्यादिरीत्या कार्य्यत्वादिग्रहोऽपीत्यर्थः ॥ ३ ॥

तादात्म्य-तदुत्पत्त्योरेवाविनाभावप्रयोजकत्वमिति बौद्धादिमतं निराकरोति, "साध्यादन्यद्भवेत् लिङ्गम्" इति। लिङ्गं साध्यादन्यदेव भवति न साध्यात्मा, साध्याविशेषप्रसङ्गादिति भावः। 'साध्यमाभासताम्' इति। 'आभासताम्' अहेतुताम्। 'अर्थान्तरं' तदनुत्पन्नमपीति शेषः। 'अर्थान्तरेषु' तदकारणेष्वपीति शेषः। तथाच व्याप्यस्यातदुत्पन्नस्यापि लिङ्गत्वमस्तीति भावः ॥ ४ ॥

व्याप्तेस्तादात्म्य-तदुत्पत्तिनैयत्याभावं स्फुटयितुमाह, "संयोगी समवायी च" इत्यादि ॥ ५ ॥

संयोगिनमुदाहरति,—"त्वग्वत् शरीरमेतत्वात्" इति। अत्र च एतत्वस्य शरीररूपतया पर्यवसानात् संयोगित्वमस्त्येवेति भावः ॥६॥

देशः सारथिमानेष गतिमद्दृश्यतोऽत्र वा ।
तस्य संयुक्तसंयोगसंसर्गेणात्र साध्यता ॥ ७ ॥
परिमाणवदाकाशं द्रव्यत्वात् समवाय्यसौ ॥ ८ ॥
अणुत्वपरिमाणेन परमाणुस्तदाश्रयः ।
अनुमेयोऽत्र यो हेतुः समवाय्ययमेव वा ॥ ९ ॥
तारतम्यस्य विश्रान्तिः परिमाणेऽपि कुत्रचित् ।
अवश्यं विद्यते तस्माद् अणुत्वमनुमीयते ॥ १० ॥
भूतवाय्वप्रयोगादेरभूतं लिङ्गमिष्यते ।

"संयोगीत्येवमादिषु" इत्यत्रादिपद-ग्राह्यमुदाहरणान्तरमाह, "देशः" इत्यादि । 'अत्र वा' संयोगीत्यन्वयः । 'तस्य' सारथेः । अत्र संयोगानुयोगी, संयोगप्रतियोगिनोऽनुमाने हेतुः ॥ ७ ॥

समवायिनमुदाहरति,—"परिमाणवदाकाशम्" इत्यादि ॥ ८ ॥

समवायिन उदाहरणान्तरमाह, "अणुत्वपरिमाणेन" इति । अत्र समवायप्रतियोग्यणुत्वपरिमाणं समवायानुयोगिनस्तदाश्रयद्रव्यस्यानुमापकम् ॥ ९ ॥

अथावयवपरम्पराविश्रान्तिभूमित्वेन परमाणुरूपद्रव्यसिद्धावेव द्रव्यत्वहेतुना तत्राणुपरिमाणानुमानं घटते । तत् कथमणुपरिमाणेन परमाणोरनुमानं, परमाणुसिद्धिमन्तरेणाणुपरिमाणस्यैवासिद्धेरित्याशङ्क्य प्रकारान्तरेणाणुपरिमाणं साधयति, "तारतम्यस्य" इति । 'अणुत्वम्' अणुपरिमाणम् ॥ १० ॥

विरोधिलिङ्गमुदाहरति,—"भूतवाय्वप्रयोगादेः" इत्यादि ।

वर्षप्रभृति, भूतं वा स्यादभूतस्य साधनम् ॥ ११ ॥

विद्यमानविरोधि स्याद् विद्यमानविरोधिनः ।

नकुलादेरावृतस्य विस्फुर्जद्भुजगादिकम् ॥ १२ ॥

विमतं स्पर्शवद्रूपाद् एकार्थसमवाय्ययम् ।

स्मर्य्यमाणाविनाभाव-पूर्वकं लिङ्गमुच्यते ॥ १३ ॥

अनौपाधिकसम्बन्धो व्याप्तिर्दर्शितहेतुषु ।

तद्भावादत्र तादात्म्य-तदुत्पत्त्योर्न तन्त्रता ॥ १४ ॥

अभूतं वर्षप्रभृति भूतस्य वाय्वभ्रसंयोगादेर्लिङ्गमित्यर्थः। उदाहरणान्तरमाह, "भूतं वा स्यादभूतस्य साधनम्" इत्यादि । भूतं वा, वाय्वभ्रसंयोगादि, अभूतस्य वर्षादेर्लिङ्गम् इत्यर्थः। एवमादिपदात् अयं काष्ठो दाहवान् वह्निसंयुक्तत्वे सति मण्याद्यसन्निधानात् । अयं काष्ठो मण्याद्यसन्निहितो दाहवत्त्वात्, इत्याद्यूह्यम् ॥११॥

वर्षवाय्वभ्रसंयोगादीनां नैकस्मिन् काले विद्यमानता इति भिन्नकालेन विरोधिना भिन्नकालस्य विरोधिनोऽनुमानं प्रागुक्तम्, इदानीं विद्यमानेनैव विरोधिना विद्यमानस्यैव विरोधिनोऽनुमानमाह, "विद्यमानविरोधि स्यात्" इत्यादि ॥ १२ ॥

एकार्थसमवायिनमुदाहरति,—"विमतं स्पर्शवद्रूपात्" इत्यादि । परिगणितानां लिङ्गत्वं समर्थयति, "स्मर्य्यमाणाविनाभाव—" इति । अविनाभावो व्याप्तिः । तथाच स्मर्य्यमाण-व्याप्तिविशिष्टं लिङ्गं न्यायप्रयोगस्थले उच्यते; कथकैरिति शेषः ॥ १३ ॥

व्याप्तिं लक्षयति, "अनौपाधिकसम्बन्धो व्याप्तिः" इति । 'तद्भा-

लिङ्गिनो व्यापकं यत्तु लिङ्गस्याव्यापकं तथा ।
स एवोपाधिरेतस्य व्यतिरेको न दुर्ग्रहः ॥ १५ ॥
प्रत्यक्षाणाञ्च केषाञ्चित् साध्याव्याप्तिविनिर्णयात् ।
केषाञ्चित् साधनव्याप्ति-निर्णयादनुपाधिता ॥ १६ ॥
तथैवातीन्द्रियाणाञ्च मानात् सिद्धिमुपेयुषाम् ।
क्वचित् तर्कोऽनुसन्धेयः स तु शङ्कानिवर्त्तकः ॥ १७ ॥

वात् तस्याः व्याप्तेः सत्त्वात् । उपसंहरति,—"अत्र तादात्म्य-तदुत्पत्त्योः" इति । 'अत्र' व्याप्तौ ॥ १४ ॥

उपाधिं लक्षयति, "लिङ्गिनो व्यापकं यत्तु" इत्यादि । 'लिङ्गिनः' साध्यस्य । 'लिङ्गस्य' साधनस्य । तथाच साध्यव्यापकत्वे सति साधनाव्यापक एवोपाधिरित्यर्थः । 'एतस्य' उपाधेः । 'व्यतिरेकः' अभावः ॥ १५ ॥

"प्रत्यक्षाणाञ्च केषाञ्चित्" इत्यादि । प्रत्यक्षाणां केषाञ्चित् उपाधित्वेन शङ्कितानां प्रत्यक्षत एव साध्याव्यापकत्वग्रहात्, केषाञ्चिद्वा साधनव्यापकत्वग्रहादनुपाधित्वं ज्ञेयमित्यर्थः ॥ १६ ॥

"तथैवातीन्द्रियाणाञ्च" इति । अतीन्द्रियाणामपि प्रमाणसिद्धानामुपाधित्वेन शङ्कितानां, 'तथैव' साध्याव्याप्तिसाधनव्याप्त्यन्यतरनिर्णयेनैवानुपाधित्वं ज्ञेयमित्यर्थः । ननु अतीन्द्रियाणामनुपाधित्वनिर्णयोऽप्यनुमानादेव, तथाच तन्मूलव्याप्तावप्यनुपाधित्वमनुमानान्तराद् वाच्यं, तत्र तत्राप्येवमित्यनवस्था, इत्यत आह, "क्वचित् तर्कोऽनुसन्धेयः" इति । तथाच तर्कबलाच्छङ्कानिवृत्तिरिति भावः । तर्क-

उपाधिः कश्चिदत्रापि भविष्यत्येवमादिका।
शङ्कापिशाची सकलान् व्यवहारान् ग्रसत्यसौ॥ १८॥
तदेषा विदुषां नैति समुपादेयतां क्वचित्।
अनौपाधिकता तस्मात् सम्भवेत् शक्यनिश्चया॥ १९॥
यत्पर्य्यवसितं साध्यं तल्लिङ्गीत्युच्यते ततः।
श्यामो मित्रासुतत्वादित्यादौ नाव्याप्तिसम्भवः॥ २०॥
उपाधौ निश्चिते तस्माद् व्यभिचारग्रहो भवेत्।
सुतरां व्याप्त्यभावेन नानुमानं प्रवर्त्तते॥ २१॥
लिङ्गवद्वृत्त्यभावस्य या तु स्यात् प्रतियोगिता।
तदवच्छेदकादन्यो यो धर्मस्तद्वता समम्॥ २२॥

मूलभूतव्याप्तौ हि न शङ्कासम्भवः, व्याघातात्। यदि हि क्लृप्तकारणं विनापि कार्य्यं स्यादिति शङ्क्यते, तदा किमिति धूमादिकार्य्यार्थं नियमतः वह्न्यादीनि क्लृप्तानि कारणानि स्वयमुपादीयन्ते। तस्मात् व्याघातादेव तत्र न शङ्कावतार इति द्रष्टव्यम्॥ १७॥

ननु पूर्वोक्तमुपाधिलक्षणं, स श्यामो मित्रातनयत्वात्, इत्यादाव्याप्तकम्, अत्र हि शाकपाकजत्वमुपाधिः, तच्च कोकिलादिश्यामत्वाव्यापकमित्यत्राह, "यत् पर्य्यवसितं साध्यम्" इति। पर्य्यवसितञ्च साध्यं क्वचित् पक्षधर्मावच्छिन्नं, क्वचित् साधनावच्छिन्नं, क्वचिच्चान्यादृशम्। प्रकृते च मित्रातनयत्वावच्छिन्न-श्यामत्वव्यापकमेव शाकपाकजत्वमिति न दोषः॥ २०॥ २१॥

सामानाधिकरण्यं वा लिङ्गस्य व्याप्तिरिष्यते ॥ २३ ॥
लिङ्गाभावो लिङ्ग्यभावं व्याप्नोति यदि तर्हि सा ।
प्राक्तनैः प्रोच्यते व्याप्ति-र्व्यतिरेकेति सूरिभिः ॥ २४ ॥
सन्दिग्धसाध्यधर्मैव धर्मी पक्षः प्रकीर्त्तितः ॥ २५ ॥
अथवा साधकं मानं सिषाधयिषया विना ।
नास्ति यस्मिन्नसौ पक्ष-श्चिन्त्यमन्यन्मनीषिभिः ॥ २६ ॥
लैङ्गिकं पूर्ववत् किञ्चित् किञ्चित् शेषवदुच्यते ।

व्याप्तेर्लक्षणान्तरमाह, "लिङ्गवद्वृत्त्यभावस्य" इत्यादि ॥ २२ ॥

व्यतिरेकव्याप्तिं लक्षयति, "लिङ्गाभावो लिङ्ग्यभावम्" इति । 'सा' 'व्याप्तिः' इत्यन्वयः । साधनाभावस्य साध्याभावव्यापकत्वं व्यतिरेकव्याप्तिरित्यर्थः ॥ २४ ॥

पक्षं लक्षयति, "सन्दिग्धसाध्यधर्मैव" इति । सन्दिग्धः साध्यरूपो धर्मो यत्र, स सन्दिग्धसाध्यधर्मा । एवम्भूतो धर्मी पक्ष इत्यर्थः ॥ २५ ॥

"अथवा साधकं मानम्" इति । 'सिषाधयिषा' अनुमितीच्छा । तथाचानुमितीच्छाऽभावविशिष्टः साधकप्रमाणाभावो यत्र स पक्ष इत्यर्थः । तेन यत्र साधकप्रमाणं नास्ति तत्रानुमितीच्छां विनाऽप्यनुमितिः । यत्र तु साधकप्रमाणमस्ति, तत्रानुमितीच्छाऽभावे अनुमितिर्न भवत्येव इति द्रष्टव्यम् ॥ २६ ॥

लैङ्गिकं विभजते "लैङ्गिकं पूर्ववत् किञ्चित्" इत्यादि । क्रमेण लक्षणमाह, "तत्र कारणलिङ्गकं पूर्ववत्" इत्यादिना । 'तत्र' तेषु

किञ्चित् सामान्यतो दृष्टं, तत्र कारणलिङ्गकम् ॥ २७ ॥
पूर्ववत्, शेषवत् कार्य्यलिङ्गकं परिचक्षते ।
तत् तु सामान्यतो दृष्टम् अन्येषां यत्र लिङ्गता ॥ २८ ॥
लैङ्गिकं द्विविधं भूयः परार्थस्वार्थभेदतः ।
परार्थं न्यायसाध्यं तत् न्यायोऽप्यत्र प्रदर्श्यते ॥ २९ ॥
समस्तरूपोपपन्न-लिङ्गस्य प्रतिपादकम् ।
वाक्यं न्यायस्तदङ्गानि पञ्च वैशेषिके मते ॥ ३० ॥
प्रतिज्ञा साध्यनिर्देशो हेतुः साधनबोधकः ।
व्याप्तिप्रदर्शकं वाक्यं यदुदाहरणन्तु तत् ॥ ३१ ॥
हेतोर्व्याप्तिविशिष्टस्य पक्षवैशिष्ट्यबोधकः ।
न्यायस्यावयवः प्राच्यैर्-अत्रोपनय उच्यते ॥ ३२ ॥

मध्ये । 'अन्येषां, कार्य्यकारणभिन्नानाम् । पूर्ववत् यथा वृष्ट्या नदीवृद्ध्यनुमानम् । शेषवत् यथा धूमेन वह्न्यनुमानम् । सामान्यतो दृष्टं यथा रूपेण रसानुमानम् ॥ २७ ॥ २८ ॥

"समस्तरूपोपपन्न—" इत्यादि । लिङ्गत्वौपयिकानि यानि रूपाणि तत्समस्तोपपन्नलिङ्गप्रतिपादकं वाक्यं न्यायः । तानि च रूपाणि वक्ष्यन्ते ॥ ३० ॥

"प्रतिज्ञा साध्यनिर्देशः" इति । साध्यस्य निर्देशो यत्र न्यायावयवे स न्यायावयवः प्रतिज्ञेत्यर्थः । एवमन्यत्रापि न्यायावयवत्वे सतीति ज्ञेयम् ॥ ३१ ॥

भवेन्निगमनं पक्षे साध्यवैशिष्ट्यबोधकः ॥ ३३ ॥

वैशेषिकास्तु तत्संज्ञाः प्रतिज्ञापदेशकः ।

निदर्शनानुसन्धान-प्रत्याम्नाया इति क्रमात् ॥ ३४ ॥

तदन्यथापि त्रिविधं यत्किञ्चित् केवलान्वयि ।

केवलव्यतिरेक्यन्यद् अन्वयव्यतिरेकि च ॥ ३५ ॥

विपक्षाभाववल्लिङ्गं कथ्यते केवलान्वयि ।

सपक्षाभाववद् यत्तु केवलव्यतिरेकि तत् ॥ ३६ ॥

साध्यं सुनिश्चितं यत्र तं सपक्षं प्रचक्षते ।

तं विपक्षं यत्र पुन-स्तदभावस्य निश्चयः ॥ ३७ ॥

"भवेन्निगमनं पक्षे साध्यवैशिष्ट्यबोधकः" इति। न्यायावयव इत्येव ॥ ३३ ॥

"वैशेषिकास्तु तत् संज्ञाः" इति। तथाच, हेतोरपदेश इति, उदाहरणस्य निदर्शनमिति, उपनयस्य अनुसन्धानमिति, निगमनस्य प्रत्याम्नाय इति, वैशेषिकपरिभाषा बोध्या। इत्थं न्यायप्रयोगः। पर्वतो वह्निमान्, धूमात्, यो यो धूमवान् स वह्निमान्, वह्निव्याप्य-धूमवांश्चायं, तस्मादयं वह्निमानिति ॥ ३४ ॥

केवलान्वयि-लिङ्गकत्वं केवलान्वयित्वमिति वक्ष्यति, साम्प्रतं लिङ्गगतं केवलान्वयित्वादिकं लक्षयति, "विपक्षाभाववल्लिङ्गम्" इत्यादि ॥ ३६ ॥

सपक्षं विपक्षञ्च लक्षयति, "साध्यं सुनिश्चितं यत्र" इत्यादि।

अन्वयव्याप्तिमल्लिङ्गम् अन्वयीत्युच्यतेऽथ वा ।
व्यतिरेकव्याप्तियुक्तं लिङ्गं यत् व्यतिरेकि तत् ॥ ३८ ॥
सपक्षपक्षवृत्तित्वं विपक्षासत्त्वमेव च ।
अबाधसाध्यकत्वञ्च तथाऽसत्प्रतिपक्षता ॥ ३९ ॥
अपेक्ष्यन्ते लिङ्गतायाम् अन्वयव्यतिरेकिणः ।
विपक्षासत्त्वकं त्यक्त्वा केवलान्वयिनो मतम् ।

तथाच "वह्निमान् धूमात्" इत्यादौ निश्चितसाध्यवान् महानसादिः सपक्षः, निश्चितसाध्याभाववान् जलह्रदादिर्विपक्ष इत्यर्थः ॥ ३७ ॥

तदेवम् उक्तक्रमेण हेतोरन्वयव्यतिरेकित्वं केवलान्वयित्वं, केवलव्यतिरेकित्वञ्चेति त्रैविध्यं पर्य्यवसितम् । तत्र हेतोर्गमकतौपयिकानि रूपाणि विवक्षुः प्रथमतोऽन्वयव्यतिरेकिणो गमकतौपयिकानि रूपाण्याह, "सपक्षपक्षवृत्तित्वम्" इत्यादि । सपक्षवृत्तित्वं पक्षवृत्तित्वञ्चेत्यर्थः । 'अबाधसाध्यकत्वम्' इति । नास्ति बाधो यस्य तत् अबाधं, तादृशं साध्यं यस्य, तत्, अबाधसाध्यकं, तस्य भावः अबाधसाध्यकत्वम् । 'असत्प्रतिपक्षता' इति । असन् 'प्रतिपक्षः' तुल्यबलविरोधी यस्य, तस्य भावः असत्प्रतिपक्षता । तथाच पर्वतो वह्निमान् धूमादित्यन्वयव्यतिरेकिणो हेतोर्धूमस्य सपक्षे महानसे पक्षे पर्वते च वृत्तिरस्त्येव । एवं विपक्षे जलह्रदादौ वृत्तिर्नास्ति । नाप्यत्र साध्यस्य बाधितत्वं, न वा तुल्यबलमनुमानान्तरमत्र विरोधि विद्यते, इति समस्तान्येव रूपाण्यत्र सन्तीत्यनुसन्धेयम् । एवं परत्राप्यूह्यम् ॥ ३९ ॥

च्छते सपक्षसत्त्वन्तु केवलव्यतिरेकिणः ॥ ४० ॥
एतदन्यतमन्यूनोऽनपदेश इहोच्यते।
अप्रसिद्धो विरुद्धश्च सन्दिग्धश्चेति स त्रिधा ॥ ४१ ॥
अनुमातुः संशयोऽपि रूपशून्यत्वगोचरः।
प्रतिबध्नात्यनुमितिम् इत्याहुस्तत्त्ववेदिनः ॥ ४२ ॥
असिद्धोऽप्रमितो व्याप्त्या पक्षधर्मतयाथ वा।
व्याप्यत्वासिद्ध आद्यः स्यात् स्वरूपासिद्धकः परः।
अपरश्चाश्रयासिद्ध इत्यसौ त्रिविधः स्मृतः ॥ ४३ ॥
अगृहीतव्याप्तिकस्तु व्याप्यत्वासिद्ध उच्यते।

प्रसङ्गात् हेत्वाभासान् विवेचयति, "एतदन्यतमन्यूनः" इति। यस्य हेतोर्गमकत्वौपयिकानि यानि रूपाणि, तस्य हेतोस्तदन्यतमरूपशून्यत्वं हेत्वाभासत्वमिति फलितार्थः। 'अनपदेशः' इति च हेत्वाभासस्य पर्य्यायः। हेत्वाभासान् विभजते; "अप्रसिद्धो विरुद्धश्च" इति ॥ ४१ ॥

तत्र अप्रसिद्धं लक्षयति, "असिद्धोऽप्रमितो व्याप्त्या" इति। व्याप्तिविशिष्टत्वेन पक्षधर्मत्वेन वा यो न ज्ञायते, स हेतुरसिद्ध इत्यर्थः। असिद्धं विभजते, "व्याप्यत्वासिद्ध आद्यः स्यात्" इत्यादि। अत्राद्ये व्याप्त्याऽप्रमितत्वं, द्वितीये पक्षवृत्तितया, तृतीयेऽपि आश्रयस्यासिद्ध्या हेतोरपि सुतरां तदाश्रयवृत्तित्वं नास्तीति पक्षवृत्तितयाऽप्रमितत्वमेवेति विवेक्तव्यम् ॥ ४३ ॥

सत्या एव क्वचित् व्याप्तेरग्रहात् कुत्रचित् पुनः।
व्याप्तेरभावादित्यस्य द्वैविध्यं तद्विदो विदुः॥ ४४॥
स्वरूपासिद्धमाख्यातं यस्तु पक्षे न विद्यते।
तत्त्वावच्छेदकं तत्र नास्ति चेदन्तिमं तदा॥ ४५॥
असिद्धेऽन्तर्भविष्यन्ति तर्काभावादयः परे॥ ४६॥
विरुद्धस्य तथा पक्षे साध्याभावविनिश्चयः।
फलं, ततस्तत्फलको हेत्वाभासः स कीर्त्तितः॥ ४७॥
साध्यसन्देहजनकः पक्षे सन्दिग्ध उच्यते।
स चानैकान्तिकः प्रोक्त-स्त्रिविधस्तत्त्ववेदिभिः॥ ४८॥

व्याप्यत्वासिद्धं लक्षयति, "अगृहीतव्याप्तिकस्तु" इति। व्याप्तेरग्रहस्य द्विधासम्भवात् सहेतुकमस्य द्वैविध्यमाह, "सत्या एव क्वचित् व्याप्तेः" इत्यादि। वह्निमान् नीलधूमादित्यादौ व्याप्त्यभावादसिद्धत्वं ज्ञेयम्॥ ४४॥

"स्वरूपासिद्धमाख्यातम्" इत्यादि। पक्षावृत्तिहेतुः स्वरूपासिद्धः, पक्षे पक्षतावच्छेदकाभावः आश्रयासिद्धः इत्यर्थः। ह्रदो द्रव्यं धूमात्, काञ्चनमयपर्वतो वह्निमानिति क्रमेणोदाहरणं बोध्यम्॥ ४५॥

अनुकूलतर्काद्यभावे व्याप्तिग्रहासम्भवात् तेषामप्यत्रैवान्तर्भाव इत्याह, "असिद्धेऽन्तर्भविष्यन्ति" इत्यादि॥ ४६॥

"विरुद्धस्य तथा पक्षे" इत्यादि। साध्यवद्वृत्तिर्हि हेतुर्विरुद्ध इत्युच्यते। तथाच यत्र साध्यं न तत्र हेतुः, यत्र च हेतुर्न तत्र साध्यं वर्त्तते इति सुतरामेव हेत्वधिकरणे साध्याभावो निश्चीयते॥ ४७॥

पक्षे सहचरत्वाद् वा साध्य-तद्रहितत्वयोः ।
सामान्याद्वा विशेषाद्वा संशयो भवति त्रिधा ॥ ४९ ॥
प्रथमोऽनुपसंहारी भवेत् साधारणोऽपरः ।
अन्यस्त्वसाधारणः स्याद् अनैकान्तस्त्रिधा ततः ॥ ५० ॥

अनैकान्तिकस्य त्रैविध्यं सोपपत्तिकमाह, "पक्षे सहचरत्वाद्वा" इत्यादिश्लोकद्वयेन। अयमर्थः, साध्य-तदभावयोः पक्ष एव हेतु-साहचर्य्यदर्शनात् संशयो भवति यथा सर्वमनित्यं प्रमेयत्वादित्यादौ। सामान्यधर्मदर्शनादपि संशयो भवति, यथा घटः क्षितित्ववान् द्रव्यत्वादित्यादौ। द्रव्यत्वं हि क्षितित्ववति घटादौ तदभाववति जलादौ च वर्त्तते इति साधारणधर्मदर्शनादेवात्र संशय इति द्रष्टव्यम्। विशेषधर्मदर्शनादपि संशयो भवति, यथा शब्दोऽनित्यः शब्दत्वादित्यादौ। यद्यपि सर्वत्रैव समान एव धर्मः संशयकारणं, तथापि पक्ष एव तस्य साध्य-तदभावसाहचर्य्यदर्शनेन, पक्षे साध्य-साहचर्य्यस्य पक्षादन्यत्र तदभावसाहचर्य्यस्य दर्शनेन, विशेषधर्मस्य शब्दत्वस्य व्यावृत्तिर्नित्यानित्यसाधारणीति तद्दर्शनेन च संशयस्त्रिधा भवति इत्युक्तम्, उक्तप्रकारत्रयस्यानपायादिति ध्येयम् ॥ ४९ ॥

"प्रथमोऽनुपसंहारी" इत्यादि। तथाच केवलान्वयिपक्षकत्वम् अनुपसंहारित्वं, सर्वमनित्यं प्रमेयत्वादित्यादौ। सपक्षविपक्षवृत्तित्वं साधारणत्वं घटः क्षितित्ववान् द्रव्यत्वादित्यादौ। सपक्षविपक्ष-व्यावृत्तत्वमसाधारणत्वं, शब्दोऽनित्यः शब्दत्वादित्यादौ, शब्दत्वं हि निश्चितसाध्यवद्घटादिभ्यो निश्चितसाध्याभाववत् कालादिभ्यश्च

अयमश्वो विषाणित्वात् पक्षयित्वाच्च रासभम् ।
उदाहरणमुन्नेयम् अप्रसिद्धविरुद्धयोः ॥ ५१ ॥
यस्माद्विषाणी तस्माद् गौरित्यनैकान्तिकस्य च ।
सन्दिग्धे वाऽप्रसिद्धे वा बाधस्य चरितार्थता ॥ ५२ ॥
तथा सत्प्रतिपक्षोऽपि पक्षे व्याप्त्यादिसंशयम् ।
आपादयन्ननैकान्तेऽन्यस्मिन् वा पर्य्यवस्यति ॥ ५३ ॥

व्यावृत्तमेवेति भावः, इति बहवः । परन्तु पक्ष एव साध्य-तदभाव-साहचर्य्यदर्शनमनुपसंहारित्वे तत्त्वमिति नये, गुणो रूपत्ववान् गुणत्वात् इत्यादावप्यनुपसंहारित्वमेष्टव्यमित्यनुसन्धेयम् ॥ ५० ॥

इदानीं गौतमीयतन्त्रोक्तयोर्बाधसत्प्रतिपक्षयोरप्यत्रैवान्तर्भावमाह, "सन्दिग्धे वाऽप्रसिद्धे वा" इत्यादि । अयमर्थः, पक्षस्य साध्यशून्यत्वे हि बाधत्वमाहुः, तच्चात्र नातिरिच्यते । यत्र हि अश्वपिण्डं पक्षयित्वा अयं गौर्विषाणित्वादिति साध्यते, तत्र साध्यस्य गोत्वस्य पक्षे वृत्तिर्नास्तीति बाधत्वम् । तच्च कणादमते अनैकान्तिकमेव । अप्रसिद्धिरप्यस्ति पक्षेऽश्वपिण्डे विषाणित्वविरहात् । अतएवाहुः "बाधायामपक्षधर्मो हेतुरनैकान्तिको वा" इति ॥ ५१ ॥ ५२ ॥

"तथा सत्प्रतिपक्षोऽपि" इति । यत्र वायुर्न प्रत्यक्षः नीरूपवहिर्द्रव्यत्वात् गगनवदिति साधिते, वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् घटवदिति प्रत्यवतिष्ठते, तत्र हि सत्प्रतिपक्ष इत्युच्यते न चात्र द्वयोर्यथार्थत्वं सम्भवति, न ह्येकमेव वस्तुप्रत्यक्षमप्रत्यक्षञ्च भवितुमर्हति इति सुतरामेवान्यतरस्य भ्रान्तत्वमभ्युपेयं, तथाचा-

"विरुद्धासिद्धसन्दिग्धम् अलिङ्गं काश्यपोऽब्रवीत् ।"
कणभक्ष्यमुनेः पक्षे-ऽनपदेशस्त्रिधा ततः ॥ ५४ ॥
वृत्तिकारो गौतमीयं मतमेवानुगच्छति ।
समुच्चयाच्चकारेण बाधसत्प्रतिपक्षयोः ॥ ५५ ॥
अनध्यवसितं षष्ठम् आभासं केचिदूचिरे ।
सन्दिग्धादिभिरस्यापि चिन्तनीया गतार्थता ॥ ५६ ॥
इति दिङ्मात्रमेतस्मिन् दर्शितं दूरदर्शिभिः ।
ऊह्यमन्यद्बहुतरं साम्प्रतं प्रकृतं ब्रुवे ॥ ५७ ॥
केवलान्वयिलिङ्गत्वात् लैङ्गिकं केवलान्वयि ।

स्यापि व्याप्त्यादिसंशयाधायकतयाऽनैकान्तिकादावेवान्तर्भाव इति भाव्यम् ॥ ५६ ॥

कणादमते हेत्वाभासस्य त्रैविध्यं संवादयति, "विरुद्धासिद्ध-सन्दिग्धम्" इति ॥ ५४ ॥

"वृत्तिकारो गौतमीयम्" इत्यादि । गौतममते बाधः सत्प्रति-पक्षश्च हेत्वाभासान्तरमिति मिलित्वा हेत्वाभासाः पञ्च । "समुच्चयात् चकारेण" इति । "अप्रसिद्धोऽनपदेशोऽसन् सन्दिग्धश्चानपदेशः" इति सूत्रस्य-चकारेणेत्यर्थः । "चकारस्तूक्तसमुच्चयमात्रे" इति शङ्कर-मिश्राः ॥ ५५ ॥

"अनध्यवसितं षष्ठम्" इत्यादि । साध्यासाधकः पक्ष एव वर्त्तमानो हेतुरनध्यवसित इत्युच्यते ॥ ५६ ॥

अन्यदप्यनया रीत्या निर्वक्तव्यं बुधैर्द्वयम् ॥ ५८ ॥
इदं वाच्यं प्रमेयत्वादित्येतत् केवलान्वयि ।
पृथिवी भिद्यतेऽन्येभ्यो गन्धादित्येवमादिकम् ।
केवलव्यतिरेक्यन्यत् धूमतो वह्निमानिति ॥ ५९ ॥
साध्यस्य कुत्रचित् सिद्धौ हेतोस्तस्मिन्ननन्वये ।
असाधारणमेव स्याद् अन्वयित्वमथान्वये ॥ ६० ॥
अप्रसिद्धौ न पक्षत्वं नानुमा तद्विशिष्टधीः ।
व्याप्तस्य पक्षधर्मत्वं न, व्याप्तिर्व्यतिरेकयोः ।
पक्षधर्मस्य न व्याप्तिर्व्यर्थश्चोपनयो भवेत् ॥ ६१ ॥

व्यतिरेकिलैङ्गिकं परीक्षते, "साध्यस्य कुत्रचित् सिद्धौ" इत्यादि । अयमर्थः, पृथिवी इतरेभ्यो भिद्यते गन्धात्, इत्यादौ व्यतिरेकिणि इतरभेदः साध्यते । तच्च साध्यं क्वचित् प्रसिद्धं न वा ? आद्ये यत्र प्रसिद्धिस्तत्र हेतुर्वर्त्तते न वा ? तत्र, यत्र साध्यसिद्धिस्तत्र हेत्वभावे आह, "साध्यस्य" इत्यादि । यत्राधिकरणे साध्यमस्ति तत्र हेतुर्नास्ति, यत्र च साध्यं नास्ति तत्रापि सुतरां हेतुर्नास्तीति सपक्षविपक्षव्यावृत्ततयाऽसाधारणमित्यर्थः । अथ यत्र साध्यसिद्धिस्तत्र हेतोः सत्त्वेत्वाह, "अन्वयित्वमथान्वये" इति । तथाच यत्र साध्यसिद्धिस्तस्यैव दृष्टान्तत्वसम्भवादन्वयिनैव निर्वाहे व्यतिरेकिवैयर्थ्यमिति भावः ॥ ६० ॥

साध्यस्य कुत्रापि प्रसिद्ध्यभावे त्वाह, "अप्रसिद्धौ न पक्षत्वम्" इति । साध्यस्याप्रसिद्ध्या सन्देहाद्यसम्भवादिति भावः । दोषान्तर-

इतरेषां जलादीनां भेदः प्रत्यक्षगोचरः ।
घटादिष्वेव वाय्वादेरिन्द्रियागोचरस्य च ॥ ६२ ॥
दृष्टान्तो घट एवास्तु किन्तर्हि व्यतिरेकिणा ।
"ऋजुमार्गेण सिध्यन्तं को हि वक्रेण साधयेत्" ॥ ६३ ॥

माह, 'नानुमा तद्विशिष्टधीः' इति । 'नानुमा' नानुमितिः, तत्र हेतुगर्भविशेषणं 'तद्विशिष्टधीः' इति । साध्याप्रसिद्धौ साध्यविशिष्टबुद्धिरूपाऽनुमितिरपि न सम्भवतीत्यर्थः । दोषान्तरमाह, 'व्याप्तस्य पक्षधर्मत्वम्" इत्यादि । 'व्याप्तस्य' हेत्वभावव्याप्यसाध्याभावस्य, 'पक्षधर्मत्वं' पक्षवृत्तित्वं, 'न' इत्यर्थः । कुत इत्यत आह, "व्याप्तिर्व्यतिरेकयोः" इति । 'व्यतिरेकयोः' साध्याभावहेत्वभावयोः, 'व्याप्तिः' यत इत्यर्थः । "पक्षधर्मस्य" इति । 'पक्षधर्मस्य' गन्धादेः, 'न व्याप्तिः' न हेत्वभावव्याप्यत्वमित्यर्थः । "व्यर्थस्योपनयो भवेत्" इति । इतरभेदाभावव्यापकाभावप्रतियोगिगन्धवती चेयमित्युपनयोऽपि व्यर्थः स्यादित्यर्थः । साध्याभाव एव व्याप्तिसत्त्वेन व्याप्तिविशिष्टे पक्षधर्मत्वाभावाशङ्कायाः प्रोक्तोपनयादनिवृत्तेर्निष्प्रयोजनकतया वैयर्थ्यमिति भावः ॥ ६१ ॥

सिद्धान्ती प्रथमतः साध्याप्रसिद्धिं निराकरोति "इतरेषां जलादीनाम्" इत्यादि । "वाय्वादेः" इत्यादि । अतीन्द्रियस्यापि वाय्वादेर्भेदः घटादिषु प्रत्यक्ष इत्यर्थः । अतीन्द्रियप्रतियोगिकस्यापि भेदस्य योग्याधिकरणे प्रत्यक्षत्वमुपपादितं प्रत्यक्षनिरूपणे । साध्याप्रसिद्धेर्निरासे च तन्मूलकदोषा अपि निरस्ता एवेति भावः ॥ ६२ ॥

शङ्कते, "दृष्टान्तो घट एवास्तु" इति । तथाच पृथिवी इतरेभ्यो

दृष्टान्ते साध्यवत्त्वेन निश्चितत्वमपेक्ष्यते ।
न पक्षान्यत्वमित्यस्मात् तस्य तत्त्वेऽपि न क्षतिः ॥ ६४ ॥
लिङ्गं चेत् स्यादनाभासं तदा वक्रदृचिं प्रति ।
व्यतिरेकिप्रकारोऽपि नान्येन प्रतिहन्यते ॥ ६५ ॥
अन्वयव्याप्तिरत्रापि गृह्यते व्यतिरेकतः ।
अनुमेयाऽन्वयव्याप्तिर्व्याप्त्या वा व्यतिरेकया ॥ ६६ ॥
गृहीतव्याप्तिकस्यैव हेतोः पक्षे समर्थनात् ।
व्यर्थतोपनयस्यापि कथङ्कारं भविष्यति ॥ ६७ ॥
सर्वस्या एव पक्षत्वान्नास्त्यस्मिन् सिद्धसाधनम् ।

भिद्यते गन्धवत्त्वात् घटवत् इत्यन्वयिनैव सिद्धेर्व्यतिरेकिवैयर्थ्यमिति भावः ॥ ६३ ॥

घटस्यापि पक्षतया कथं दृष्टान्तत्वमित्याशङ्क्य परिहरति, "दृष्टान्ते साध्यवत्त्वेन" इति । 'तस्य' घटस्य, 'तत्त्वे' दृष्टान्तत्वे ॥ ६४ ॥

समाधत्ते, "लिङ्गं चेत् स्यादनाभासम्" इति । 'अनाभासं' दोषशून्यम् । 'अन्येन' साध्याप्रसिद्ध्यादिना ॥ ६५ ॥

व्याप्तस्य न पक्षधर्मता पक्षधर्मस्य च न व्याप्तिरिति वैषम्यं परिहरति, "अन्वयव्याप्तिरत्रापि" इति । 'व्यतिरेकतः' व्यतिरेकसहचारदर्शनतः इत्यर्थः ॥ ६६ ॥

एवञ्च सति नास्त्युपनयवैयर्थ्यमित्याह, "गृहीतव्याप्तिकस्यैव" इति ॥ ६७ ॥

ननु तथापि घटादितरभेदस्य प्रत्यक्षसिद्धत्वात्, सिद्धसाधन-

सामानाधिकरण्येन सिद्धिर्नात्र विरोधिनी ॥ ६८ ॥
अवच्छेदकभेदे हि सिद्धसाधनमंशतः ।
ततोऽनित्ये वाङ्मनसे इत्यादिषु तदुच्यते ॥ ६९ ॥
घटस्याप्यत्र पक्षत्वं पृथिवीत्वेन सम्भवेत् ।
घटत्वेनैव तत् सिद्धेस्ताद्रूप्येण न पक्षता ॥ ७० ॥
जलवन्नेतराद्भिन्ना गुरुत्वात् पृथिवीति चेत् ।
अन्यभेदनिषेधस्तद्-अभेदात्मात्र साध्यते ॥ ७१ ॥

मित्याशङ्क्याह, "सर्वस्या एव पक्षत्वात्" इति । 'सर्वस्याः' इति, पृथिव्या इति शेषः । अयमर्थः । पृथिवीत्वावच्छेदे नेतरभेदः साध्यते, सिद्धिस्तु पृथिवीत्वसामानाधिकरण्येनेति न दोषः ॥ ६८ ॥

अथास्त्वंशत एव सिद्धसाधनम् इत्याशङ्क्याह, "अवच्छेदकभेदे हि" इति । अयमर्थः । पक्षतावच्छेदकनानात्वे, यत्किञ्चित् पक्षतावच्छेदकावच्छेदेन साध्यसिद्धावंशतः सिद्धसाधनं भवति, यथा अनित्ये वाङ्मनसे इत्यत्रानित्या वागित्यस्यांशस्य सिद्धतया तद्दोषोऽवतरति । प्रकृते तु पक्षतावच्छेदकभेदाभावान्न तथात्वमितिभावः ॥ ६९ ॥

अथात्रापि पृथिवीत्वघटत्वाद्यवच्छेदकभेदोऽस्त्येव इत्याशङ्क्याह, "घटस्याप्यत्र पक्षत्वम्" इति । घटत्वेन सिद्धिसत्त्वात् घटस्यापि ताद्रूप्येण पक्षता न सम्भवति अपि तु पृथिवीत्वेनैव, तेन रूपेण सिद्ध्यभावादिति भावः ॥ ७० ॥

शङ्कते "सिद्धसाधनमेकस्मिन्" इत्यादि । अयमाशयः, पृथिवी

प्रत्यक्षेणैव दृष्टान्तः साध्यवैकल्यवान् यतः ।
अतः सत्प्रतिपक्षत्वं नास्ति न्यूनबलं हि तत् ॥ ७२ ॥
सिद्धसाधनमेकस्मिन् अन्यस्मिन्ननवस्थितिः ।
साध्याननुगमो वापि नान्योन्याभावसाधनात् ॥ ७३ ॥
अन्योन्याभावभेदोऽपि वस्तुगत्यातिरिच्यते ।
तद्वैधर्म्यं तदन्यत्वं व्याप्यमित्यवधारणात् ॥ ७४ ॥

'इतरेभ्योऽभिद्यते गन्धात्' इत्यादिव्यतिरेकिणि इतरभेदः साध्यते । तत्र भेदो वैधर्म्यम्, अन्योन्याभावो वा? तत्राद्यपक्षमभिप्रेत्याह 'सिद्धसाधनमेकस्मिन्' इति। पृथिव्यामितरवैधर्म्यस्य साक्षादनुभूयमानत्वात् सिद्धसाधनम् इति भावः । द्वितीयेऽपि अन्योन्याभावस्याऽन्योन्याभावान्तरमभ्युपगम्यते न वा ? आद्ये अनवस्था । अयं भावः— अन्योन्याभावस्याऽन्योन्याभावान्तराभ्युपगमे, तस्याप्यन्योन्याभावस्याऽन्योन्याभावान्तरं, तस्याप्यन्यत्तस्याप्यन्य इति स्यादेवानवस्था इति द्रष्टव्यम् । द्वितीये तु (अन्योन्याभावस्याऽन्योन्याभावान्तरानभ्युपगमे तु) आह 'साध्याननुगमः' इति जलादेरन्योन्याभाव एव साध्यते, अन्योन्याभावस्य तु नान्योन्याभावः साध्यते, तदनभ्युपगमात्, अपि तु तेन समं स्वरूपभेद एव साध्यते, इति भवति साध्याननुगमः । तस्मादनुपपन्नं व्यतिरेक्यनुमानमिति । अत्र समाधत्ते "नान्योन्याभावसाधनात्" इति ॥ ७३ ॥

अन्योन्याभावस्याप्यन्योन्याभावान्तरमभ्युपगन्तव्यमित्याह "अन्योन्याभावभेदोऽपि" इति । तत्र हेतुमाह "तद्वैधर्म्यम्" इति। अन्यो-

यावत्यनुभवस्तावत्यविश्रामस्ततः परम् ।
अतत्त्वेनैव विश्रामाद् अनवस्था न विद्यते ॥ ७५ ॥
शब्दाश्रयत्वशून्यत्वावच्छिन्नप्रतियोगिकः ।
सिद्धो भेदः पूर्वमेव तद्वैधर्म्येण हेतुना ॥ ७६ ॥
इदानीं केवलं पक्षनिष्ठत्वेन स बोध्यते ।
गिरिनिष्ठतया वह्निरिवान्यत् स्वयमूह्यताम् ॥ ७७ ॥

न्याभाववैधर्म्यं तावत् पृथिव्यामनुभूयते, ततस्तान्योन्याभावप्रतियोगिकान्योन्याभावोऽपि तत्रानुमीयते, यद् यद्वैधर्म्यवत्, तत्, तत्प्रतियोगिकान्योन्याभाववत् इति व्याप्तिबलादिति भावः ॥ ७४ ॥

अनवस्थां परिहरति "यावत्यनुभवस्तावदविश्रामः" इति । यावत्यनुभवस्तावदभ्युपगम्यते, यत्र त्वनुभवो नास्ति तन्नाभ्युपगम्यतेऽपीति कुतोऽनवस्था ? तदुक्तं "सम्बिदेव हि भगवती वस्तूपगमे नः शरणम्" इति ॥ ७५ ॥

ननु आकाशमितरभिन्नं शब्दाश्रयत्वात्, यन्नैवं तन्नैवं यथा पृथिव्यादि, इत्यादावतीन्द्रिये गगनादौ पक्षैकदेशेऽपि साध्यसिद्धेरभावात् कथमनुमितिः ? इत्याशङ्क्याह "शब्दाश्रयत्व—" इत्यादि । शब्दाश्रयत्वं हि हेतुः, तच्छून्यत्वञ्च पृथिव्यादौ, ततश्च शब्दाश्रयत्वात्यन्ताभाववत् प्रतियोगिकान्योन्याभावः पूर्वं सिद्ध एव, तद्वैधर्म्यस्य तदन्यो भावव्याप्यत्वात् । स एवान्योन्याभाव इदानीं पक्षनिष्ठत्वेन बोध्यते, वह्निः पर्वतनिष्ठत्वेनेवेति नानुपपत्तिः ॥ ७६ ॥

तदेषा गतिरेष्टव्या गगनादावतीन्द्रिये ।
अतः पक्षैकदेशेऽपि साध्यासिद्धिर्न दूषणम् ॥ ७८ ॥
शब्दाश्रयत्वशून्यत्वं विपक्षेषु जलादिषु ।
अद्यापि न गृहीतं चेत् तर्हि तस्य न लिङ्गता ॥ ७९ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कारप्रणीतायां तत्त्वावलौ
प्रमाणपरिचिन्तनाभिधेय-तृतीयपरिच्छेदस्य
द्वितीयं प्रकरणम् ।

"तर्हि तस्य न लिङ्गता" इति । 'तर्हि' शब्दाश्रयत्वशून्यत्वस्य विपक्षे ग्रहणाभावे । 'तस्य' शब्दाश्रयत्वस्य । 'न लिङ्गता' इति, विपक्षगामित्वशङ्काया अनिवृत्तेः इति भावः ॥ ७९ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां
प्रमाणपरिचिन्तननामकतृतीयपरिच्छेदस्य
द्वितीयप्रकरण-टीका समाप्ता ।

प्रमाणपरिचिन्तन-नामक-

तृतीयपरिच्छेदे

तृतीयं प्रकरणम्।

प्रमाणानामथान्येषाम् अन्याभ्युपगतात्मनाम्।
अन्तर्भावोऽत्र संक्षेपात् साम्प्रतं प्रतिपाद्यते ॥ १ ॥
आकाङ्क्षायोग्यतावत्त्वं लैङ्गिके पदपञ्चके।
पदार्थपञ्चके तद्वत् स्मारितत्वन्तु साधनम् ॥ २ ॥

"प्रमाणानामथान्येषाम्" इत्यादि। 'अन्याभ्युपगतात्मनाम्' अन्यैरभ्युपगत आत्मा स्वरूपं येषां, तेषां प्रमाणानामिति सम्बन्धः ॥ १ ॥

प्रथमं तावत् शाब्दबोधस्य लैङ्गिकेऽन्तर्भावमाह "आकाङ्क्षायोग्यतावत्त्वम्" इति। अयमर्थः। प्रत्यक्षलैङ्गिकभिन्नमन्वयबोधनामकमनुभवान्तरं शब्दजन्यमिति नैयायिकादयो मन्यन्ते। तदपि वैशेषिकमते पदपञ्चकेण पदार्थपञ्चकेण वाऽनुमानेन गतार्थम्। इति वस्तुस्थितिः। तत्र पदपञ्चकानुमानेऽयं प्रयोगः, एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्पदत्वात् इति प्रयोगः। अत्र ज्ञानावच्छेदकतया अभिलषितविशेषलाभ इति द्रष्टव्यम्। पदार्थपञ्चकानुमाने त्वयं प्रयोगः। एते पदार्था मिथः संसर्गवन्तः

व्यभिचारोऽपि नास्त्यस्मिन् आप्तोक्तत्वविशेषणात्।
पूर्वं ग्राह्यत्वमेतस्य परेषामपि सम्मतम् ॥ ३ ॥
तस्य प्रकरणादीनां महिम्ना ग्रहसम्भवः।
सामान्यतस्ततो लिङ्गनिर्णयो दुरपह्नवः ॥ ४ ॥
अथवा तद्विसंवादो बाष्पादौ धूमबुद्धितः।
अनुमायामिवात्रापि प्रवृत्तिर्नातिदुर्घटा ॥ ५ ॥
नियमस्यैव साध्यत्वम् आप्तोक्तत्वे न दूषणम्।

आकाङ्क्षादिमत्पदस्मारितत्वात् इति। अत्रापि पक्षधर्मताबला-द्विशेषलाभः। अत्र हि आकाङ्क्षादिमत्पदस्मारितत्वं मिथः संसर्ग-वत्त्वव्याप्यमेव इति भावः ॥ २ ॥

ननु अनाप्तवाक्ये व्यभिचारात् कथमनुमितिः? इत्यत्राह "व्यभि चारोऽपि नास्त्यस्मिन्" इति। तथा चाकाङ्क्षादिमदाप्तोक्तपदस्मारि-तत्वं हेतुरिति भावः। 'एतस्य' आप्तोक्तत्वस्य 'परेषां' शब्दप्रामाण्य-वादिनाम्। तैरपि व्यभिचारिशब्दव्यावृत्त्यर्थमाप्तोक्तत्वस्य ग्राह्यत्वम-भ्युपेयते इति भावः ॥ ३ ॥

"तस्य प्रकरणादीनाम्" इत्यादि। 'तस्य' इति बुद्धिस्थं आप्तत्वं परामृशति। विशेषतया आप्तत्वनिश्चयो माभूत्, प्रकरणादिमहिम्ना सामान्यत आप्तत्वग्रहस्तु सम्भवत्येव, सुतरां लिङ्गनिर्णयोऽप्यवश्यमेव भवति इति भावः ॥ ४ ॥

नन्वेते पदार्थाः मिथः संसर्गवन्त एवेति साध्यते, सम्भावित-

कदाचित् तद्विसंवादोऽप्यस्तु भ्रान्तानुमानवत् ॥ ६ ॥
आकाङ्क्षार्थतदाक्षिप्ताविनाभावसमन्वितः ।
संसर्गावगमप्रागभाव एव निगद्यते ॥ ७ ॥
अथवा साभिधानापर्य्यवसानमिहेष्यते ।
योग्यता तत्र तद्वत्त्वम् आसत्तिरपि कथ्यते ।
तेषामव्यवधानत्वं, तद्बुद्धिः प्रागपेक्षिता ॥ ८ ॥
अर्थबोधकशब्दानाम् अर्थानामपि कुत्रचित् ।
गुणत्वात् कर्मशून्यत्वात् नास्तीत्यादि प्रयुक्तितः ॥ ९ ॥

संसर्गा इति वा? नाद्यः अनाप्तवाक्ये व्यभिचारात्, द्वितीयेऽपि संसर्गानिश्चय इति निष्कम्पप्रवृत्त्यसम्भवः इत्याशङ्क्याह "नियमस्यैव साध्यत्वम्" इत्यादि ॥ ६ ॥

आकाङ्क्षादीनां लक्षणान्याह, "आकाङ्क्षार्थतदाक्षिप्त—" इत्यादि । तथाच पदार्थानां तदाक्षिप्तानाञ्च योऽविनाभावः व्याप्तिः, तद्विशिष्टः संसर्गावगमप्रागभाव एवाकाङ्क्षा ॥ ७ ॥

"योग्यता तत्र तद्वत्त्वम्" इत्यादि । 'तत्र' पदार्थे, तत्पदार्थसंसर्गवत्त्वं योग्यता । 'तेषां' संसर्गिणां, 'अव्यवधानत्वम् आसत्तिः कथ्यते इत्यर्थः । "तद्बुद्धिः प्रागपेक्षिता" इति । 'तेषाम्' आकाङ्क्षायोग्यतासत्तीनां, 'बुद्धिः' प्रागपेक्षिता, शब्दप्रामाण्यवादिभिरपीति शेषः ॥ ८ ॥

'एते पदार्थाः मिथः संसर्गवन्तः, आकाङ्क्षादिमत्पदस्मारि-

दण्डीकरीतिवच्चात्र सम्बन्धानवगाहनात् ।
सम्बन्धशून्यौ शब्दार्थौ, शब्दादर्थस्मृतिः कथम् ॥१० ॥
शब्देभ्यः समयादर्थस्मरणं स च गृह्यते ।
व्यवहारादिभिः, सोऽयं जातिव्यक्तिगतो मतः ॥ ११ ॥
लिङ्गं प्रमाणं करणम् अपदेशस्तथैव च ।

तत्वात्' इत्युक्तानुमाने पदार्थानां पदस्मारितत्वमुक्तं, तच्चानुपपन्नं पद-पदार्थयोः सम्बन्धाभावात्, एकसम्बन्धिज्ञानं हि, अपरसम्बन्धिनं स्मारयति । न च शब्दानां पदानामर्थेन सम्बन्धोऽस्ति, सम्बन्धो हि भवन् संयोगो वा स्यात्, समवायो वा ? नाद्यः, इत्याह "अर्थबोधकशब्दानाम्" इत्यादि । 'कुत्रचित्' युक्त इत्यादौ । 'कर्मशून्यत्वात्' इति, अत्रापि 'अर्थानामपि कुत्रचित्' इत्यनुसज्यते । गुणे गुणानङ्गीकारात्, शब्दस्याकाशादेरर्थस्य च कर्मशून्यत्वाच्च शब्दार्थयोः नान्यतरकर्मजः संयोगः न वोभयकर्मज इत्यर्थः । 'नास्ति' इत्यादि । आदिपदात् भविष्यतीत्यादिग्रहः । तथा चासता समं न सम्बन्ध-सम्भव इति भावः ॥ ९ ॥

शब्दार्थयोः संयोगादिसंसर्गबोधकप्रतीत्यभावमाह "दण्डी करीतिवच्चात्र" इत्यादि । यथा दण्डी पुरुषः, करी कुञ्जर इति प्रतीतिरस्ति, न तथा घटवान् घटशब्द इत्यादिप्रतीतिर्विद्यते, येन तदभ्युपगम इति भावः ॥ १० ॥

सिद्धान्तयति "शब्देभ्यः समयात्" इत्यादि । 'समयः' सङ्केतः । 'स' समयः । 'सोऽयं' समयः जात्यवच्छिन्नव्यक्तिविषयः इत्यर्थः ॥११॥

हेतुः, पर्य्यायतैतेषाम् अचता शब्दलिङ्गता ॥ १२ ॥
यत्किञ्चिदविनाभावबलेनैव प्रवर्त्तते ।
यत्किञ्चित् सन्निकर्षेण करणानां द्वयी गतिः ॥ १३ ॥
सममर्थेन शब्दस्य सन्निकर्षो न विद्यते ।
नापि प्रसिद्धिरेषोऽर्थं तत् कथं प्रतिपादयेत् ॥ १४ ॥
इच्छामात्रन्तु सङ्केतः सुतरां न नियामकः ।
ईश्वरेच्छां विनाप्यस्ति स्फुटमर्थग्रहः क्वचित् ॥ १५ ॥
पदार्थगोचरश्चासौ तत्संसर्गे न विद्यते ।

"लिङ्गं प्रमाणं करणम्" इति । 'अपदेशः' शब्दः, अपदिश्यते कथ्यतेऽनेनार्थ इति व्युत्पत्तेः ॥ १२ ॥

करणानां द्वैविध्यमुपोद्घातेन दर्शयति "यत्किञ्चिदविनाभाव—" इति । प्रथमं 'यत्किञ्चित्' पदं धूमादिलिङ्गपरं, द्वितीयं 'यत्-किञ्चित्' पदं, चक्षुरादिपरम् । अविनाभावो व्याप्तिः ॥ १३ ॥

"सममर्थेन शब्दस्य" इत्यादि । 'प्रसिद्धिः' स्मर्य्यमाणा व्याप्तिः । 'एषः' शब्दः । तथा च शब्दस्य प्रमाणान्तरत्ववादिनये तस्य प्रमिति-करणत्वं दुर्लभम् इति भावः ॥ १४ ॥

सङ्केतात् शब्दोऽर्थं प्रतिपादयतु इत्यत्राह "इच्छामात्रन्तु सङ्केतः" इति । 'न नियामकः' इति, अतिप्रसङ्गादिति शेषः । अथेश्वरेच्छैव सङ्केत इति नातिप्रसक्तिः ? इत्यत्राह "ईश्वरेच्छां विनापि" इति । 'क्वचित्' गङ्गा-घोषादौ ॥ १५ ॥

अन्यसङ्केततोऽन्यस्य नाप्युपस्थितिसम्भवः ॥ १६ ॥
शब्दस्मारितसंसर्गतयैव नियमो यदि।
तदा तु सुतरां लब्धावसरं लैङ्गिकं भवेत् ॥ १७ ॥
अन्याप्यस्त्वनुमा, तस्मात् कणभच्यमुनेर्मते।
लैङ्गिकेऽन्तर्गतं शाब्दं न तस्मादतिरिच्यते ॥ १८ ॥
यत्र व्याप्तिग्रहो नास्ति तत्रार्थस्मरणं परम्।
अलौकिकं मानसं वा संसर्गमवगाहते ॥ १९ ॥
व्याप्तिविज्ञानसापेक्षम् उपमानं तदप्यतः।

किञ्च "पदार्थ-गोचरस्यासौ" इत्यादि। 'असौ' सङ्केतः। तथा च सङ्केतस्य नियामकत्वे वाक्यार्थबोधानुपपत्तिरिति भावः। 'नाप्युपस्थितिसम्भवः' इति, अतिप्रसङ्गादिति शेषः ॥ १६ ॥

ननु शब्दस्मारितसंसर्गत्वेनैव नियम इति चेत्? नियमस्य व्याप्तिघटितत्वात् एतन्नियमबलेन लैङ्गिकस्यैवावसरलाभ इति जितं वैशेषिकैरित्येतदेवाह "शब्दस्मारितसंसर्गतयैव" इत्यादि ॥ १७ ॥

"अन्याप्यस्त्वनुमा" इत्यादि। गौरस्तितावान् स्वधर्म्मिकास्तित्वान्वयबोधानुकूलाकाङ्क्षाश्रयपदस्मारितत्वात् इत्यादिरूपा ॥१८॥

"यत्र व्याप्तिग्रहो नास्ति" इत्यादि। 'परं' केवलम्। तथा च व्याप्त्यनुसन्धानाऽभावे पदार्थस्मरणमेव जायते न विशिष्टबोध इति भावः। "अलौकिकं मानसं वा" इति। तथा च पदार्थस्मरणानन्तरम् अलौकिकमानस एव विशिष्टबोध इत्यर्थः ॥ १९ ॥

अनुमानं विना व्याप्तिं तज्जन्या धीर्न जायते ॥ २० ॥
प्रमाणान्तरतैतस्माद् अर्थापत्तेर्न विद्यते ।
अविनाभावविज्ञानं नियमात् सा ह्यपेक्षते ॥ २१ ॥

उपमानस्यापि अनुमानेन गतार्थत्वमाह "व्याप्तिविज्ञान-सापेक्षम्" इति । गोसदृशो गवय इत्यारण्यकवाक्यश्रवणानन्तरं कदाचिदरण्यं गतस्य नागरिकस्य गवयप्रत्यक्षे सति तद्वाक्यार्थ-स्मरणानन्तरं गवयो गवयपदवाच्य इति बुद्धिरुपमानजन्येति न्याय-विदः । कणादमते तु, गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वादि-त्यनुमानेनैवात्रापि निर्वाहः । उक्तानुमाने च पक्षधर्मताबलाद्गव-यत्वप्रवृत्तिनिमित्तकत्वं पर्य्यवस्यतीत्यनुसन्धेयम् ॥ २० ॥

मीमांसकाः अर्थापत्तिनामकं प्रमाणान्तरमङ्गीकुर्व्वन्ति । कणा-दनये तस्यापि लैङ्गिकान्तर्भावमाह "प्रमाणान्तरतैतस्मात्" इति । 'एतस्मात्' अनुमानात् । अर्थापत्तिस्तावत् द्विविधा, दृष्टार्थापत्तिः श्रुतार्थापत्तिश्च । तत्र दृष्टार्थापत्तिस्तावत् जीविनो देवदत्तस्य गृहासत्त्वमुपलभ्य वहिःसत्त्वं कल्पयति, गृहेऽसतो वहिर-प्यसत्त्वे जीवित्वस्यानुपपत्तेः । श्रुतार्थापत्तिस्तु पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र दिवाऽभुञ्जानस्य रात्रावप्यभोजने पीनत्वमेवानुप-पन्नमिति रात्रिभोजनं कल्पयति । तत्र दृष्टार्थापत्तिरनुमानमेव । भवति हि जीविनो गृहासत्त्वं वहिःसत्त्वेन सहचरितं, स्वशरीर-एव च सुकरो व्याप्तिग्रहः । अत्रायं प्रयोगः ; देवदत्तो वहिर्विद्यते जीवित्वे सति गृहेऽसत्त्वादिति । श्रुतार्थापत्तिरप्यनुमितानुमानम् ।

कार्य्याभावात् कारणानाम् अभावस्यानुमा भवेत्।
कार्य्येण कारणस्येव नाभावोऽप्यतिरिच्यते ॥ २२ ॥
अभावग्राहकस्यापि न मानान्तरतेष्यते।
अक्षव्यापारसद्भावात् क्वचित्, व्याप्तिबलात् क्वचित् ॥ २३ ॥
सम्भवोऽप्यनुमानं वा प्रमाणादन्यदेव वा।
यथायथं विवेक्तव्यम् ऐतिह्यस्यापि सा गतिः ॥ २४ ॥

पीनो देवदत्त इत्यादिवाक्येन पीनत्वमनुमाय तेनैव लिङ्गेन रात्रि-भोजनानुमानात्। अयमत्र प्रयोगः, देवदत्तो रात्रौ भुङ्क्ते दिवाऽभोजित्वे सति पीनत्वाद् इति ॥ २१ ॥

अनुपलब्धिरभावग्रहे कारणमिति प्रत्यक्षनिरूपणे निरूपितम्। केचित् तामेव प्रमाणान्तरं मन्यन्ते, तदपि निराकरोति "अभावग्राहकस्यापि" इति। तत्रानुपलब्धिर्द्विविधा ; अज्ञाता, ज्ञाता च। तत्राज्ञातानुपलब्धिस्थले इन्द्रियेणैवाभावग्रहः तावत्पर्य्यन्तमिन्द्रियव्यापारस्य विद्यमानत्वात्। अनुपलब्धिस्तु सहकारिकारणमात्रं ज्ञातानुपलब्धिस्थले त्वनुमानमिति नानुपलब्धिर्मानान्तरम्। कारिकायां प्रथम-क्वचित्पदम् अज्ञातानुपलब्धिस्थलपरं, द्वितीय—क्वचित्-पदञ्च ज्ञातानुपलब्धिस्थलपरमिति बोध्यम् ॥ २३ ॥

पौराणिकाः सम्भवमैतिह्यञ्च प्रमाणान्तरमाहुः, तदपि निराकरोति " सम्भवोऽप्यनुमानं वा" इति। भूयःसहचाराधीनं हि ज्ञानं सम्भव इत्युच्यते, यथा सम्भवति सहस्रे शतं, सम्भवति ब्राह्मणे विद्या इत्यादि। तत्र सम्भवति सहस्रे शतमित्यनुमानमेव, सहस्रं

विरोधादेः करणिका व्याप्तिधीपूर्वकत्वतः।
कणभक्ष्यमुनेः पक्षे लैङ्गिकेऽन्तर्भविष्यति ॥ २५ ॥
चेष्टापि काचित् शब्दस्य स्मारिका लिपिवत् परम्।
स्मृत्यारूढ़स्तु शब्दोऽत्र प्रमाणं लिङ्गमेव सः ॥ २६ ॥

शतवत् तद्घटितत्वादित्यादिप्रयोगसम्भवात्। सम्भवति ब्राह्मण विद्या इत्यादिकन्तु प्रमाणमेव न भवति अनिश्चायकत्वादिति भावः। "ऐतिह्यस्यापि सा गतिः" इति। ऐतिह्यमप्यनुमानम् अप्रमाणं वा इत्यर्थः। अनिर्द्दिष्टप्रवक्तृकं हि प्रवादपारम्पर्य्यमात्रमैतिह्यमित्युच्यते, यथेह वटे यक्षः प्रतिवसतीति। तदेतदैतिह्यम् आप्तोक्तञ्चेत् शब्दान्तर्भावादनुमानमेव, न चेत् प्रमाणमेव न भवतीति-भावः ॥ २४ ॥

विरोधकरणिकायाः संशयकरणिकायाश्चानुमानान्तर्भावमाह "विरोधादेः करणिका" इति। आदिपदात् संशयपरिग्रहः। 'व्याप्तिधीपूर्वकत्वतः' इति। सहानवस्थाननियमलक्षणो विरोधोऽपि व्याप्तिघटित एवेति भावः। 'लैङ्गिके' अनुमाने। स्वार्थे ठक् ॥ २५ ॥

चेष्टापि प्रमाणान्तरमिति केचिद् वदन्ति, तदपि निरस्यति "चेष्टापि काचित् शब्दस्य" इति। तत्र चेष्टा तावत् द्विविधा, कृतसमया, अकृतसमया च। तत्र कृतसमया लिप्यादिवत् अभिप्रेतं शब्दमेव स्मारयति, न किञ्चित् प्रमापयति इति लिपिरिव सापि न प्रमाणमिति भावः। 'काचित्' कृतसमया। 'परं' केवलम् ॥ २६ ॥

अन्याभिप्रायमन्यापि स्मारयन्त्येव केवलम्।
अन्यं प्रवर्त्तयत्यन्ये बोधं मानसमूचिरे ॥ २७ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कारप्रणीतायां तत्त्वावलौ
प्रमाणपरिचिन्तनाभिधेय-तृतीयपरिच्छेदस्य
तृतीयं प्रकरणम्।

"अन्याभिप्रायमन्यापि" इति। 'अन्याभिप्रायं' प्रयोजकाभिप्रायम्। 'अन्या' अकृतसमया। 'अन्यं' प्रयोज्यम्। अयमर्थः शङ्खध्वनौ त्वया आगव्यमिति शङ्खध्वनिं श्रुत्वा आगच्छति, यदा मया तर्जनी ऊर्द्ध्वीक्रियते तदा त्वयासौ ताड़नीय इति तथाविधकरणे ताड़यति। तथा चानया चेष्टया केवलं पदार्थाः स्मार्य्यन्ते न तु तेषां संसर्गोऽपि बोध्यते इति प्रमितिविरहात् न प्रमाणत्वमस्या इति भावः। अन्ये तु मानसं बोधमाहुः ॥ २७ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां
प्रमाणपरिचिन्तननामकतृतीयपरिच्छेदस्य
तृतीयप्रकरण-टीका समाप्ता।

प्रमाणपरिचिन्तन-नामक

तृतीयपरिच्छेदे

चतुर्थं प्रकरणम्।

नानारूपानेकरसा सस्पर्शा गन्धवत्यपि।
पृथिव्यसम्भवो नास्ति पाषाणे रसगन्धयोः ॥ १ ॥
तद्भस्मन्युपलभ्येते रसगन्धौ स्फुटं ततः।
अनुत्कटत्वादेवात्र न तयोरुपलम्भनम् ॥ २ ॥
स्पर्शोऽस्यां पाकजोऽनुष्णाशीत एव प्रकीर्त्तितः।
सुरभ्यसुरभित्वाभ्यां गन्धोऽपि द्विविधः स्मृतः ॥ ३ ॥
तन्तुष्वभावाद् वस्त्रेषु पुष्पगन्धो न विद्यते।

इदानीं पृथिव्यादीनां लक्षणान्यभिधित्सुरादौ तावत् पृथिवी-लक्षणमाह "नानारूपानेकरसा" इति। पाषाणे रसगन्धयोरसम्भवमाशङ्क्याह "असम्भवो नास्ति" इति ॥ १ ॥

"तद्भस्मन्युपलभ्येते" इति। तथा च पाषाणारम्भकावयवानामेव तद्भस्मारम्भकतया पाषाणेऽपि गन्धादिकमिति भावः ॥ २ ॥

अन्वयव्यतिरेकाभ्याम् उपाधिकृत एव सः ॥ ४ ॥
समीरणोऽसौ सुरभिरित्याद्या अपि बुद्धयः ।
उपाधिभिः प्रजायन्ते पार्थिवांशैस्तथाविधैः ॥ ५ ॥
स्वाभाविकः क्षितौ गन्धस्ततः स्पर्शोऽपि तादृशः ।
उष्णस्पर्शादिबोधस्तु तेजोभागादितो भवेत् ॥ ६ ॥
शुक्लं रूपं तथा स्नेहः शीतस्पर्शो द्रवत्वकम् ।
सांसिद्धिकं रसश्चापि मधुरो जललक्षणम् ॥ ७ ॥
कालिन्द्यादिजले नैल्यम् आश्रयौपाधिकं मतम् ।
तस्मिन् वियति विक्षिप्ते धावल्यस्योपलम्भनात् ॥ ८ ॥
सर्पिरादौ जलस्यैव स्नेहः प्राकर्ष्यतः पुनः ।
दहनस्यानुकूलोऽसौ अप्रकृष्टो विरोधवान् ॥ ९ ॥

पृथिव्या अन्यत्र गन्धस्यौपाधिकत्वं व्यवस्थापयितुमाह "तन्त्वभावात् वस्त्रेषु" इत्यादि ॥ ४ ॥

अपां लक्षणमाह "शुक्लं रूपं तथा स्नेहः" इत्यादि । अत्र अभास्वरशुक्लरूपमपां लक्षणं बोध्यं, भास्वरशुक्लरूपस्य तेजोलक्षणत्वात् ॥ ७ ॥

सर्पिरादिपृथिवीष्वपि स्नेहसत्त्वात् कथं तस्य जललक्षणत्वम् ? इत्यत्राह "सर्पिरादौ जलस्यैव" इति । सर्पिराद्युपष्टम्भकजलस्यैव स्नेहः न तु सर्पिरादेरित्यर्थः । सर्पिरादौ जलसत्त्वे कथमग्निविरो-

अप्स्वेव शीतलः स्पर्शो वाय्वादावपि तत्कृतः ।
औष्ण्यं सूरकरादीनां जलेष्वप्यनुभूयते ॥ १० ॥
सर्पिर्जतुमधूच्छिष्ट-पृथिवीष्वग्नियोगतः ।
द्रवत्वमद्भिः सामान्यम् अपां सांसिद्धिकन्तु तत् ॥ ११ ॥
त्रपुशीशसुवर्णादितेजःस्वप्येवमिष्यते ।
माधुर्य्यमपि तोयेषु कषायद्रव्यभक्षणात् ॥ १२ ॥
अनन्तरं सहृदयैः साक्षादेवोपलभ्यते ।
कषायभक्षणं तस्य व्यञ्जकं परिचक्षते ॥ १३ ॥
श्रीखण्डसन्नियोगेन शीतत्वोल्वणता यथा ।
कषायाशनतस्तद्वन् माधुर्य्योल्वणता जले ॥ १४ ॥

धित्वं न स्यात्? इत्याशङ्क्य तत्र जले स्नेहस्योत्कृष्टत्वात् नाग्नि-विरोधिता, स्नेहस्यापकृष्टत्व एव हि सा, इत्येतदेवाह "प्राकर्ष्यतः पुनः" इत्यादि ॥ ९ ॥

वाय्वादौ शीतस्पर्शस्य, मध्यन्दिनादौ जले उष्णस्पर्शस्य चौपाधि-कत्वमाह "अप्स्वेव शीतलः स्पर्शः" इत्यादि ॥ १० ॥

सर्पिरादौ द्रवत्वमतिव्याप्तमित्याशङ्क्याह "सर्पिर्जतुमधूच्छिष्ट—" इत्यादि । 'सामान्यं' समानं, तुल्यमिति यावत् । अयमर्थः, घृतादौ नैमित्तिकद्रवत्वमेवास्ति, तत् तु जलगत-सांसिद्धिकद्रवत्वतुल्यं, नतु सांसिद्धिकमेव, सांसिद्धिकञ्च द्रवत्वं जललक्षणमिति नाति-व्याप्तिः ॥ ११ ॥

हरीतक्यां न माधुर्य्यं जलाभिव्यङ्ग्यता कुतः।
रसः कषाय एवास्याः स एव ह्यनुभूयते॥ १५॥
जलान्मधुरिमोत्पत्तिरेतस्यां नास्ति गौरवात्।
अन्यथा जलसंयोगात् पात्रेऽपि मधुरास्तु सा॥ १६॥
कर्कटीभक्षणादस्तु तिक्तता योपलभ्यते।
कर्कट्या एव सा, तत्र विनापि जलमस्त्यसौ॥ १७॥
जम्बीरादिरसेष्वाम्लं करवीररसादिषु।
तैक्ष्यञ्च यत्, तदप्यत्र पार्थिवौपाधिकं मतम्॥ १८॥
परप्रकाशकं रूपम् उष्णस्पर्शश्च तेजसः।
उष्मादौ तादृशं रूपं तेजस्त्वेनानुमीयते॥ १९॥
उष्णस्पर्शेन तेजस्त्वं चान्द्रे तस्यानुमेयता।

ननु, कषायभक्षणस्य जलगतमाधुर्य्यव्यञ्जकत्वे मानाभावात्, हरीतक्यां सदैव माधुर्य्यं जलव्यङ्ग्यमित्येव किं न स्यादित्यत्राह "हरीतक्यां न माधुर्य्यम्" इत्यादि॥ १५॥

अथ हरीतक्यामसदपि माधुर्य्यं जलसंयोगादुत्पद्यतामित्याशङ्क्याह "जलान्-मधुरिमोत्पत्तिः" इति॥ १६॥

तेजोलक्षणमाह "परप्रकाशकं रूपम्" इति। 'तेजसः' इति, लक्षणमिति शेषः॥ १९॥

उष्मादौ तेजस्त्वमेव कुत इत्यत्राह "उष्णस्पर्शेन तेजस्त्वम्"

स्पर्शेन तु जलीयेन सोऽभिभूतो बलीयसा ॥ २० ॥
न लक्ष्यतेऽस्य रूपन्तु स्फुटमन्यप्रकाशकम् ।
चतुर्विधं हि तेजो, यत् किञ्चिदुद्भूतरूपवत् ॥ २१ ॥
स्फुटस्पर्शञ्च सौरादि, यत्किञ्चित् नायनादिकम् ।
विपरीतं ततः, किञ्चिद् उद्भूतस्पर्शमिष्यते ॥ २२ ॥
अव्यक्तरूपं नैदाघ-वारिप्रभृतिषु स्थितम् ।
अस्फुटस्पर्शवत् किञ्चित् चान्द्रमुद्भूतरूपवत् ॥ २३ ॥
वायोर्विलक्षणः स्पर्शो लक्षणं परिकीर्त्तितम् ।
शैत्यादिसलिलादिभ्यस्तथैवाचोपलम्भनात् ॥ २४ ॥
सास्नावत्त्वं ककुद्वत्त्वं विलक्षणविषाणिता ।
गोत्वे पुच्छविशेषश्च दृष्टं लिङ्गमुदाहृतम् ॥ २५ ॥

इति । "चान्द्रे तस्यानुमेयता" इति । 'तस्य' उष्णस्पर्शस्य ॥ २० ॥

नन्वेवं तस्य तेजस्त्वमेव कुतः सिध्यति ? इत्याशङ्क्याह "न लक्ष्यतेऽस्य रूपं तु स्फुटमन्यप्रकाशकम्" इति ॥ २१ ॥

"विपरीतं ततः, किञ्चिदुद्भूतस्पर्शमिष्यते" इति । 'विपरीतम्' अनुद्भूतरूपस्पर्शम् ॥ २२ ॥

क्रमप्राप्तं वायुलक्षणमाह "वायोर्विलक्षणः स्पर्शः" इति । 'विलक्षणः' अपाकजोऽनुष्णाशीतः ॥ २४ ॥

वायोरप्रत्यक्षत्वादनुमानमेव तत्र प्रमाणमिति मनसि निधाय,

तद्वद्विलक्षणस्पर्शो वायुलिङ्गमिहेष्यते ।
पर्णादीनां तथा शब्दस्तृणादेर्गगने धृतिः ।
कम्पः शाखातृणादीनां च शब्देन समुच्चिताः ॥ २६ ॥
दृष्टानां स्पर्शतो नास्मिन् विद्यते सिद्धसाधनम् ।
तेषामुद्भूतरूपेण साहचर्य्योपलम्भनात् ॥ २७ ॥
स्पर्शवद्वेगद्रव्याभिघातेन प्रजायते ।
पर्णादिशब्दो दण्डाभिघातैर्भेर्य्यादिशब्दवत् ॥ २८ ॥

दृष्टानुसारेणानुमानप्रामाण्यदार्ढ्यार्थमाह "सास्नावत्त्वं ककुद्वत्त्वम्" इति । तथा च यथा गोत्वे सास्नावत्त्वादीनि लिङ्गानि प्रामाण्यमासादयन्ति, तथा अतीन्द्रिये वायावपि स्पर्शः प्रमाणमेव लिङ्गमित्यभिप्रायः । "विलक्षणविषाणिता" इति । मेषमहिषादिविषाणेभ्यो गोविषाणस्य किञ्चिदस्त्येव वैलक्षण्यं निपुणसंवेद्यमिति भावः । "पुच्छविशेषश्च" इति । अश्वादिपुच्छानां हि सामस्त्येनैव बालमयत्वं, महिषादिपुच्छानां तु न तादृशं प्रलम्बत्वादि, इत्यस्ति गोपुच्छस्य वैशेष्यमिति भावः । अत्रायं प्रयोगः, अयं गौः सास्नावत्त्वात्, पूर्वानुभूतवत् इति । एवमन्यत्राप्यूह्यम् ॥ २५ ॥

"पर्णादीनां तथा शब्दः" इत्यादि । "च-शब्देन समुच्चिताः" इति । 'च-शब्देन' "स्पर्शश्च वायोः" इति सूत्रस्थचकारेण ॥ २६ ॥

येन स्पर्शेन वायुः साध्यते, पृथिव्याद्यन्यतमस्यैव स स्पर्शोऽस्तु, इत्याशङ्क्याह, "दृष्टानां स्पर्शतो नास्मिन्" इति । 'दृष्टानां' पृथिव्यप्तेजसाम् । "साहचर्य्योपलम्भनात्" इति, घटादिष्विति शेषः॥२७॥

भेरीवदेव तस्यापि नाङ्गं किञ्चिद् विभज्यते ।
तृणतूलाम्बुदादीनां धृतिर्या व्योम्नि लक्ष्यते ॥ २९ ॥
स्पर्शवद्वेगवद् द्रव्य-संयोगजनितैव सा ।
नद्यादौ तृणनौकादि-धृतिवत् चेतनोऽपि न ॥ ३० ॥
ईश्वरादपरः कश्चिद् अधिष्ठातात्र विद्यते ॥ ३१ ॥
शाखादीनां प्रकम्पोऽपि तादृग्द्रव्याभिघातजः ॥ ३२ ॥

पर्णादिशब्दस्य लिङ्गतामुपपादयति, "स्पर्शवद् वेगवद्द्रव्याभिघातेन" इत्यादि । दृष्टान्तमाह, "दण्डाभिघातैर्भेर्यादिशब्दवत्" इति ॥ २८ ॥

साम्यं स्फुटयति, "भेरीवदेव" इति । 'तस्य' पर्णादेः । तथा चायं प्रयोगः, पर्णादिशब्दः स्पर्शवद्वेगवद्द्रव्याभिघातजन्यः, अविभज्यमानावयवद्रव्यसम्बन्धिशब्दत्वात्, दण्डाभिघातजन्यभेरीशब्दवत् इति । धृतेर्लिङ्गतामुपपादयति, "तृणतूलाम्बुदादीनाम्" इत्यादि ॥ २९ ॥

दृष्टान्तमाह, "नद्यादौ" इत्यादि । साम्यं दर्शयति, "चेतनोऽपि न" इत्यादि ॥ ३० ॥

"ईश्वरात्" इति । उभयत्रापि ईश्वरान्यश्चेतनो नाधिष्ठाता इत्यर्थः । अत्रायं प्रयोगः । नभसि तृणादीनां धृतिः स्पर्शवद्वेगवद्द्रव्यसंयोगजन्या, ईश्वरान्यचेतनानधिष्ठितद्रव्यधृतित्वात्, नद्यादौ तृणादिधृतिवत् इति ॥ ३१ ॥

कम्पस्य लिङ्गतामुपपादयति, "शाखादीनां प्रकम्पोऽपि" इति ॥ ३२ ॥

धर्माद्यजन्यकर्मत्वात्, नदीपूराहतं किल ।
कम्पते वेतसवनम् एतेषु परिशेषतः ॥ ३३ ॥
भासते वायुरेवान्यत् चिन्तनीयं मनीषिभिः ॥ ३४ ॥
वायुसंमूर्च्छनं तस्य नानात्वे लिङ्गमिष्यते ।
तृणादेरूर्द्ध्वगमनात् तत्तस्याप्यनुमीयते ॥ ३५ ॥
तस्मादनुमितात् पश्चादनुमेयं तु मूर्च्छनम् ।
नदीप्रवाहयोरेतत् दृष्टं मूर्च्छनमाद्यतः ॥ ३६ ॥
दृष्टत्वेऽपि च लिङ्गस्य पवनोऽदृष्टलिङ्गकः ।
तेनागृहीतव्याप्तित्वादिन्द्रियेन न तद्ग्रहः ॥ ३७ ॥

दृष्टान्तमाह, "नदीपूराहतम्" इत्यादि । "एतेषु परिशेषतः" इति । 'एतेषु' अनुमानेषु । 'परिशेषतः' इति । तथा चोक्तानुमानेषु, इतरबाधाद् वायुलाभ इति भावः ॥ ३३ ॥

वायुनानात्वं साधयति, "वायुसंमूर्च्छनं तस्य" इति । समानवेगयोर्विरुद्धदिग्गामिनोः सन्निपातः संमूर्च्छनम् । ननु वायोरप्रत्यक्षतया तत्सन्निपातोऽपि तथेति स एवासिद्धः कथं वायुनानात्वे लिङ्गभावमुपगच्छतीत्याशङ्क्याह, "तृणादेरूर्द्ध्वगमनात्" इत्यादि । 'तत्' ऊर्द्ध्वगमनम् । 'तस्य' वायोः ॥ ३५ ॥

"तस्मादनुमितात् पश्चात्" इत्यादि । 'तस्मात्' ऊर्द्ध्वगमनात् । 'एतत्' ऊर्द्ध्वगमनम् ॥ ३६ ॥

"दृष्टत्वेऽपि च लिङ्गस्य" इत्यादि । 'लिङ्गस्य' स्पर्शस्य, 'दृष्ट-

प्रत्यक्षेणाविनाभावो ग्राह्यो यदि न विद्यते।
मरुतामनुमानाय दृष्टं लिङ्गं तु दूरतः॥ ३८॥
लिङ्गात् सामान्यतो दृष्टाद् अविशेषः प्रतीयते।
तस्मादागामिकं नाम वायुरित्येवमादिकम्॥ ३९॥
गगने ते न विद्यन्ते कालादौ समवायतः।
धावल्यात् सुरमहसाम् आकाशे तादृशी मतिः॥ ४०॥

त्वेऽपि' प्रत्यक्षत्वेऽपि, पवनोऽदृष्टलिङ्गक इत्युच्यते। कुत इत्यत आह, 'तेन' इति। तत्र हेतुः 'इदन्त्वेन' इति। तथा च वायोरप्रत्यक्षतया इदन्त्वेन धर्मिणमुपन्यस्य व्याप्तिग्रहासम्भवाददृष्टलिङ्गकत्वमुच्यते, यत्र हि प्रत्यक्षेण व्याप्तिग्रहस्तत्रैव दृष्टलिङ्गतेति भावः॥ ३७॥

तदेव विशदयति, "प्रत्यक्षेण" इत्यादि॥ ३८॥

"लिङ्गात् सामान्यतो दृष्टात्" इत्यादि। 'अविशेषः' इति। विशेषो वायुत्वं, तद्रहित इत्यर्थः। अयमाशयः। उपलभ्यमानस्पर्शः क्वचित् आश्रितः स्पर्शत्वादिति सामान्यतो दृष्टमेवेतरबाधसहकृतम् अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं साधयति, सुतरामष्टद्रव्यातिरिक्तद्रव्यत्वेनैव वायुरपि साध्यतावच्छेदककोटौ भासते इति न वायुत्वेन तदवगमोऽनुमानात् सम्भवति इति॥ ३९॥

"गगने ते न विद्यन्ते" इति। 'ते' रूपादयः पृथिव्यादिलक्षणानि गगने न सन्तीत्यर्थः। कालादौ यद्यपि रूपादीनि सन्ति, तथापि समवायेन न सन्तीति नातिव्याप्तिः, समवायेनैव रूपादीनां

नैल्यादिबुद्धयोऽप्येवं सुमेरुशिखरप्रभाम्।
पश्यतां पिङ्गलाक्षाणां तद्बुद्धेर्न कनीनिकाम् ॥ ४१ ॥
तानि चत्वारि भूतानि नित्यानित्यविभेदतः।
द्विविधानि तयोर्नित्यं परमाणुं प्रचक्षते ॥ ४२ ॥
सदकारणवन्नित्यं कार्य्यं तस्यानुमापकम् ॥ ४३ ॥
अनन्तावयवत्वस्य तुल्यत्वात् तुल्यतान्यथा।
सुमेरोः सर्षपस्यापि स्फुटमेव प्रसज्यते ॥ ४४ ॥

पृथिव्यादिलक्षणत्वाद् इत्यभिप्रायः। तर्हि कथं धवलमाकाशमिति प्रतीतिरित्यत्राह, "धावल्यात्" इत्यादि ॥ ४० ॥

"नैल्यादिबुद्धयोऽप्येवम्" इति। सुमेरोरिन्द्रनीलमयस्य शिखरस्य प्रभां पश्यतां नीलमाकाशमिति बुद्धिरुदेति। एवमन्यत्राप्यूह्यम्। दूरात् परावर्त्तमानस्य चक्षुषः कनीनिकोपलम्भात् तथाभिमानमिति मतं निरस्यति, "पिङ्गलाक्षाणाम्" इति। तथात्वे हि पिङ्गलाक्षाणां तथैव प्रतीतिः स्यात्, न नैल्यप्रतीतिरिति भावः॥४१॥

नित्यलक्षणमाह, "सदकारणवन्नित्यम्" इति। 'सत्' सत्तायोगि, 'अकारणवत्' प्रागभावाप्रतियोगि। समवायादीनां सत्त्वैकार्थसमवायः, सत्तायाश्च स्वरूपसत्त्वैव सत्तायोग इति बोध्यम्। ईदृशपरमाणुः कुतोऽवगम्यते? इत्यत्राह, "कार्य्यं तस्यानुमापकम्" इति ॥ ४३ ॥

विपक्षे दोषमाह, "अनन्तावयवत्वस्य" इत्यादि। 'अन्यथा' परमाणोरनभ्युपगमे। तथा च अवयवधारायाः क्वचिदपि विश्रामा-

अवश्यं कुत्रचित् तस्माद् विश्रान्ता तत्परम्परा ।
द्रव्यमेतद्विनिर्मुक्तं तस्यावधिरिहेष्यते ॥ ४५ ॥
अनेकद्रव्यवृत्तित्वात् चाक्षुषत्वाच्च न त्रुटिः ।
महदारम्भकत्वाच्च द्व्यणुको न कपालवत् ॥ ४६ ॥
न सन्त्यवयवास्तस्य हेतुर्नात्र प्रयोजकः ।
त्रुटौ जन्यमहत्त्वं तु तर्कं सम्पादयिष्यति ॥ ४७ ॥

भावे, अनन्तावयवारब्धत्वाविशेषात्, सुमेरु सर्षपयोरपि साम्यप्रसङ्ग इति भावः ॥ ४४ ॥

"अवश्यं कुत्रचित् तस्मात्" इति । 'तत् परम्परा' अवयवपरम्परा । 'एतद्विनिर्मुक्तम्' अवयवविनिर्मुक्तम् ॥ ४५ ॥

त्रुटावेव विश्रामोऽस्तु? इत्याशङ्क्याह, "अनेकद्रव्यवृत्तित्वात्" इति । अत्रायं प्रयोगः, त्रसरेणुः सावयवः, चाक्षुषद्रव्यत्वात् घटवत् इति । अथास्तु द्व्यणुक एव विश्रामः? इत्यत्राह, "महदारम्भकत्वात्" इति । अयमत्र प्रयोगः, द्व्यणुकः सावयवः महदवयवत्वात् कपालवदिति ॥ ४६ ॥

ननु परमाणुः सावयवः महदवयवावयवत्वात् कपालावयववत् इत्यत्राह, "न सन्त्यवयवास्तस्य" इत्यादि । 'हेतुर्नात्र प्रयोजकः' इति । तथा चानुकूलतर्कविरहादप्रयोजकोऽयं हेतुरिति भावः । नन्वेवं त्रुटावेव विश्रान्तिरास्तां, त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् इत्यत्राप्यप्रयोजको हेतुरित्याशङ्क्याह, "त्रुटौ जन्यमहत्त्वं तु" इति । तथा च त्रसरेणोः प्रत्यक्षतयाऽनेकद्रव्यवत्त्वप्रयोज्य

नोत्पद्यते कारणानां विरहात् समवायिनाम्।
सुतरां नाशकाभावात् तदेतन्न विनश्यति ॥ ४८ ॥
अनित्य इत्येवमादि प्रतिषेधो विशेषतः।
नित्यसिद्धौ बाधितत्वाद् असिद्धौ सिद्धसाधनात् ॥ ४९ ॥
अपि चानित्यमित्युक्ते नित्यस्याप्युपलम्भनात्।
अनित्यं सर्वमित्येषा प्रतिज्ञा नार्थसाधिनी ॥ ५० ॥
धर्मिग्राहकमानेन बाधिताः किल हेतवः।
न साधयितुमर्हन्ति परमाणोरनित्यताम् ॥ ५१ ॥
व्याप्यत्वासिद्धिरेतेषु केषुचित्, केषुचित् पुनः।
स्वरूपासिद्धिरन्येषु संशयोऽप्यस्ति हेतुषु ॥ ५२ ॥
रूपादेः कारणे भावाद् भावः कार्य्येषु दृश्यते।

जन्यमहत्त्वम उभयवादिसिद्धमिति तदेवानुकूलतर्कसम्पादकमिति भावः ॥ ४७ ॥

सर्व्वमनित्यमिति मतं दूषयति, "अनित्य इत्येवमादि—" इति। 'विशेषतः' वस्तुविशेषमाश्रित्येत्यर्थः ॥ ४९ ॥

ननु परमाणुरनित्यः, द्रव्यत्वात्, मूर्त्तत्वात्, रूपवत्वात्, सावयवत्वात्, सत्त्वात्, वा, घटादिवत्। एवं रसवत्त्वादेरपि हेतुत्वमुन्नेयम्। तथाच कथं परमाणोर्नित्यत्वम्, इत्याशङ्क्याह, "धर्म्मिग्राहकमानेन" इत्यादि ॥ ५१ ॥

तस्य द्रव्यत्वमप्यस्मात् कर्मवत्त्वाच्च सिध्यति ॥ ५३ ॥

कार्य्यद्रव्यमनित्यं स्यात् स्थैर्य्यावयवयोगि तत् ।
शरीरमिन्द्रियञ्चैव विषयश्चेति तत् त्रिधा ॥ ५४ ॥

अन्त्यावयविमात्रस्थ-चेष्टावद्वृत्तिजातिमत् ।
शरीरं, तन्न चेष्टावन्मात्रं निश्चेष्टदर्शनात् ॥ ५५ ॥

जातिं चैत्रत्वमैत्रत्व-मनुष्यत्वादिकां पुनः ।
आदाय मानुषादीनां देहेष्वस्य समन्वयः ॥ ५६ ॥

अन्यो वा कश्चनोपाधि-भेद एवास्तु देहता ।
शरीरत्वस्य जातित्वं न क्षितित्वादिसङ्करात् ॥ ५७ ॥

योनिजायोनिजत्वाभ्यां शरीरं पार्थिवं द्विधा ।
शुक्रशोणितसम्पर्काद् योनिजं खलु जायते ॥ ५८ ॥

परमाणौ रूपादिकं साधयति, "रूपादेः कारणे भावात्" इति । कारणगुणपूर्वका एव हि कार्य्यगुणा घटादौ दृष्टा इति भावः ॥५३॥

शरीरं लक्षयति, "अन्त्यावयविमात्रस्थचेष्टावद्वृत्तिजातिमत्" इति । द्रव्यत्वादिवारणाय अन्त्यावयविमात्रस्थेति । घटत्वादिवारणाय चेष्टावद्वृत्तीति । घटशरीरसंयोगवारणाय जातीति ॥ ५५ ॥

"शरीरत्वस्य जातित्वम्" इति । घटादौ क्षितित्वमेव, न शरीरत्वं, तैजसादिशरीरे शरीरत्वमेव न क्षितित्वं, पार्थिवशरीरे शरीरत्वं क्षितित्वञ्चास्तीति साङ्कर्य्यम् ॥ ५७ ॥

जरायुजाण्डजलाभ्यां तदपि द्विविधं स्मृतम्।
अन्यं सरीसृपादीनां पश्वादीनां तथादिमम्॥ ५९ ॥
अध्यक्षाध्यक्षभिन्नानाम् अनध्यक्षत्वदर्शनात्।
संयोगस्य, न तत् किञ्चिद् विद्यते पाञ्चभौतिकम्॥ ६० ॥
चातुर्भौतिकताप्येवं प्रतिक्षेप्यापरीक्षकैः।
नापि तत् त्र्यात्मकं तत्र न गुणान्तरमीक्ष्यते॥ ६१ ॥
स्वाभाविकत्वात् गन्धस्य तस्मात् पार्थिवमेव तत्।
परिशुष्कशरीरेषु क्लेदाद्यनुपलम्भनात्॥ ६२ ॥
विजातीयाणुसंयोगस्त्वनिषिद्धस्ततः पुनः।
जलाद्युपष्टम्भवशात् क्लेदाद्यास्ताश्विहापि च॥ ६३ ॥
शुक्रशोणितसम्पर्कमन्तराऽयोनिजं भवेत्।
तद्दंशमशकादीनाम् ऋषीणाञ्च प्रचक्षते॥ ६४ ॥

मानुषादिशरीराणां पाञ्चभौतिकत्वमतं निरस्यति "अध्यक्षाध्यक्षभिन्नानाम्" इति। शरीरस्य प्रत्यक्षाप्रत्यक्षकार्यत्वे प्रत्यक्षाप्रत्यक्षसंयोगवदप्रत्यक्षत्वापत्तिरिति भावः॥ ६० ॥

अथास्तु प्रत्यक्षभूतत्रयारब्धमेव शरीरम्? इत्यत्राह, "नापि तत् त्र्यात्मकम्" इति। हेतुमाह, "तत्र" इति। 'गुणान्तरं' चित्ररूपादि। अयमर्थः। मानुषादिशरीरस्य त्रैभौतिकत्वे, नानावर्णारब्धावयविवत् तत्रापि चित्ररूपमुपलभ्येत, न त्वेवम्॥ ६१ ॥

देवादीनां शरीरञ्च केचिदिच्छन्ति तादृशम् ।
अपरे सूरयस्तत्तु परं तैजसमूचिरे ॥ ६५ ॥
वृक्षादीनां शरीरेषु व्यवहारो न तादृशः ।
चेष्टाक्षवत्त्वमेतेषां विस्पष्टं नोपलभ्यते ॥ ६६ ॥
भोगाधिष्ठानता हेतोस्तत्त्वमक्षतमेष्वपि ।
जीवनात् मरणात् वृद्धि-क्षतसंरोहणादितः ॥ ६७ ॥
आगमाच्चोद्भिदामस्ति भोगाधिष्ठानता स्फुटा ।
नेच्छन्ति तरुगुल्मादेस्तत्त्वमन्ये विपश्चितः ॥ ६८ ॥
आप्यतैजसवायव्या देहाः परमयोनिजाः ।
तेषां पृथिव्युपष्टम्भाद् उपभोगसमर्थता ॥ ६९ ॥
जलत्वाद्यपि सामान्यं शरीरसमवायिगम् ।
द्रव्यारम्भकनित्यस्थजातित्वात् पृथिवीत्ववत् ॥ ७० ॥
इतीदमनुमानन्तु प्रमाणं तत्र विद्यते ।
विप्रकृष्टतया तेषां नास्ति प्रत्यक्षवेद्यता ॥ ७१ ॥
योनिजत्वं शरीरत्वाव्यापकं मशकादिषु ।

"आगमाच्चोद्भिदामस्ति भोगाधिष्ठानता स्फुटा" इति । 'आगमात्' "शरीरजैः कर्मदोषैर्याति स्थावरतां नरः" इत्यादि शास्त्रात् ॥ ६८ ॥ आप्यादिशरीरे मानमाह, "जलत्वाद्यपि सामान्यम्" इति ॥७०॥

सर्वासु दिक्षु सर्वेषु देहेष्वप्यणुसम्भवात्।
धर्माधर्मविशेषाच्च समाख्यादर्शनादपि ॥ ७२ ॥
संज्ञाया आदिभूतत्वात् वेदलिङ्गाच्च गम्यते।
अयोनिजशरीराणि विद्यन्ते क्षुद्रजन्तुवत् ॥ ७३ ॥
न सन्ति शब्दरूपाभ्यामन्ये वैशेषिका गुणाः।
उद्भूता, मनसो योगो ज्ञानकारणमस्ति च ॥ ७४ ॥

शरीरत्वस्य योनिजत्वव्याप्यतया कथमयोनिज-शरीरमित्याशङ्क्याह, "योनिजत्वम्" इत्यादि। अयोनिजशरीरोत्पत्तिं सम्भावयति, "सर्वासु दिक्षु सर्वेषु" इत्यादि। "धर्माधर्मविशेषाच्च" इति। धर्मान्महर्षिप्रभृतीनाम्, अधर्माच्च मशकादीनामयोनिजशरीरोत्पत्तिरिति विवेक्तव्यम्। "समाख्यादर्शनादपि" इति। अङ्गारेभ्यः समभवदङ्गिरा इत्याद्यन्वर्थसंज्ञाया आगमे दर्शनादित्यर्थः। अथवा वीजिपित्रादिकं विनापि घटादिसंज्ञादर्शनादित्यर्थः। एतेनायोनिजशरीरस्य वीजिपित्राद्यभावात् कथं तेषां संज्ञानिर्वाहोऽपीति देश्यमपास्तम् ॥ ७२ ॥

"संज्ञाया आदिभूतत्वात्" इति। प्राथमिकी या ब्रह्मादिसंज्ञा, तया ज्ञायते अस्याप्ययोनिजशरीरमिति। न हि ब्रह्मणोऽपि मातापितरौ स्तः। अथवा ईश्वरस्य संज्ञाया 'आदिभूतत्वात्' कारणत्वात्। तथा च घटादिसंज्ञावन्मन्वादिसंज्ञापीश्वरकृतैवेति भावः। "वेदलिङ्गाच्च" इति, "स मुखतो ब्राह्मणमसृजत्" इत्यादिवेदलिङ्गादित्यर्थः।७३।

इन्द्रियं लक्षयति, "न सन्ति शब्दरूपाभ्याम्" इति। तथा च

यत्त्वैतदिन्द्रियं प्राहुः कणादनयकोविदाः ।
शब्देतरत्वमात्रं वा वक्तव्यं, नेत्ररश्मिषु ॥ ७५ ॥
नक्तञ्चराणां चक्षुष्ट्वं न, तेजोऽन्तरमेव तत् ।
घ्राणेन्द्रियं गन्धवत्त्वात् पार्थिवं परिकीर्त्तितम् ॥ ७६ ॥
गन्धस्यैव व्यञ्जकत्वात् तद्वत्त्वं तस्य सिध्यति ।
तथैव रसवत्त्वेन जलीयं रसनेन्द्रियम् ॥ ७७ ॥
रसस्य परकीयस्य व्यञ्जकं केवलं हि तत् ।
पूर्ववत् तैजसञ्चक्षु-रूपमात्रप्रकाशनात् ॥ ७८ ॥
स्पर्शमात्रव्यञ्जकत्वाद् वायवीयं त्वगिन्द्रियम् ।
अनुमानानि तत्रैवं प्रवर्त्तन्ते यथाक्रमम् ॥ ७९ ॥
स्वाश्रयद्रव्यजातीयकरणानुभवस्तु यः ।

शब्दरूपेतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् इन्द्रियत्वमित्यर्थः । आत्ममनःसंयोगस्यापि ज्ञानकारणतया आत्मन्यविव्याप्तिवारणाय सत्यन्तदलम् । तत्रापि श्रोत्रेऽव्याप्तिवारणाय शब्देतरेति । व्याघ्रादिनयनेऽव्याप्तिवारणाय रूपेतरेति । घ्राणादेर्गन्धादिमत्त्वादव्याप्तिवारणाय उद्भूतेति । उद्भूतत्वस्यानुद्भूतत्वाभावरूपतया संयोगोऽपि शब्दरूपेतरोद्भूतगुण इत्यसम्भववारणाय विशेषेति । कालादावतिव्याप्तिवारणाय ज्ञानकारणेति ॥७४॥

"स्वाश्रयद्रव्यजातीयकारणानुभवस्तु यः" इत्यादि । सोऽयं शब्द-

गन्धस्तद्गोचरो यस्माद् गृह्यते नियतेन्द्रियैः ॥ ८० ॥
शब्दभिन्नगुणः सोऽयं तस्माद् भास्वररूपवत्।
अथवा पार्थिवं घ्राणेन्द्रियं रूपरसादिषु ॥ ८१ ॥
गन्धमात्रव्यञ्जकत्वाद् इत्येवमनुमीयताम्।
कुङ्कुमादिगगन्धस्य व्यञ्जकं तु घृतादिकम् ॥ ८२ ॥
वायूपनीतसुरभिभागो वास्तु निदर्शनम्।
आप्यन्तु रसनं रूपादिषु मध्ये रसस्य हि ॥ ८३ ॥
व्यञ्जकत्वात् शक्तु,रस-व्यञ्जकं सलिलं यथा।
चक्षुस्तैजसमेवात्र रूपस्यैव रसादिषु ॥ ८४ ॥
व्यञ्जकत्वात्, प्रदीपादि-प्रभैवात्र निदर्शनम्।
शरीरव्यापकञ्चापि वायवीयं त्वगिन्द्रियम् ॥ ८५ ॥
स्पर्शस्याभिव्यञ्जकत्वात् परं रूप-रसादिषु।
अङ्गसंसर्गि-सलिल-शैत्यव्यञ्जकवातवत् ॥ ८६ ॥

सर्व्वेषामस्ति भूयस्त्वमिन्द्रियाणां ततः पुनः।

भिन्नगुणो गन्धः, यस्मात् प्रतिनियतेन्द्रियग्राह्यः, तस्मात् स्वाश्रयद्रव्यजातीयकरणकानुभवगोचर इत्यर्थः। तत्र दृष्टान्तः, भास्वररूपवदिति। 'नियतेन्द्रियैः' इति व्यक्तिभेदाद् बहुवचनम्। अत्रायं प्रयोगः, गन्धः स्वाश्रयद्रव्यजातीयकरणकानुभवग्राह्यः प्रतिनियतेन्द्रियग्राह्यशब्दान्यविशेषगुणत्वात् भास्वररूपवत् ॥ ८० ॥

पार्थिवांशादिभिर्नास्ति गन्धादिग्रहणं परैः ॥ ८७ ॥

भूयस्त्वमितरद्रव्यानभिभूतैस्तु वस्तुभिः ।

आरब्धत्वं, ततोऽन्याभिभवे नास्त्येव तद्ग्रहः ।

भोगोपकारकं जन्यद्रव्यं विषयसंज्ञकम् ।

देहादिविषयलेऽपि पृथगुक्तं महर्षिणा ॥ ८८ ॥

मृत्पाषाणस्थावराणां भेदाद् भौमस्तु स त्रिधा ।

गौतमीये प्रमेयाणां यथा द्वादशधा भिदा ॥ ८९ ॥

भूप्रदेशा मृद्विकाराः प्राकाराद्याः प्रकीर्त्तिताः ।

पाषाणास्त्वद्रितद्धातु-पद्मरागादयो मताः ॥ ९० ॥

तृणगुल्मावतानाद्याः स्थावराः काश्यपे मते ।

आप्यास्तु विषयाः सिन्धु-तुषारकरकादयः ॥ ९१ ॥

सम्पर्काद्दिव्यतेजोभिराप्यास्ते परमाणवः ।

द्रवत्वं नारभन्ते तत् काठिन्यं द्व्यणुकादिषु ॥ ९२ ॥

ननु घ्राणादीनां पार्थिवादित्वे तैरेव गन्धादयो गृह्यन्ते, नान्यैः पार्थिवादिभिरिति कुतो नियमः ? इत्याशङ्क्याह, "सर्वेषामस्ति भूयस्त्वम्" इत्यादि । 'परैः' अन्यैः, 'पार्थिवांशादिभिः' इत्यन्वयः । तेषां भूयस्त्वाभावात् इति भावः ॥ ८७ ॥

करकादेर्जलत्वे कथं तत्र काठिन्योपलब्धिः ? इत्याशङ्क्याह, "सम्पर्काद्दिव्यतेजोभिः" इति ॥ ९२ ॥

तादात्म्यात् प्रतिबध्नाति करकैव द्रवत्वकम् ।
भाष्यटीकाकृतस्त्वेवम् ऊचिरे चारुचेतसः ॥ ९३ ॥
संयोगाद् भौमतेजोभिर्जाते विलयने पुनः ।
तदारब्धजले साक्षात् द्रवत्वमुपलभ्यते ॥ ९४ ॥
अथवा दिव्यतेजोभिः सम्पर्कात् द्व्यणुकादिषु ।
अनुद्भूतं द्रवत्वं स्यात् भ्रान्तिः काठिन्यधीर्मता ॥ ९५ ॥
लिङ्गं विस्फूर्जथुस्तत्र प्रवेशे दिव्यतेजसाम् ।
विद्यते वैदिकश्चातो जलत्वं करकादिषु ॥ ९६ ॥
वृद्धाश्चतुर्विधं प्राहुस्तेजोविषयसंज्ञकम् ।
भौमं दिव्यमथोदर्य्यम् अन्यदाकरजं विदुः ॥ ९७ ॥
भौमं काष्ठेन्धनं दिव्यम् अबिन्धनमुदाहृतम् ।

द्रवत्वाभावे जलत्वमपि तत्र कथमित्यत्राह, "संयोगात् भौमतेजोभिः" इति ॥ ९४ ॥

"लिङ्गं विस्फूर्जथुस्तत्र" इति । 'विस्फूर्जथुः' वज्रनिर्घोषः । 'तत्र' दिव्यजले । विद्युत्प्रकाशानन्तरं वज्रनिर्घोषोपलम्भात् तदैव करकापाताच्च दिव्यतेजःप्रवेशानुमानमिति भावः । "वैदिकश्च" इति । "आपस्ता अग्निं गर्भमादधीरन्" इत्यादिश्रुतेरिति भावः ॥ ९६ ॥

उदर्य्यं जाठरं, तूर्य्यं हिरण्यादि प्रचक्षते ॥ ९८ ॥

अत्यन्तानलयोगेऽपि द्रवत्वं जायते तु यत्।

न तदुच्छिद्यते तस्मात् सुवर्णमपि तैजसम् ॥ ९९ ॥

जातरूपस्य तेजस्त्वम् अमुना व्यतिरेकिणा।

सिध्यति, व्यतिरेकेण क्षितिरत्र निदर्शनम् ॥ १०० ॥

न द्रुतिर्जलमध्यस्थघृतमीक्षोदवदत्र च।

पीतस्य पार्थिवस्येति चिन्तनीयं मनीषिभिः ॥ १०१ ॥

किञ्चानलेन योगेऽपि समाश्रयति जातुचित्।

पीतरूपेतरद्रूपं न तत्, पीतपटादिवत् ॥ १०२ ॥

सुवर्णस्य तैजसत्वं साधयति, "अत्यन्तानलयोगेऽपि" इति। अस्य च 'न तदुच्छिद्यते' इति तृतीयचरणस्थेन अन्वयः ॥ ९९ ॥

"जातरूपस्य तेजस्त्वम्" इति। 'जातरूपस्य' सुवर्णस्य। अत्रायं प्रयोगः। सुवर्णं तैजसम् अत्यन्तानलसंयोगेऽपि अनुच्छिद्यमानजन्यद्रवत्ववत्त्वात्, यन्नैवं तन्नैवं यथा पृथिवी इति ॥ १०० ॥

ननु पीतं पार्थिवमपि तदानीं द्रुतमेवेति व्यभिचार इत्याशङ्क्याह, "न द्रुतिर्जलमध्यस्थ—" इति ॥ १०१ ॥

"किञ्चानलेन योगेऽपि" इत्यादि। 'तत्' सुवर्णम् ॥ १०२ ॥

द्रवद्रव्येण पीतान्य-रूपं प्रतिविरोधिना ।
तत्पीतिमगुरुत्वाढ्यं वस्तुसंयुक्तमिष्यते ॥ १०३ ॥
पृथिव्यां तन्न कुत्रापि दृश्यते तादृशं, न वा ।
जलस्य सम्भवस्तत्र, सुतरां तेज एव तत् ॥ १०४ ॥
भूमिसंसर्गतस्तस्य स्वं रूपं न प्रकाशते ।
तथैव पार्थिवस्पर्शादुष्णस्पर्शस्य न ग्रहः ॥ १०५ ॥
यत्रोपलभ्यमानोऽस्ति स्पर्शोऽसौ विषयः स्मृतः ।
वायोस्तूर्य्यस्तु कार्य्योऽस्य प्राणाख्यः परिकीर्त्तितः ॥ १०६ ॥
शरीरेऽसौ रसादीनां कारणं प्रेरणादिषु ।
एकोऽपि कार्य्यवैचित्र्यान्नानासंज्ञान्वितो मतः ॥ १०७ ॥

फलितमाह, "द्रवद्रव्येण पीतान्य—" इति । अत्रायं प्रयोगः, अग्निसंयोगे पीतिमगुरुत्वाश्रयः, पीतरूपेतररूपप्रतिबन्धक-द्रवद्रव्य-संयुक्तः, अत्यन्ताग्निसंयोगेऽपि पीतरूपेतररूपानाश्रयत्वात्, जल-मध्यस्थ-पीतपटवत् इति ॥ १०३ ॥

"पृथिव्यां तन्न कुत्रापि" इति । 'तत्' द्रवत्वम् । 'तादृशं' पीत-रूपेतररूपप्रतिबन्धकम् ॥ १०४ ॥

"एकोऽपि कार्य्यवैचित्र्यान्नानासंज्ञान्वितो मतः" इति । 'नाना-संज्ञा' अपानादिसंज्ञा ॥ १०७ ॥

लीलागम्योऽपि बालानाम् उल्लासयतु साम्प्रतम् ।
दर्शनात् धिषणामेष स्पर्शवद्-द्रव्यनिर्णयः ॥ १०८ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कारप्रणीतायां तत्त्वावलौ
स्पर्शवद्-द्रव्यनिर्णयो नाम चतुर्थः परिच्छेदः ।

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां
स्पर्शवद्द्रव्यनिर्णयाभिधेयश्चतुर्थः परिच्छेदः
समाप्तः ।

तत्त्वकल्पलता नाम

पञ्चमः परिच्छेदः ।

चतुर्णामथ भूतानां सृष्टिसंहारगोचरः ।
क्रमः प्रसङ्गसङ्गत्या सङ्क्षेपेण निरूप्यते ॥ १ ॥
ब्रह्मापवर्गसमये विश्रामार्थं शरीरिणाम् ।
सञ्जिहीर्षा महेशस्य जायते, तदनन्तरम् ॥ २ ॥
सर्वजीवगतादृष्टवृत्तिरोधे सुषुप्तिवत् ।
आत्मसंयोगतः कर्म देहाद्यारम्भकाणुषु ॥ ३ ॥
कर्मजन्यविभागेभ्यस्तत्संयोगनिवृत्तितः ।
तेषामापरमाण्वन्तो विनाशः किल जायते ॥ ४ ॥
क्रमेणानेन सर्वेषां विषयाणामपि स्फुटम् ।
विनाशो जायते, तत्र पृथिव्यादौ विनश्यति ॥ ५ ॥
ततो जलञ्च ज्वलनं पवमानस्ततः परम् ।
तत्पश्चादवतिष्ठन्ते विभक्ताः परमाणवः ॥ ६ ॥

"सर्वजीवगतादृष्टवृत्तिरोधे सुषुप्तिवत्" इति । यथा सुषुप्तौ कतिपयजीवानां युगपददृष्टवृत्तिनिरोधः, तथा प्रलये सर्वेषामेव तथेत्यर्थः ॥ ३ ॥

"कर्मजन्यविभागेभ्यः" इति । 'तत्संयोगनिवृत्तितः' पूर्वसंयोगनिवृत्तितः ॥ ४ ॥

आत्मानोऽदृष्टसंस्कारविशिष्टाश्च, ततः पुनः ।
महेश्वरसिसृक्षा स्यात् प्राणिनां भोगभूतये ॥ ७ ॥
ततोऽदृष्टविशिष्टात्मसंयोगात् पवनाणुषु ।
कर्मोत्पत्तौ क्रमाज्जातो महान् वायुर्विहायसि ॥ ८ ॥
परं दोधूयमानोऽसौ तिष्ठत्येतदनन्तरम् ।
आप्येभ्यः परमाणुभ्यो जातो जलनिधिर्महान् ॥ ९ ॥
पोप्लूयमानस्तत्रैव तिष्ठत्यनिलसन्ततौ ।
पार्थिवेभ्यस्ततोऽणुभ्यः समुत्पन्ना सुसंहता ॥ १० ॥
महापृथिव्यपां राशौ तस्मिन्नेवावतिष्ठते ।
अणुभ्यस्तैजसेभ्यस्तु तेजोराशिर्महांस्ततः ॥ ११ ॥
जातो देदीप्यमानश्च सोऽपि तिष्ठत्युदन्वति ।
अयं सृष्टिक्रमः प्राज्ञैर्भाष्यकारैरुरीकृतः ॥ १२ ॥
जलसृष्टेः पुरैवान्ये तेजःसृष्टिं प्रचक्षते ।
तैजसैरणुभिः पश्चात् सहितैः पार्थिवाणुभिः ॥ १३ ॥

"आत्मानोऽदृष्टसंस्कारविशिष्टाश्च" इति । चकारेणाकाशादि-परिग्रहः । अत्रापि "अवतिष्ठन्ते" इत्यनुषज्यते ॥ ७ ॥

"कर्मोत्पत्तौ क्रमाज्जातो महान् वायुर्विहायसि" इति । 'क्रमात्' द्व्यणुकादिक्रमात् ॥ ८ ॥

ईश्वराभिध्यानमात्राद् अण्डमारभ्यतेऽद्भुतम्।
तस्मिन् ब्रह्माणमुत्पाद्य सर्वलोकपितामहम्॥ १४॥
भुवनैरन्वितं सर्वैश्चतुर्वदनपङ्कजम्।
स नियुङ्क्ते प्रजासर्गे तन्नियुक्तस्त्वसौ पुनः॥ १५॥
उच्चैर्ज्ञानादिसम्पन्नो विदित्वा प्राणिकर्मणाम्।
फलकालं, यथाकर्मज्ञानभोगायुषः सुतान्॥ १६॥
अयोनिजान् मरीच्यादीन् दक्षादींश्च प्रजापतीन्।
मनुदेवऋषीणाञ्च पितॄणाञ्च पृथक् गणान्॥ १७॥
तथैव चतुरो वर्णान् मुखबाहूरुपादतः।
उच्चावचानि भूतानि सृजत्यन्यान्यपि प्रभुः॥ १८॥
अनल्पकल्पनाजालाकुला येषान्तु जल्पना।
तत्त्वकल्पलता तेषाम् अल्पाल्पापि प्रकल्पिता॥ १९॥

इति श्रीचन्द्रकान्ततर्कालङ्कार-प्रणीतायां तत्त्वावलौ तत्त्वकल्पलताभिधेयः पञ्चमः परिच्छेदः।

"स नियुङ्क्ते प्रजासर्गे तन्नियुक्तस्त्वसौ पुनः।" इति 'सः' ईश्वरः। 'असौ' ब्रह्मा॥ १५॥

इति श्रीचन्द्रकान्ततर्कालङ्कार-प्रणीतायां तत्त्वावलौ तत्त्वकल्पलताभिधेय-पञ्चम-परिच्छेदस्य टीका समाप्ता।

परोक्षानुभवो नाम
षष्ठः परिच्छेदः ।

न लिङ्गं गगने कर्म नैतस्मिन् समवैति तत् ।
कारणान्तरवैधर्म्यं स्फुटमत्रोपलभ्यते ॥ १ ॥
निमित्ततापि नास्त्यस्य, संयोगान्मूर्त्तवस्तुना ।
कारणे कर्मणोऽभावो, नाकाशाभावहेतुकः ॥ २ ॥

क्रमप्राप्तमाकाशमिदानीं निरूपयितव्यम् । तत्र निष्क्रमणादिकं कर्म गगनानुमापकमिति सांख्यमतं तावद् दूषयति, "न लिङ्गं गगने कर्म" इति । अयमर्थः । कर्म गगनमनुमापयत्, समवायिकारणतया, असमवायिकारणतया, निमित्तकारणतया वा, अनुमापयति ? तत्र नाद्य इत्याह, "नैतस्मिन्" इति । 'एतस्मिन्' गगने । 'तत्' कर्म । न द्वितीय इत्याह, "कारणान्तर—" इति । 'कारणान्तरम्' असमवायिकारणम् । तद्-'वैधर्म्यं' द्रव्यत्वम् । 'अत्र' गगने ॥ १ ॥

नापि तृतीय इत्याह, "निमित्ततापि नास्त्यस्य" इति । 'अस्य' गगनस्य । 'संयोगात्' इत्यादि । तथाच कर्मसमवायिकारणानां फलपत्रादीनां भूम्यादिमूर्त्तवस्तुसंयोगादनन्तरं कर्मानुत्पादात्, संयोगविशेषाभावादिरेव, वरं निमित्तकारणमस्तु, न गगनम् इति भावः ॥ २ ॥

एतस्य व्यतिरेकस्तु व्यापकत्वान्न सिध्यति ।
अन्वयोऽप्यन्यथासिद्धः सुतरामेव जायते ॥ ३ ॥
शब्दः कार्य्यगुणो नैव कारणेऽनुपलम्भनात् ।
वीणादिवत् तदङ्गेषु न शब्दो ह्युपलभ्यते ॥ ४ ॥
किञ्चात्र तारमन्दादि-भावानामुपलम्भनात् ।
अन्यत्रानुपलम्भाच्च नैव स्पर्शवतां गुणः ॥ ५ ॥
न चाप्यात्मगुणः शब्दो वाह्याक्षग्राह्यता यतः ।
परत्र समवायाच्च, वधिरानुपलम्भनात् ॥ ६ ॥
अहं सुखीतिवद् वाद्ये शब्दवानेवमादिका ।
धीरन्यथा प्रसज्येत, प्रतियन्ति न लौकिकाः ॥ ७ ॥

शब्दस्याकाशलिङ्गत्वमुपपादयितुमाह, "शब्दः कार्य्यगुणो नैव" इति । 'कार्य्य' वीणादि ॥ ४ ॥

"किञ्चात्र तारमन्दादि—" इति । 'अत्र' शब्दे । 'अन्यत्र' रूपादौ । अयमर्थः । स्पर्शवद्विशेषगुणा हि रूपादयो न एकस्मिन्नेवाश्रये वैचित्र्येणोपलभ्यते, शब्दस्तु एकस्मिन्नेवाश्रये तारमन्दादिवैचित्र्येणोपलभ्यते इति नास्य स्पर्शवद्-गुणत्वमिति ॥ ५ ॥

"परत्र समवायाच्च" इति । 'परत्र' आत्मभिन्ने । परत्र समवाये हेतुः 'वधिरानुपलम्भनात्' इति । शब्दस्यात्मनि समवेतत्वे सुखादिवत् वधिरेणाप्युपलभ्येत शब्दः, न चैवं, तस्मान्नात्मसमवेत इति भावः ॥ ६ ॥

प्रत्यक्षत्वविरोधान्नो दिक्कालमनसां गुणः ।
अयावद्-द्रव्यभावित्वान्न गुणो मरुतामपि ॥ ८ ॥
परिशेषादसौ लिङ्गमाकाशाख्यस्य वस्तुनः ।
शब्दलिङ्गाविशेषात् तद्विशेषविरहात् तथा ।
सत्तावत्तत्त्वमेतस्य तस्मादेकपृथक्त्वकम् ॥ ९ ॥
द्रव्यत्वं गुणवत्त्वेन हेत्वभावेन नित्यता ॥ १० ॥
विभवात् सर्वदेशेषु युगपत्शब्दसम्भवात् ।
परिमाणं महत् तस्य परमं परिकीर्त्तितम् ॥ ११ ॥
प्रदेशवद्भिर्द्रव्यैस्तु तत्संयोगनिबन्धनम् ।
आकाशस्य प्रदेशोऽयमित्यादि व्यपदिश्यते ॥ १२ ॥

वायावेव कारणगुणपूर्वकः शब्दः, वाय्ववयवेष्वपि सूक्ष्मशब्द-स्वीकारात्, इति मतं निरस्यति, "अयावद्-द्रव्यभावित्वात्" इति। अत्रान्वयेन सुखादिकं, व्यतिरेके वायवीयस्पर्शश्च दृष्टान्तः। अया-वद्-द्रव्यभावित्वञ्च, स्वाश्रयनाशजन्य-नाशप्रतियोगि-भिन्नत्वम् ॥ ८ ॥

"शब्दलिङ्गाविशेषात्" इत्यादि। 'तद्विशेषविरहात्' भेद-साधकलिङ्गविशेषविरहात्। 'तत्त्वं' तद्व्यक्तित्वम्, एकत्वमित्ये-तत् ॥ ९ ॥

"विभवात् सर्वदेशेषु—" इति। 'विभवः' सर्वमूर्त्तसंयोगः, तस्मात्। परममहत् परिमाणम् आकाशस्येत्यर्थः। विभवहेतुः 'सर्व-देशेषु' इत्यादि ॥ ११ ॥

कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रं प्रचक्षते।
भोगकारणवैधुर्य्याद् आर्य्या वाधिर्य्यमूचिरे॥ १३॥
परस्मिन् परमन्यस्मिन्नपरं युगपच्चिरम्।
क्षिप्रमेतादृशी बुद्धिः काललिङ्गमिति स्मृतम्॥ १४॥
त्रयाणां पवनेऽभावश्चतुर्थस्यापि नैकता।
पाकजोत्पत्तिकालेऽपि तदुत्पत्तिः प्रतीयते॥ १५॥

"परस्मिन् परमन्यस्मिन्" इत्यादि। 'अन्यस्मिन्' अपरस्मिन्। परस्मिन् परमित्यनेन कालिकपरत्वापरत्वयोः काललिङ्गत्वमुक्तम्। तदिदानीमुपपादनीयम्। तत्र युवानमपेक्ष्य स्थविरे परत्वं, स्थविरमपेक्ष्य यूनि चापरत्वं तावदुपलभ्यते। तच्च परत्वमपरत्वञ्च यथाक्रमं बहुतर-तपनपरिस्पन्दान्तरित-जन्मत्वज्ञानादल्पतर-तपनपरिस्पन्दान्तरित-जन्मत्वज्ञानाच्चोत्पद्यते। इति वस्तुस्थितिः। तत्र च तपनपरिस्पन्दानामुपनायकतया कालसिद्धिरिति कालसंयोगस्तत्रासमवायिकारणमिति सिद्धान्तः। इदमिदानीमुपपाद्यते। तत्र तावत् किम् असमवायिकारणं परत्वापरत्वयोः? न तावत् रूपरसगन्धाः, तथात्वे वायौ परत्वाद्यनुत्पत्तिप्रसङ्गात् इत्याह, "त्रयाणां पवनेऽभावः" इति। नापि स्पर्श इत्याह, "चतुर्थस्यापि" इति। तथाच स्पर्शस्योष्णादिभेदेन नानात्वात् परस्परव्यभिचार इति भावः। किञ्च "पाकजोत्पत्ति—" इत्यादि। स्पर्शस्य हेतुतायां हि पाकजस्पर्शोत्पत्तिकाले, परत्वादि, नोत्पद्येत इति भावः॥ १४॥ १५॥

तद्वैजात्यात् परत्वादिवैजात्यमपि नेष्यते ।
परिमाणं तदन्येषां नारम्भकमिति स्थितिः ॥ १६ ॥
सामानाधिकरण्यन्तु सूरस्पन्देषु दुर्लभम् ।
परिशेषेण संयोगस्तदवच्छिन्नवस्तुनः ॥ १७ ॥
तस्मिन्नसमवायि स्यात्, पिण्डमार्त्तण्डयोगवत् ।
तद्विभु स्यात्, तत्क्रियाणाम् उपनायकमेव तत् ॥ १८ ॥
वियतस्तत्स्वभावत्वे क्वचिद्भेर्य्यभिघाततः ।
युगपत्सर्वभेरीषु शब्दोत्पत्तिः प्रसज्यते ॥ १९ ॥
अन्यावच्छित्तयेऽन्येषां धर्मेष्वात्माप्यपेक्षते ।
सन्निकर्षान्तरं, नो चेत् स्यादेवातिप्रसञ्जनम् ॥ २० ॥

किञ्च "तद्वैजात्यात् परत्वादि" इति । स्पर्शस्य हेतुत्वे स्पर्शवैजात्यात् परत्वादिवैजात्यमापद्येत, कारणवैजात्यस्य कार्य्यवैजात्यप्रयोजकत्वनियमात् ॥ १६ ॥

नापि तपनपरिस्पन्दोऽसमवायिकारणं, तस्य व्यधिकरणत्वात्, इत्याह, "सामानाधिकरण्यन्तु" इति ॥ १७ ॥

"अन्यावच्छित्तयेऽन्येषाम्" इत्यादि । 'सन्निकर्षान्तरं' स्वप्रत्यासत्त्यतिरिक्तसन्निकर्षम् । "नो चेत्" इति । अन्यथा वाराणसीस्थजवाकुसुमारुणिम्ना पाटलिपुत्रेऽपि स्फटिकमणेरारुण्यप्रसङ्ग इत्यर्थः ॥ २० ॥

क्रियोपनायकत्वेन कालसिद्धेर्न दूषणम् ।
संयोगोपनयायैव दिगस्मिन् साधयिष्यते ॥ २१ ॥
युगपद्गमनं सर्वे कुर्वन्तीत्येवमादिषु ।
सम्बन्धघटकश्चापि कालमेव प्रचक्षते ॥ २२ ॥
सर्वेषां सर्वदैवैषां दर्शनात् परमो महान् ।
गुणाश्रयत्वात् द्रव्यत्वम् अद्रव्यत्वाच्च नित्यता ॥ २३ ॥
लिङ्गाविशेषादेकत्वम् एतस्य परिकीर्त्तितम् ।
क्षणत्ववर्त्तमानत्वादिकमास्तामुपाधितः ॥ २४ ॥
तदा जातश्चिरं जात इत्यादेरुपलम्भनात् ।—
अनित्येषु, तदन्येषु तेषामनुपलम्भनात् ॥ २५ ॥
प्रावृषेण्यादिसंज्ञाभ्यः पुष्पादीनां तथैव च ।
सर्वोत्पत्तिमतामेष निमित्तमिति कथ्यते ॥ २६ ॥
इदमस्मादितीयं धीर्दिशं लिङ्गमिहेष्यते ।

कालोऽपि कथं न रागसंक्रामकः? इत्यत्राह "क्रियोपनायकत्वेन" इति ॥ २१ ॥

"युगपद्गमनं सर्वे" इत्यादि । युगपद्गच्छन्तीत्यादिषु हि एकस्यां तपनक्रियायां गच्छन्तीत्यादि प्रतीयते । तच्च शूरक्रियाया गमनाश्रयत्वं स्वाश्रयसंयुक्तकालसंयोगितपनाश्रितत्वसम्बन्धेनेति कालसिद्धिः । स्वं गमनम् ॥ २२ ॥

संयोगोपनयायैव तदेषा सिद्धिमेष्यति ॥ २७ ॥
इष्यते केवलं कालः क्रियाणामुपनायकः ।
अन्यथातिप्रसङ्गः स्यात् न तस्मात् सिद्धसाधनम् ॥ २८ ॥
खमात्माऽनियतं न स्यात् परधर्मोपनायकम् ।
दोषाऽन्यथा स एवास्ति नास्त्यस्यां तस्य सम्भवः ॥ २९ ॥
क्रियोपनायकात् कालात् संयोगस्योपनायिका ।

"इदमस्मादितीयं धीः" इति । इदमस्मात् पूर्व्वमिदमस्माद्दक्षिण-मित्यादिबुद्धिर्दिगनुमापिका, तामन्तरेण तदनुपपत्तेरिति भावः । अथवा इदमस्मात् परम् इदमस्मादपरम् इति दैशिकपरत्वापरत्व-बुद्धिर्दिगनुमापिका । अल्पतरसंयुक्तसंयोगाश्रयत्वज्ञानं विना, नापरत्वमुत्पद्यते ; नापि बहुतरसंयुक्तसंयोगाश्रयत्वज्ञानं विना परत्वमुत्पद्यते ; न च दिशमन्तरेण भूयसामल्पीयसां वा संयोगाना-मुपनायकमन्यदस्तीति दिगनुमीयते । तथा च कालिक परत्वा-परत्वासमवायिकारणसंयोगाश्रयतया कालसिद्धिवत्, दैशिकपरत्वा-परत्वासमवायिकारणसंयोगाश्रयतया दिक्सिद्धिरिति भावः ॥२७॥

अथास्तु काल एव संयोगोपनायक इत्याशङ्क्याह "इष्यते केवलं कालः" इति । 'अन्यथा' कालस्यानियत-परधर्मोपनायकत्वे । 'अति-प्रसङ्गः' काश्मीरकुङ्कुमपङ्करागस्य कर्णाटेऽप्युपनयप्रसङ्गः ॥ २८ ॥

"खमात्माऽनियतं न स्यात्" इत्यादि । 'अस्यां' दिशि । 'तस्य' अतिप्रसङ्गस्य । संयोगोपनयार्थमेवास्याः कल्पनादिति भावः ॥२९॥

तदेषा पृथगेवेति निर्विवादो विवादिनाम् ॥ ३० ॥
सर्वदा तस्य तत्त्वात् स नियतोपाधिनायकः ।
इयञ्चानियतोपाधिनायिका भिद्यते ततः ॥ ३१ ॥
एकदा यस्य या प्राची सैव तस्यैव चान्यदा ।
प्रतीच्येवमुदीच्यादिष्वपि न्यायोऽयमूह्यताम् ॥ ३२ ॥
युगपत् सर्वलोकानां प्राच्यादिव्यवहारतः ।
महत्त्वं परमं तस्या द्रव्यत्वं गुणवत्त्वतः ॥ ३३ ॥
नित्यत्वमद्रव्यवत्त्वादेकत्वं भाववत् तथा ।
कार्य्यभेदात्तु नानात्वम् एतस्यामुपचर्य्यते ॥ ३४ ॥
आद्यादादित्यसंयोगाद् भूतपूर्वाद् भविष्यतः ।

कालाद् भेदकान्तरमाह "सर्वदा तस्य तत्त्वात् सः" इति। 'तस्य' इति बुद्धिस्थं वर्तमानकालं परामृशति। 'तत्त्वात्' वर्तमानत्वात्। 'सः' कालः। यदपेक्षया यो वर्तमानः, तदपेक्षया स वर्तमान एवेति नियतोपाध्युन्नायकत्वं कालस्य। येन हि वस्तुना यस्य कालस्यावच्छेदः स तस्य वर्तमान इत्युच्यते। दिशस्तु नैवं नियम इति भावः ॥ ३१ ॥

"एकदा यस्य या प्राची" इति। यदपेक्षया उदयाचलसन्निहिता या दिक् सा तदपेक्षया प्राची। एवं प्रतीच्यादिष्वप्युह्यम् ॥ ३२ ॥

"आद्यादादित्यसंयोगात्" इति। प्राथमिकादित्यसंयोगात् प्राचीति व्यवहारः। स चादित्यसंयोगो भूतो वर्तमानो भविष्यन् वा

भूताच्च कथ्यते प्राची तद्बुद्धिः सार्वकालिकी ॥ ३५ ॥

एवमेवोपपद्यन्ते दक्षिणाद्यासु बुद्धयः ।

तद्वद् दक्षिणपूर्वाद्या निर्वक्तव्या दिशो दश ॥ ३६ ॥

प्रगल्भते खादिषु वादिवर्गः

प्रत्यक्षतोऽवेद्यतया विवादे ।

निरस्य तत् काश्यपशिष्यहर्षं

परं परोक्षानुभवः करोतु ॥ ३७ ॥

इति श्रीचन्द्रकान्ततर्कालङ्कार-प्रणीतायां तत्त्वावलौ परोक्षानुभवो नाम षष्ठः परिच्छेदः ।

प्राची व्यवहारकारणमिति दर्शनाय 'भूतपूर्वात्' इत्यादिविशेषणत्रयम् । 'भूतात्' वर्तमानात् । आदिकर्मणि क्तः ॥ ३५ ॥

"एवमेवोपपद्यन्ते" इति । दक्षिणादिदिग्वर्तिनगादिभिः सहादित्यसंयोगात् दक्षिणादिबुद्धय इति भावः । "तद्वद्दक्षिणपूर्वाद्या" इति पूर्वदक्षिणयोर्दिशोर्लक्षणसाङ्कर्य्यात् दक्षिणपूर्वा दिगिति व्यवहारः । एवमन्यत्राप्यूह्यम् ॥ ३६ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां परोक्षानुभवनामकः षष्ठः परिच्छेदः ।

आत्मानुभूतिर्नाम

सप्तमः परिच्छेदः ।

विवादो वादिनां यस्माद् आत्मतत्त्वेऽप्यनेकशः ।
तस्मादेकैकशस्तेषां प्रत्यादेशः प्रदर्श्यते ॥ १ ॥
इन्द्रियार्थाः प्रसिद्धास्तत्-प्रसिद्धिः क्वचिदाश्रिता ।
गुणत्वाद् रूपवन्नास्मिन् इन्द्रियार्थास्तदाश्रयाः ॥ २ ॥
तस्मात् तदाश्रयतया द्रव्यं यन्नवमं पुनः ।
प्रसिध्यति तदेवास्मिन् आत्मेति व्यपदिश्यते ॥ ३ ॥
आत्मेन्द्रियार्थसम्बन्धात् ज्ञानमुत्पद्यते तु यत् ।
तदन्तःकरणादन्यद् अन्यच्चानपदेशतः ॥ ४ ॥
ज्ञानवत्-सुखदुःखेच्छा-द्वेषयत्नाः पृथक् पृथक् ।
आत्मनो लिङ्गतां यान्ति मनसोऽपि गतिस्तथा ॥ ५ ॥
सन्निवेशोऽचभेदेषु तस्येच्छाप्रणिधानतः ।

"इन्द्रियार्थाः प्रसिद्धाः" इत्यादि । इन्द्रियाणामर्था रूपादयः प्रसिद्धाः प्रत्यक्षवेद्याः । 'तत्प्रसिद्धिः' रूपादिसाक्षात्कारः । "नास्मिन्" इत्यादि । इन्द्रियाण्यर्थाश्च तदाश्रया नेत्यर्थः ॥ २ ॥

"तदन्तःकरणादन्यत्" इति । अनेन सांख्यमतं प्रत्युक्तम् ॥ ४ ॥

यस्येच्छा प्रणिधानञ्च स आत्मा गृहबालवत् ॥ ६ ॥
गृहकोणस्थितः किञ्चिद् दारकः कन्दुकादिकम् ।
इतस्ततः प्रेरयति स्वेच्छातो हि गृहोदरे ॥ ७ ॥
प्राणापानौ, निमेषादि, क्षतसंरोहणादिकम् ।
एतान्यपि तमात्मानं गमयन्ति मुनेर्मते ॥ ८ ॥
तिर्य्यग्गमनशीलन्तु यो वायुं यत्नतः पुनः ।
अधश्चोर्द्ध्वं प्रेरयति स एवात्मेति कीर्त्त्यते ॥ ९ ॥
संमूर्च्छनेनोर्द्ध्वगतिरेतस्यापि भविष्यति ? ।
इति चेदस्य नाधो वा न तिर्य्यग् वा गतिर्भवेत् ॥ १० ॥
सुषुप्तौ योग्ययत्नानाम् अभावेऽयोग्ययत्नतः ।
ऊर्द्ध्वाधोगमनं तस्य सम्भवेदिति भाव्यताम् ॥ ११ ॥
नोत्पद्यते विना यत्नं नर्त्तनञ्चाक्षिपक्ष्मणोः ।
अन्यस्तद्यत्नवान् दारुपुत्तकस्येव नर्त्तकः ॥ १२ ॥

ज्ञानवदेव सुखादीनां लिङ्गत्वमिति मनोगतेर्लिङ्गतामुपपादयति, "सन्निवेशोऽक्षभेदेषु" इत्यादि । 'अक्षभेदेषु' इन्द्रियविशेषेषु । 'तस्य' मनसः । तथा च य इच्छया प्रणिधानेन च इन्द्रियविशेषेषु मनः सन्निवेशयति स आत्मेत्यर्थः ॥ ६ ॥

"प्राणापानौ निमेषादि" इति । 'निमेषादि' इत्यादिपदमुन्मेषपरम् । 'क्षतसंरोहणादिकम्' इत्यादिपदं वृद्ध्यादिपरम ॥ ८ ॥

तथा जीवनकार्य्याणां यत्ननिष्पाद्यता यतः।
अनुमेयस्ततोऽप्यात्मा गृहस्वामिवदिष्यते ॥ १३ ॥
भग्नं सम्यङ्निर्मिमीते लघीयो वर्द्धयत्यपि।
करोति विषमञ्चापि समं गृहपतिर्गृहम् ॥ १४ ॥
तत्कार्य्यत्वात् शरीरादेश्चेतनत्वम् असाम्प्रतम्।
प्रदीपजन्यज्ञानादौ तदनैकान्तिकं यतः ॥ १५ ॥
कारणे ज्ञानविरहाद् देहे ज्ञानं कुतस्तराम्।
स्वकारणगुणोत्पन्नाः सर्वे वैशेषिका गुणाः ॥ १६ ॥
शरीरकारणेष्वस्ति ज्ञानं चेत् परमाणुषु।
तदा सर्वे तदारब्धाः ज्ञानिनः स्युर्घटादयः ॥ १७ ॥
अस्त्येव ज्ञानमत्रापि किन्तु तत् सूक्ष्ममात्रया।
एषापि राज्ञामाज्ञेव प्रतिज्ञा प्रतिभाति नः ॥ १८ ॥

ननु देहस्यैव चैतन्यमस्तु, चैतन्यं देहवृत्ति, तत्कार्य्यत्वात् तद्रूपवत्, इत्यनुमानेन तत्सिद्धेरिति चार्वाकाः। तदेतन्मतं दूषयति, "तत्कार्य्यत्वाच्छरीरादेः" इति ॥ १५ ॥

किञ्च "कारणे ज्ञानविरहात्" इति। 'कारणे' देहकारणे। "स्वकारणगुणोत्पन्नाः" इति। पृथिव्यादिविशेषगुणानां हि कारणगुणपूर्वकतैव दृश्यते इति भावः ॥ १६ ॥

"अस्त्येव ज्ञानमत्रापि" इति। 'अत्रापि' घटादिष्वपि ॥ १८ ॥

नैतस्यां साधनं यस्मात् किमप्युपलभामहे ।
"एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेत्" ॥ १९ ॥
न केनापि प्रमाणेन ज्ञानं तत्र प्रतीयते ।
तस्याप्यभ्युपगन्तासौ महासाहसिकः परः ॥ २० ॥
सुव्यक्तं गौरवञ्चात्र नानाचेतनकल्पनात् ।
तद् वरं चेतनाधार एक एवातिरिच्यताम् ॥ २१ ॥
शरीरेऽप्यस्तु चैतन्यं सुरासु मदशक्तिवत् ? ।
एषोऽपि विषमस्तेषाम् उपन्यासो न शोभते ॥ २२ ॥
मदशक्तिर्न दृष्टान्तो नासौ वैशेषिको गुणः ।
चिन्तनीयं विपश्चिद्भिरन्यदप्यनया दिशा ॥ २३ ॥
किञ्चात्मत्वे शरीरस्य स्मरणं नोपपद्यते ।
बाल्यादिकास्ववस्थासु शरीरं भिद्यते यतः ॥ २४ ॥
कार्य्यकारणभावाच्चेत् स्मरणं स्यात् तथा सति ।

"न केनापि प्रमाणेन" इत्यादि । 'तत्र' घटादौ ॥ २० ॥

यथा मदशक्तिरहितैर्वस्तुभिरारब्धायां सुरायां मदशक्तिरपूर्वैवोत्पद्यते, तथा ज्ञानरहितैरवयवैरारब्धे शरीरेऽपि ज्ञानमुत्पद्यतामिति शङ्कते, "शरीरेऽप्यस्तु चैतन्यम्" इत्यादि ॥ २२ ॥

"बाल्यादिकास्ववस्थासु" इति । तथा चानुभवितुर्देहस्येदानीमभावात् स्मरणानुपपत्तिरिति भावः ॥ २४ ॥

पितृभ्यामनुभूतस्य पुत्त्रः स्मरतु वस्तुनः ॥ २५ ॥
देहभेदग्रहस्तत्र यदि स्यात् प्रतिबन्धकः ।
तदा वाल्येऽनुभूतस्य वार्द्धकेऽपि स्मृतिर्गता ॥ २६ ॥
वृद्धो बालशरीराद्धि भेदेनैव स्फुटं निजम् ।
शरीरं प्रतिसन्धत्ते नाभेदेन तु जातुचित् ॥ २७ ॥
देहभेदाग्रहोऽप्यस्ति जातमात्रस्य कस्यचित् ।
वासनासंक्रमो नातः सन्तानो न नियामकः ॥ २८ ॥
आत्मत्वे च शरीरस्य कृतहानिः प्रसज्यते ।
अकृताभ्यागमश्चैव तदात्मा तद्विलक्षणः ॥ २९ ॥
देवदत्तो गच्छतीति प्रत्ययाद्युपचारतः ।

वासनासंक्रमद्वारा कार्य्यकारणभाव एव स्मरणं नियमयतु, पूर्व-देहोपादानोपादेयत्वादुत्तरदेहस्येत्याशङ्क्याह, "कार्य्यकारणभावा-च्चेत्" इति ॥ २५ ॥

"आत्मत्वे च शरीरस्य" इति। एतत्-शरीरनाशस्य साक्षात् अनुभवात् सुतराम् एतद्देहकृतकर्मणां फलभोक्तुरेतद्देहरूपस्यात्म-नोऽभावात्, भोगं विनापि क्षय इति कृतहानिः। एतद्देहरूप-स्यात्मनः पूर्वमसत्त्वात् प्रागकृतेऽपि कर्मणि सुखदुःखादिभोगा-भ्युपगमादकृताभ्यागमः ॥ २९ ॥

उपपाद्यं शरीरेऽपि, सन्देहोऽपैति नात्र चेत् ॥ ३० ॥
तद्भावात् परतोऽभावाद् अहं जाने सुखीति च ।
प्रत्यगात्मपरं ज्ञानं न शरीरपरं विदुः ॥ ३१ ॥
न चेत् परशरीरेऽपि कथं नैतादृशी मतिः ? ।
परात्मनः परस्यातीन्द्रियत्वात् तद्गुणास्तथा ॥ ३२ ॥
शरीरे मानसं न स्याद् अस्वतन्त्रं वहिर्मनः ।
नापि तल्लैङ्गिकं लिङ्गम् अन्तरेणापि दर्शनात् ॥ ३३ ॥
उपचारो न वाच्योऽत्र, बाहुल्यस्योपलम्भनात् ।—
शरीरे स्यादहङ्कारो, नैतत् सन्देहसम्भवात् ॥ ३४ ॥

"देवदत्तो गच्छतीति" इत्यादि । "सन्देहोऽपैति नात्र चेत्" इति । 'अत्र' उपचारविषये ॥ ३० ॥

"तद्भावात् परतोऽभावात्" इति । 'तद्भावात्' तस्मिन् स्वात्मनि भावात् । 'परतः' परात्मनि; 'अभावात्' इत्यर्थः ॥ ३१ ॥

"न चेत् परशरीरेऽपि" इति । 'न चेत्' शरीरपरत्वे । प्रत्यगात्मपरत्वेऽपि परात्मन्यपि कथं न तद्बुद्धिः ? इत्यत्राह, "परात्मनः" इति ॥ ३२ ॥

किञ्च "शरीरे मानसं न स्यात्" इत्यादि । तथा च शरीरस्यात्मत्वे अहं जाने इत्यादि मानसं शरीरे न सम्भवति, मनसो वहिरस्वातन्त्र्यादित्यर्थः ॥ ३३ ॥

उपसंहरति,—"उपचारो न वाच्योऽत्र" इति । 'अत्र' प्रत्य-

क्रियमाणे प्रयत्ने तु प्रत्यग्वस्तुपरा मतिः।
निर्णीयते प्रत्ययानां मीलितावस्य दर्शनात्॥ ३५॥
कथमेष शरीरे स्यान्निरपेक्षेण चक्षुषः॥ ३६॥
किञ्चात्र चेदहङ्कारः परकीये प्रसज्यते।
स्वत्वमात्मत्वभिन्नन्तु दुर्निरूप्यं ममेति च॥ ३७॥
ममात्मेत्यपि जानाति लोको, जानातु का क्षतिः।
अभेदेऽपि शिरो राहोरिति षष्ठ्यवलोक्यते।

गात्मनि, उपचारो न वाच्यः, किन्तु शरीर एवोपचारो वाच्य इत्यर्थः। पुनः शङ्कते, "बाहुल्यस्य" इत्यादि। अहं गौरः कृशः स्थूलः इत्यादिप्रयोगबाहुल्यं शरीरे उपलभ्यते इति तत्रैवाहङ्कारो मुख्य इति भावः। दूषयति, "नैतत्" इति। अहं यते जाने इच्छामि इति प्रयोगबाहुल्यस्य प्रत्यगात्मन्यप्यविशेषात् शरीर एवाहङ्कारो मुख्य इत्यत्र सन्देह इत्यर्थः॥ ३४॥

अथैवं कुत्राहङ्कारो मुख्य इत्यत्राह,—"क्रियमाणे प्रयत्ने तु" इति॥ ३५॥

विशेषाभिधित्सया पूर्वोक्तमेव दोषमाह,—"किञ्चात्र चेदह-ङ्कारः" इति। 'अत्र' शरीरे। स्वशरीरे भवति इत्याशङ्क्याह,— "स्वत्वम्" इति। 'ममेति च' इति। मम शरीरमित्यपि ज्ञानमस्ती-त्यर्थः। तथा च ममेति वैयधिकरण्येनानुभवात् प्रत्यगात्मन्येवाहङ्कारो मुख्य इति भावः॥ ३७॥

मुख्यस्य बाधादथ वा सुतरामौपचारिकः ॥ ३८ ॥
ममकारः शरीरेऽपि तन्नारीक्रियते जनैः ।
स्थूलः कृशो वा गौरोऽहं सुखीत्याद्येवमादिषु ॥ ३९ ॥
तदवच्छेदकत्वेन मानं देहस्य कल्प्यते ।
निबिड़ं गहनञ्चैतद् अरण्यं सिंहनादवत् ॥ ४० ॥
इत्यवच्छेदकत्वेन वनभानोपलम्भनात् ।
मनसोपस्थितं देहेऽहन्त्वमात्रं प्रतीयते ॥ ४१ ॥
त्वगिन्द्रियेणोपनीतम् औष्ण्यं यद्वद् जलादिषु ।
अहङ्कारः शरीरे वा तेष्वास्तामौपचारिकः ॥ ४२ ॥
समारोप्य शरीरेऽपि प्रतियन्तु सुखादिकम् ।
शरीरग्रहणे ज्ञाना-द्यग्रहोऽपि न सम्भवेत् ।
ज्ञानादीनां तद्गुणत्वे तदात्मा देहतः पृथक् ॥ ४३ ॥
दन्तोदकप्लवो यत् स्याद् अम्लद्रव्याद्यवेक्षणे ।
तदिन्द्रियाणां नात्मत्वं तथात्वे तदसम्भवात् ॥ ४४ ॥
इन्द्रियाणामनेकत्वाद् एकस्योद्बोधकान्वये ।

"दन्तोदकप्लवो यत् स्यात्" इत्यादि । 'यत्' यस्मात् 'तत्' तस्मात् ॥ ४४ ॥

असम्भवं दर्शयति, "इन्द्रियाणामनेकत्वात्" इति । अयमर्थः ।

अन्यस्य स्मरणायोगाद् अन्यः पन्था न सम्भवी॥ ४५॥

योऽहं यत् द्रव्यमद्राक्षं स एवाहं स्पृशामि तत्।

इत्येकमेव कर्त्तारं लोका हि प्रतिपेदिरे॥ ४६॥

चक्षुरादिषु नष्टेषु तैः साक्षात्कृतवस्तुनः।

लोकः स्मरति कस्माद् वा ज्ञाता ह्यत्र न विद्यते॥ ४७॥

क्षणिकत्वं प्रतिक्षेप्यम् अनेनैव प्रचक्षते।

अन्योऽनुभविता चान्यः स्मर्त्ता चेत्यसमञ्जसम्॥ ४८॥

संस्कारोऽपि स्थिरः कश्चिन्न त्वयाभ्युपगम्यते।

क्षणिकस्य तु सामर्थ्यं कस्मात् कालान्तरस्मृतौ॥ ४९॥

यदप्यालयविज्ञानं तस्याप्यस्थिरता यदि।

पूर्वानुभूतचिञ्चादिरसस्य चिञ्चादिदर्शनात् दन्तोदकस्रवस्तावदुपलभ्यते। स च चिञ्चादर्शनेन पूर्वानुभूतचिञ्चारसस्मरणात्, पूर्वानुभूतसाजात्यात् वर्तमानचिञ्चायामप्यम्लरसानुमानाच्च तद्गर्भितो भवति। इन्द्रियाणामात्मत्वे च नैतत् सम्भवति, रसनया हि रसो गृह्यते चक्षुषा च द्रव्यमिति कुतो रसस्मरणादि॥ ४५॥

किञ्च "योऽहं यद् द्रव्यमद्राक्षम्" इति। इन्द्रियाणामात्मत्वे हि चक्षुरेव दर्शनस्य कर्तृ, त्वगेव स्पर्शनस्येति नैषा प्रत्यभिज्ञा सम्भवतीति भावः॥ ४६॥

आत्मनः क्षणिकत्वेऽपि संस्कारात् स्मृतिर्भविष्यति इत्यत्राह, "संस्कारोऽपि स्थिरः कश्चित्" इति॥ ४९॥

तदा प्राक्तन एवात्र दोषः प्रादुर्भविष्यति ॥ ५० ॥
न हि तत्रापि संस्कारः सुस्थिरः कश्चनेष्यते ।
स्थिरत्वे क्षणिकं सर्वम् इत्यभ्युपगमः कुतः ? ॥ ५१ ॥
अपि चालयविज्ञाने प्रमाणं नास्ति किञ्चन ।
विज्ञानं हि निराकारं न किञ्चिदुपलभ्यते ॥ ५२ ॥
तस्माद् विषयसंवित्तिः स्यात् सुषुप्तिदशास्वपि ।
अन्यथा त्वन्मतेऽन्यस्य विज्ञानस्य न सम्भवः ॥ ५३ ॥
किञ्च यत्किञ्चिदेव स्याद् विज्ञानविषयो यदि ।
प्रमाणं किं तदा वाच्यं तदेकतमनिश्चये ॥ ५४ ॥
सर्वञ्चेत् तेन सार्वज्ञ्यं अद्ध्यामपि ते तदा ।

आलयविज्ञानमेव स्मर्तृ भविष्यतीत्यत्राह, "यदप्यालयविज्ञानम्" इति। अहमिति विज्ञानमालयविज्ञानमित्युच्यते, सुषुप्तौ तु निराकारैव काचिद् विज्ञानसन्ततिरस्तीति इति सौगतसिद्धान्तः ॥ ५० ॥

"तस्माद् विषयसंवित्तिः" इत्यादि। तथा च विज्ञानस्यात्मत्वे तस्य निराकारत्वासम्भवात् सुषुप्तावपि विषयानुभवप्रसङ्गः। सुषुप्तौ विज्ञानाभावाभ्युपगमे च तदुत्तरमपि विज्ञानानुत्पत्तिप्रसङ्गः पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञानं प्रति हेतुत्वाभ्युपगमात् इति भावः ॥ ५३ ॥

आख्यातुं यदि शक्नोषि यदस्ति मम चेतसि ॥ ५५ ॥

शरीरादेः परः सोऽयम् आत्मा सिद्धोऽनुमानतः ।
नित्यता द्रव्यता चास्य स्याद् वायुपरमाणुवत् ॥ ५६ ॥
अनादित्वाच्च नित्योऽसौ सरागो हि प्रजायते ।
जातस्य पूर्वसंस्कारात् स्तन्यं पिबति तत्क्षणात् ॥ ५७ ॥
तदुद्बोधे त्वनायत्या कारणत्वं प्रपद्यते ।
बालस्य जीवनादृष्टम् असौ प्राणिति नान्यथा ॥ ५८ ॥
नानवस्थाख्यदोषोऽत्र दोषो बीजाङ्कुरादिवत् ।
नाशं प्रति च जन्यानां भावानामेव हेतुता ॥ ५९ ॥

चैत्रेति सन्निकर्षेऽपि नात्मा प्रत्यक्षतां व्रजेत् ।
अतस्तदनुमानाय दृष्टं लिङ्गं न विद्यते ॥ ६० ॥

आत्मनो नित्यत्वमन्यथाप्याह, "अनादित्वाच्च नित्योऽसौ" इति। अनादित्वे हेतुमाह, "सरागो हि" इत्यादि । अयमर्थः । सुख-साधनताज्ञानाधीनो रागः, इष्टसाधनताज्ञानाधीना स्तन्यपान-प्रवृत्तिश्च जातमात्रस्योपलभ्यते, न च तदानीं तज्ज्ञानं सम्भवति, नापि तदन्तरेण रागादिकमित्यतः प्राग्भवीयं तत् कल्प्यते, तत्र तत्राप्येवमित्यनादित्वमेवात्मनः सिध्यतीति ॥ ५७ ॥

अथास्त्वनादित्वं, तावताप्यात्मनो नाशाभावे किं प्रमाणं ? येन नित्यत्वमुच्यते इत्यत्राह "नाशं प्रति च जन्यानाम्" इत्यादि ॥५९॥

वेदान्ती शङ्कते "चैत्रेति सन्निकर्षेऽपि" इति ॥ ६० ॥

लिङ्गात् सामान्यतोदृष्टाद् विशेषो नोपलभ्यते।
तन्नात्ममनने युक्तं तस्माद् आगमिकस्तु सः॥ ६१॥
वेदान्तश्रवणात् तत्त्वसाक्षात्कारो भविष्यति।
दशमस्त्वमसीत्यादौ उपदेशेन सोऽभवत्॥ ६२॥
पृथिव्यादावहंशब्दव्यतिरेकः प्रतीयते।
तत्पक्षधर्मताहेतोरात्मत्वं पर्य्यवस्यति॥ ६३॥
लिङ्गात् सामान्यतोदृष्टादपि बाधबलात् क्वचित्।
विशेषाकारिकाप्यास्ताम् अनुमा तत्र का क्षतिः॥ ६४॥

"लिङ्गात् सामान्यतोदृष्टात्" इति। 'विशेषः' आत्मत्वम्। 'नोपलभ्यते' नानुमितिविधेयतावच्छेदको भवति, अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमादिति भावः॥ ६१॥

यदुक्तं "वेदान्तश्रवणात् तत्त्वसाक्षात्कारः" इति। तत्राह, "केवलं श्रवणेनैव" इति॥ ६२॥

समाधत्ते "पृथिव्यादावहंशब्दः—" इति। अहं-पदं सप्रवृत्तिनिमित्तकं साधुपदत्वात् इत्यत्र पक्षधर्मताबलादहन्त्वमेव प्रवृत्तिनिमित्तं भासते, तच्चात्मत्वमेवेति भावः॥ ६३॥

"लिङ्गात् सामान्यतोदृष्टात्" इत्यादि। वह्निव्याप्यधूमवानिति सामान्यतः परामर्शेऽपि महानसीयवह्नीतरवह्न्यभाववानिति बाधज्ञानसत्त्वे महानसीयवह्निमानित्यनुमितिदर्शनाद् व्यापकतावच्छेदकप्रकारिकैवानुमितिरिति रिक्तं वच इत्यभिप्रायः॥ ६४॥

केवलं श्रवणेनैव मननेन विना पुनः ।
साक्षात्कारो दुर्लभः स्यात् तं विनापि न निर्वृतिः ॥ ६५ ॥
अन्तरामननं नास्ति निदिध्यासनसम्भवः ।
तमन्तरेण तत्त्वस्य साक्षात्कारः कथं भवेत् ॥ ६६ ॥
अभ्यासपाटवादेव कदाचिदुपलभ्यते
अकस्मात् कामिनी-साक्षात्कारः कामान्धचेतसः ॥ ६७ ॥
दिङ्मोहादौ न शाब्दं हि ज्ञानं नाप्यानुमानिकम् ।
मिथ्याज्ञानोन्मूलनाय क्षमं किञ्चित् समीक्ष्यते ॥ ६८ ॥
अहं यते सुखी जाने दुःखी चेत्येवमादिकः ।
प्रत्ययोऽध्यक्षमेवास्मिन् समयः सुग्रहस्ततः ॥ ६९ ॥

मननाभावे साक्षात्काराभावमाह, "अन्तरामननं नास्ति" इत्यादि ॥ ६६ ॥

ननु संसारस्य मिथ्याज्ञानजन्यत्वात् तस्य च तत्त्वमस्यादि-वाक्योत्थयथार्थज्ञानादेव नाशादलं मननादिभिरित्याशङ्क्य, अप-रोक्षमिथ्याज्ञानस्य परोक्षयथार्थज्ञानानपोह्यत्वात्, यथार्थज्ञान-स्यापरोक्षत्वसिद्धये मननादिकमावश्यकमित्यभिप्रेत्याह, "दिङ्मो-हादौ न शाब्दं हि" इति ॥ ६८ ॥

ननु तथाप्यप्रत्यक्षे आत्मनि कथं सङ्केतग्रह इत्याशङ्क्य तस्या-त्यन्तमप्रत्यक्षतां निराकरोति, "अहं यते सुखी जाने" इत्यादि । 'अस्मिन्' आत्मनि । 'समयः' सङ्केतः' ॥ ६९ ॥

नीलादिबोधवत् सोऽयं बोधो निश्चितवस्तुकः ।
नापि शाब्दो लैङ्गिको वा तद्विनाप्यस्य दर्शनात् ॥ ७० ॥
प्रत्यक्षाभास एवासौ इति चेत् तर्हि कुत्रचित् ।
अनाभासोऽपि विषयः सुतरामस्य सिध्यति ॥ ७१ ॥
न ह्यप्रमितमन्यस्मिन् अन्यत्रारोप्यते जनैः ।
आकाशकुसुमं कोऽपि नारोपयति कर्हिचित् ॥ ७२ ॥
रूपावयवशून्यत्वात् नास्ति प्रत्यक्षमात्मनि ।
तस्मादागमसिद्धोऽयं सुखाद्याधार इष्यताम् ॥ ७३ ॥
शब्दलिङ्गानुसन्धानम् अन्तरेणापि जायते ।
अहं सुखीत्येवमादिप्रत्ययोऽध्यक्षमेव सः ।
रूपावयववत्त्वन्तु वहिःप्रत्यक्षकारणम् ॥ ७४ ॥
आत्मा सिद्धः पृथिव्यादौ इच्छादिव्यतिरेकतः ॥ ७५ ॥
यदि प्रत्यक्षमेवास्ति किमर्थमनुमीयते ।

आत्मप्रत्यक्षमाक्षिपति, "रूपावयवशून्यत्वात्" इति ॥ ७३ ॥
समाधत्ते "शब्दलिङ्गानुसन्धानम्" इत्यादि ॥ ७४ ॥
ननु यद्यात्मनि प्रमाणं स्यात्, स्यादपि तदनुरोधेन रूपादेर्बहिः-प्रत्यक्षकारणत्वं, तदेव तु नास्तीत्याशङ्क्यात्मसिद्धौ हेत्वन्तरं स्मारयति, "आत्मा सिद्धः" इति ॥ ७५ ॥

किञ्च प्रत्यक्षसिद्धत्वाद् आपतेत् सिद्धसाधनम् ॥ ७६ ॥
प्रत्यक्षत्वेऽपि सन्देहापोहार्थमनुमीयते ।
अन्यथाभावशङ्कां हि निवर्तयति संप्लवः ॥ ७७ ॥
सरोवरादिसलिलं प्रत्यक्षमपि दूरतः ।
संवादार्थं बलाकादिलिङ्गैरप्यनुमीयते ॥ ७८ ॥
अहं गौरः कृशः कृष्ण इत्यादिप्रत्ययान्तरैः ।
तिरस्कृतः प्रत्ययोऽयं स्थेमानं नाधिगच्छति ॥ ७९ ॥
विद्युत्सम्पातसञ्जातज्ञानवत्, तदनन्तरम् ।
लिङ्गादनन्यथासिद्धात् ज्ञानमुत्पद्यते तु यत् ।
स्थिरीकरोत्यसन्देहं ज्ञानं प्राक्तनमेव तत् ॥ ८० ॥
श्रवणानन्तरं तस्य मननस्यापि कीर्त्तनात् ।
सिषाधयिषा भूयोऽप्यनुमानं प्रवर्त्तताम् ॥ ८१ ॥
ईश्वरादन्य एवायम् आत्मा जन्यसुखादिभिः ।
दृष्टान्तो भगवानेव व्यतिरेकाद् भविष्यति ॥ ८२ ॥
शास्त्रमप्यात्मनोऽन्यत्वम् ईश्वरादनुशास्त्यतः ।

आत्मानुमानमाक्षिपति "यदि प्रत्यक्षमेवास्ति" इति ॥ ७६ ॥

समाधत्ते "प्रत्यक्षत्वेऽपि" इति । 'अन्यथाभावशङ्काम्' अप्रामाण्यशङ्काम् । 'संप्लवः' प्रामाण्यान्तरसंवादः ॥ ७७ ॥

सिद्धसाधनं परिहरति, "श्रवणानन्तरं तस्य" इति ॥ ८१ ॥

वाक्यं तत्त्वमसीत्यादि श्रोतारं स्तौति केवलम् ॥ ८३ ॥
अभेदभावनां वापि विधत्ते मुक्तिसिद्धये ।
ब्रह्मैव भवतीत्यादि स्तौति ब्रह्मविदं परम् ॥ ८४ ॥
"सम्पूज्य ब्राह्मणं भक्त्या शूद्रोऽपि ब्राह्मणो भवेत् ।"
इति हि स्तूयते शूद्रः शुद्धात्मा द्विजपूजकः ॥ ८५ ॥
अपवर्गे च सर्वेषाम् आत्मनामविशेषतः ।
निर्दुःखत्वादिभिः साम्यम् ईश्वरेणोपजायते ॥ ८६ ॥
निरञ्जनः परं साम्यम् उपैतीत्येवमादिषु ।
शास्त्रेषु साम्यमीशेन सुस्पष्टं परिपठ्यते ॥ ८७ ॥
न ह्यविद्याविनाशेऽपि भेदो नश्यति शाश्वतः ।
तथात्वेऽप्यनिवार्य्यैव तत्र व्यक्तिद्वयस्थितिः ॥ ८८ ॥

"अभेदभावनां वापि" इति । वस्तुगत्यात्मनामीश्वरभिन्नत्वेऽपि शास्त्रप्रामाण्यादभेदभावनयैव मुक्तिरिति तत्त्वमस्यादिवाक्यानां तत्रैव तात्पर्य्यमिति भावः ॥ ८४ ॥

नन्वविद्याकृतभेदोऽविद्याविनाशे सुतरामेव नंक्ष्यति इत्याशङ्क्याह, "न ह्यविद्याविनाशेऽपि" इति । 'शाश्वतः' नित्यः । तथा च भेदस्य नित्यत्वात् नाशासम्भव इति भावः । अभ्युपगमवादेनाह, "तथात्वेऽपि" इति । भेदनाशेऽपीत्यर्थः । भेदनाशेऽपि तत्प्रतियोग्यनुयोगिरूपव्यक्तिद्वयावस्थानं दुरपह्नवमिति भावः ॥८८॥

सुखदुःखादिलिङ्गानामविशेषाद् दिगादिवत्।
ऐकात्म्यमिति चेन्नैवं व्यवस्था दृश्यते यतः ॥ ८९ ॥
कश्चिद्रङ्कः कश्चिदाढ्यः कश्चिदन्यविधः पुनः।
अनयैवात्मनानात्वं सिध्यत्यत्र व्यवस्थया ॥ ९० ॥
एकस्यापि च बाल्यादिभेदादस्तु व्यवस्थितिः।
अध्यासो हि विरुद्धानां कालभेदे, न दुष्यति ॥ ९१ ॥
कालैक्यात् प्रकृते नास्ति तादृशाध्याससम्भवः।
अन्योऽन्यमात्मनां भेदं शास्ति शास्त्रमपि स्फुटम् ॥ ९२ ॥
विभवात्तु महानात्मा तेनादृष्टवता समम्।
योगाद्धि तेषु मूर्त्तेषु युगपत् कर्मसम्भवः ॥ ९३ ॥
सञ्चारिणि शरीरेऽपि तत्र तत्र समुद्भवः।
सुखादीनां न जातु स्याद् आत्मनो वैभवं विना ॥ ९४ ॥
चेष्टा परशरीरेषु या परैरवलोक्यते।

इदानीं जीवात्मनामपि परस्परभेदं साधयितुमाह, "सुखदुःखादिलिङ्गानाम्" इत्यादि ॥ ८९ ॥

व्यवस्थां दर्शयति, "कश्चिद्रङ्कः कश्चिदाढ्यः" इति ॥ ९० ॥

ननु यथैकस्याप्यात्मनो बाल्यादिभेदाद् व्यवस्था, तथा देहभेदादप्यस्तु इत्याशङ्क्याह, "एकस्यापि च बाल्यादि—" इति ॥९१॥

परात्मनः परस्यापि लैङ्गिके लिङ्गमेव सा ॥ ९५ ॥
अनुमाय तया यत्नं तदाधारतया पुनः ।
अनन्तरं परात्मापि सुतरामनुमीयते ॥ ९६ ॥
क्षित्यङ्कुरादिकं कार्य्यं स्वर्गापूर्वादि नाम च ।
लिङ्गमीश्वरसद्भावे काणादाः सम्प्रचक्षते ॥ ९७ ॥
नावच्छिन्ना क्षितित्वेन पक्षता, परमाणुषु ।
अंशतो हि प्रसङ्गः स्यात् स्वरूपासिद्धिबाधयोः ॥ ९८ ॥
सामानाधिकरण्येन पक्षत्वेऽपि घटादिषु ।
सिद्धसाधनमेव स्यात्, साध्यञ्चापि सुदुर्वचम् ॥ ९९ ॥
कृतिमज्जन्यता नात्र निर्वक्तव्या सकर्तृता ।
अस्मदादिकमादाय सिद्धसाधनसम्भवात् ॥ १०० ॥
अदृष्टं द्वारमासाद्य कृतिर्जनयति क्षितिम् ।

परात्मानुमानप्रकारमाह, "चेष्टा परशरीरेषु" इति ॥ ९५ ॥

इदानीमीश्वरानुमानप्रकारमाह, "क्षित्यङ्कुरादिकं कार्य्यम्" इति ॥ ९७ ॥

तत्र क्षितिः सकर्तृका कार्य्यत्वात्, इत्यनुमानमीश्वरसाधकमिति केचित्। तत्र क्षितित्वावच्छेदेन सकर्तृकत्वं साध्यते, तत् असामानाधिकरण्येन सामानाधिकरण्येन वा? तत्र न तावदाद्य इत्याह, "नावच्छिन्ना क्षितित्वेन" इत्यादि ॥ ९८ ॥

नापि द्वितीय इत्याह, "सामानाधिकरण्येन" इत्यादि ॥९९॥

अस्माकमपि चेत् तर्हि सुव्यक्तं सिद्धसाधनम् ॥ १०१ ॥
नैवमर्थान्तरेणात्र कार्य्यत्वेनैव पक्षता।
सम्बन्धभेदरूपेण वावच्छिन्नेत्यदूषणम् ॥ १०२ ॥
हेतुश्च प्रागभावस्य प्रतियोगित्वमिष्यते।
अदृष्टद्वारिका चात्र कृतिमज्जन्यता पुनः ॥ १०३ ॥
सकर्त्तृता, साधनीया चिन्त्यमन्यन्मनीषिभिः।
सन्दिग्धानैकान्तिकत्वम् अङ्कुरादौ न शङ्क्यते ॥ १०४ ॥
दोषत्वमस्य हि प्राज्ञः साध्याभावस्य निश्चये।
निश्चिते साध्यविरहे हेतोरपि च संशयः ॥ १०५ ॥
सदसत्त्वे भवेत् यत्र तत्रैवैतस्य दोषता।
अन्यथा त्वनुमा-मात्रम् उच्छिद्येत भवन्मते ॥ १०६ ॥
सर्व्वेष्वप्यनुमानेषु प्रायः सन्देहसम्भवात्।
पक्षातिरिक्ते दोषोऽयं राजाज्ञावदिदं वचः ॥ १०७ ॥
दोषस्य महिमा नैष, नचान्यत् किञ्च कारणम् ॥ १०८ ॥
संज्ञापि लिङ्गमीशस्य स्वर्गापूर्वादिकेष्यते।
चैत्रादिसंज्ञा पित्राद्यैः कृतापीश्वरसम्मता ॥ १०९ ॥

स्वमतमाह, "नैवमर्थान्तरेणात्र" इत्यादि। तथा च कार्य्यं सकर्त्तृकं प्रागभावप्रतियोगित्वात्, घटवत्, इत्यनुमानं फलितम् ॥१०२॥

प्रत्यक्षे चैत्रमैत्रादि-संज्ञाकरणदर्शनात् ।
अध्यक्षसाध्यतानाम्नः स्वर्गादेरपि युज्यते ॥ ११० ॥

क्षित्यादिकार्य्यमखादि-कारणाध्यक्षसम्भवम् ।
सुतरां कर्त्तुरीशस्य सार्वज्ञ्यमपि सिध्यति ॥ १११ ॥

कुतर्कजालैः किल तार्किकाणां
दोलायमानानि मनांसि येषाम् ।
आत्मानुभूतिर्विदधातु सैषा
तेषां सुखं सम्प्रति सम्प्रतिष्ठा ॥ ११२ ॥

इति श्रीचन्द्रकान्ततर्कालङ्कार-प्रणीतायां तत्त्वावलौ
आत्मानुभूतिर्नाम सप्तमः परिच्छेदः ।

ईश्वरस्य सर्वज्ञत्वसिद्ध्यर्थमाह, "प्रत्यक्षे चैत्रमैत्रादि—" इत्यादि ॥ ११० ॥

"क्षित्यादिकार्य्यमखादि—" इत्यादि । कुलालादयो हि कपालादिकं दृष्ट्वैव घटादिकं कुर्वन्तीति लोके बहुलमुपलभ्यते ॥१११॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां
आत्मानुभूतिर्नामकः सप्तमः परिच्छेदः समाप्तः ।

चित्ततत्त्वं नाम

अष्टमः परिच्छेदः ।

आत्मेन्द्रियार्थसम्बन्धे भावाभावो मतेर्मतम् ।
मनोलिङ्गं, यौगपद्याभिमानो भ्रान्त इष्यते ॥ १ ॥
शीघ्रसञ्चारिमनसा जनितेष्वपि पञ्चसु ।
तेषु स्मृत्युपनीतेषु यौगपद्याभिमानतः ॥ २ ॥
तथानु, वैभवे दुःखं पादे, शीर्षे सुखं मम ।
प्रादेशिकत्वमित्येषां न स्यात्, न स्याद्व्यवस्थितिः ॥ ३ ॥

"आत्मेन्द्रियार्थसम्बन्धे" इत्यादि । आत्मेन्द्रियार्थसन्निकर्षे सति मतेर्भावाभावो मनोलिङ्गमित्यर्थः । अयमर्थः, यदिन्द्रियेण यदा मनसः सन्निकर्षस्तदा तदिन्द्रियजमेव ज्ञानमुत्पद्यते, नान्यत् । ज्ञानादेरयौगपद्यं तावदुपलभ्यते, मन एव तन्नियामकं, न ह्येकदा चाक्षुषं रासनादिकञ्च भवतीति मनः स्वीकार्य्यम् । तर्हि रूपरसगन्धान् युगपत् प्रत्येमीत्यभिमानः कथम् ? इत्यत्राह "यौगपद्याभिमानः" इति ॥ १ ॥

"शीघ्रसञ्चारिमनसा" इत्यादि । 'तेषु' ज्ञानेषु ॥ २ ॥

"प्रादेशिकत्वमित्येषाम्" इत्यादि । विभुकार्य्याणामसमवायिकारणावच्छिन्नदेशे उत्पत्तिनियमादित्याशयः । मनसो वैभवे हि

विरोधमविरोधं वा सामग्री न हि पश्यति ।
रासनादिविरोधाय तद्विभ्येत् कुत एव सा ॥ ४ ॥
वैभवे चेतसश्चित्ररूपवच्चित्रमेव वा ।
ज्ञानमुत्पद्यतां, दीर्घशष्कुलीभक्षणस्थले ॥ ५ ॥
—व्यासङ्गोऽस्त्येव, किन्त्वेष पलाशशतभेदवत् ।
—सुतरामाशुसञ्चारान्मनसः स्फुट एव न ॥ ६ ॥
धर्मिग्राहकमानेन बाध्या वैभवहेतवः ।
बुभुत्सयाप्यन्यथा तु व्यासङ्गो नोपपद्यते ॥ ७ ॥

तत्संयोगस्यासमवायिकारणस्य प्रादेशिकत्वानुपपत्त्या सुखादेरपि तथात्वासम्भव इति भावः । 'व्यवस्थितिः' ज्ञानादेरयौगपद्यम् । वैभवे हि युगपदेव सर्वैरिन्द्रियैर्मनसः सन्निकर्षात् युगपदेव सार्वेन्द्रियं ज्ञानमपि स्यादिति भावः ॥ ३ ॥

ननु तथापि कार्य्यविरोधभयादेव व्यवस्था भविष्यति इत्यत्राह, "विरोधमविरोधं वा" इति ॥ ४ ॥

दीर्घशष्कुलीभक्षणस्थले तदस्त्येव इत्याशङ्क्याह, "दीर्घशष्कुली-भक्षणस्थले" इत्यादि ॥ ५ ॥

ननु मनो विभु विशेषगुणशून्यत्वात् कालवत्, इत्याद्यनुमानानां का गतिरित्यत्राह, "धर्म्मिग्राहकमानेन" इत्यादि । ननु मनसो वैभवेऽपि बुभुत्सयैव व्यासङ्गो भविष्यति इत्याशङ्क्याह, "बुभुत्सयापि" इति । 'व्यासङ्गः' ज्ञानादेरयौगपद्यम् ॥ ७ ॥

अर्थो योऽभिमतो ज्ञातुरिन्द्रियं तद्ग्रहक्षमम् ।
यत् तेन योगो मनसो यस्तन्मात्रफला हि सा ॥ ८ ॥
किञ्च सर्वबुभुत्सा चेत् ज्ञातुर्भवति कर्हिचित् ।
तर्हि ज्ञानं प्रजायेत युगपत् सर्वगोचरम् ॥ ९ ॥
हेतुर्योऽसमवायी स स्वदेशे जनयत्यपि ।
विभुकार्य्यमतो नास्ति सुखादेरणुदेशता ॥ १० ॥
निमित्तचन्दनादीनाम् अवच्छेदकदेशतः ।
देशेऽधिकेऽपि सद्भावः सुखादेर्न विरुध्यते ॥ ११ ॥
किञ्चास्य वैभवे तेन संयोगोऽप्यात्मनः कथम् ।
अजत्वं तस्य नो वाच्यं विभागे तत्प्रसङ्गतः ॥ १२ ॥
अवच्छेदकभेदोऽपि स्वकारणवशात् तयोः ।
न निस्तारस्ततोऽप्यस्ति, नास्त्यजत्वे यतस्तु सः ॥ १३ ॥
अस्तु चाक्षुषसामग्री त्वाचं प्रति विरोधिनी ।

ननु मनसोऽणुत्वेऽपि सुखादेरणुदेशत्वापत्तिरित्यत्राह, "हेतुर्योऽसमवायी स" इत्यादि । 'जनयत्यपि' इत्यपिरेवार्थः । तथा च असमवायिकारणं विभुकार्य्यं स्वदेशे जनयत्येव इति नियम इति भावः ॥ १० ॥

अवच्छेदकभेदात् द्वयमप्यस्तु ? इत्याशङ्क्याह "अवच्छेदकभेदोऽपि" इति । 'सः' अवच्छेदकभेदः ॥ १३ ॥

त्वाचापत्तिस्ततो नास्ति चाक्षुषाध्यक्षसम्भवे ॥ १४ ॥
अथवा ज्ञानसामान्ये चर्मणा सह चेतसः ।
हेतुः संयोग एवास्तु दोषो नास्त्यत्र कश्चन ॥ १५ ॥
तस्य द्रव्यत्वनित्यत्वे वायूनां परमाणुवत् ।
अचलाद् गुणवत्तास्य नित्यताऽनाश्रितत्वतः ॥ १६ ॥
साक्षात्कारः सुखादीनां मनःकरणको यतः ।
इन्द्रियत्वमतस्तस्य सुतराञ्चक्षुरादिवत् ॥ १७ ॥
अयौगपद्याद् यत्नानां ज्ञानानाञ्चैकमेव तत् ।
—प्रतिदेहं, वृश्चिकादिखण्डे पण्डमनोऽन्तरम् ॥ १८ ॥

ननु तथापि ज्ञानसामान्ये त्वङ्मनः संयोगस्य हेतुतया चाक्षुषादिकालेऽपि त्वाचापत्तिरित्यत्राह, "अस्तु चाक्षुषसामग्री", इति ॥ १४ ॥

मनस इन्द्रियत्वमुपपादयति, "साक्षात्कारः सुखादीनाम्" इत्यादि । सुखादिसाक्षात्कार इन्द्रियकरणकः साक्षात्कारत्वात् रूपादिसाक्षात्कारवदित्यनुमानं मनस इन्द्रियत्वे मानम् । एवञ्च सुखाद्युपलब्धिः करणसाध्या उपलब्धित्वात् रूपाद्युपलब्धिवदित्यनुमानेनापि मनःसिद्धिरित्यनुसन्धेयम् ॥ १७ ॥

इदानीं प्रतिदेहं मनस एकत्वमाह, "अयौगपद्याद्यत्नानाम्" इत्यादि । यदा यदङ्गेन मनःसंयोगस्तदा तदङ्गावच्छेदेन प्रयत्न उत्पद्यते इति प्रयत्नायौगपद्यमनुभूयते, प्रतिदेहं मनसो नानात्वे तु

सन्निकृष्टमदृष्टेन तदानीं कर्म कारणम् ।
खड्गाभिघातादथवा सञ्चाराद्वाशु चेतसः ॥ १९ ॥
तत्र खण्डद्वये कर्म चिन्तनीयं विचक्षणैः ।
मनसः शीघ्रसञ्चारात् नर्त्तकीचरणादिषु ।
प्रयत्नयौगपद्यञ्च सुतरामभिमन्यते ॥ २० ॥
अविनश्यदवस्था ये योग्या वैशेषिका गुणाः ।
आत्मनो यौगपद्यं नो तेषामभ्युपगम्यते ॥ २१ ॥
मनः सावयवं किन्तु तत् संयोगविकाशवत् ।
कूर्मशुण्डादिवत्, तस्मात् द्वयमप्युपपद्यते ॥ २२ ॥
अनन्तावयवादीनां कल्पना गौरवान्न तत् ।

तन्न स्यादिति भावः । ननु प्रतिदेहं मनस एकत्वे छिन्नवृश्चिकादि-खण्डद्वये कथं युगपदेव कर्मोपलम्भ इत्यत्राह, "वृश्चिकादिखण्डे" इत्यादि ॥ १८ ॥

वस्तुगत्या प्रयत्नयौगपद्यं न सम्भवति इत्याह, "अविनश्यदवस्था ये" इत्यादि ॥ २१ ॥

मतान्तरमाह, "मनः सावयवं किन्तु" इत्यादि । 'द्वयं' ज्ञाना-द्यौगपद्यमयौगपद्यञ्च ॥ २२ ॥

तदेतन्मतं दूषयति, "अनन्तावयवादीनाम्" इत्यादि । 'अतएव' कल्पना गौरवादेव । 'अस्मिन्' देहे । एतेन प्रतिशरीरं पञ्च

अतएव प्रकल्प्यन्ते नास्मिन् पञ्च मनांस्यपि ॥ २३ ॥

चित्ततत्त्वमिदं तत्त्व-विदामनुमतं मतम्।

परं निरस्यतु परं साम्प्रतं यदसाम्प्रतम्।

इति श्रीचन्द्रकान्ततर्कालङ्कार-प्रणीतायां तत्त्वावलौ

चित्ततत्त्वनामकोऽष्टमः परिच्छेदः।

मनांसि विद्यन्ते, तेषाञ्च द्वित्रिचतुःपञ्चानां तत्तदिन्द्रियसन्निकर्षे सति, द्वे त्रीणि चत्वारि पञ्च वा ज्ञानानि युगपदुत्पद्यन्ते इति मतं निरस्त-मिति भावः ॥ २३ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां

चित्ततत्त्वनामकोऽष्टमः परिच्छेदः।

वैशेषिकाजीवरक्षा नाम

नवमः परिच्छेदः।

द्रव्याश्रयी चागुणवान् अनपेक्षो न कारणम्।
संयोगेषु विभागेषु तदेतद् गुणलक्षणम्॥ १॥
पृथिवीष्वप्सु तेजःसु पवनेषु यथायथम्।
रूपगन्धरसस्पर्शा अनित्याः परिकीर्त्तिताः॥ २॥
अमीषामाश्रयापायाद् अपायः केवलं मतः।
अन्येषामन्यथाप्येष, विशेषः सोऽयमीक्ष्यते॥ ३॥

गुणलक्षणमाह, "द्रव्याश्रयी चागुणवान्" इति। द्रव्यमाश्रयितुं शीलमस्येति द्रव्याश्रयी। अत्र च सकलद्रव्यनिरूपिताश्रयतावच्छेदकसत्तान्यजातिमत्त्वमर्थः। 'अगुणवान्' इति गुणवान् यो न भवति, द्रव्यभिन्न इति फलितार्थः। एवं संयोगविभागेष्वनपेक्षः सन् कारणं यो न भवति, कर्मभिन्न इति फलितार्थः। अत्रापि द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वमर्थ इत्यनुसन्धेयम्॥ १॥

"पृथिवीष्वप्सु तेजःसु" इत्यादि। पृथिव्यां रूप-रस-गन्ध-स्पर्शाः, जले रूप-रस-स्पर्शाः, तेजसि रूपस्पर्शौ, वायौ स्पर्श इति विवेक्तव्यम्॥ २॥

अन्येऽप्यवयविगुणा ह्यनित्याः सन्ति, ते कथं नोच्यन्ते? इत्य-

अप्सु तेजसि वायौ च परमाणु-स्वरूपके ।

द्रव्यनित्यत्वतस्तत्त्वम् एतेषामिति चिन्त्यताम् ॥ ४ ॥

गुणान्तरोद्भवाभावात् तेष्वेषां नास्त्यनित्यता ।

नित्याश्रितानामन्येषां तत्त्वं तदुपलम्भनात् ॥ ५ ॥

नो चेत् पूर्व्वविजातीयं रूपाद्यवयविष्वपि ।

द्व्यणुकादिक्रमेणैषाम् उपलभ्येत निश्चितम् ॥ ६ ॥

माह, "अमीषामाश्रयापायात्" इत्यादि । 'अन्यथापि' विरोधि-गुणान्तरेणापि ॥ ३ ॥

ननु द्रव्यनित्यत्वतः इति कथं युक्तिः ? नित्येऽपि द्रव्ये, गुणानामनित्यत्वे को विरोधः ? इति चेद् अयमत्र सिद्धान्तः ; द्विधा हि गुणानां विनाशः, आश्रयनाशात् गुणान्तरप्रादुर्भावात् वा । तत्र नित्यवृत्तिगुणानामाश्रयनाशात् नाश इति न सम्भवति इति द्रव्यनित्यत्वत इत्यनेनोक्तम् । गुणान्तरप्रादुर्भावोऽप्याप्यादिपरमाणुषु नास्तीत्याह, "गुणान्तरोद्भवाभावात्" इति । "नित्याश्रितानामन्येषाम्" इति । 'तत्त्वम्' अनित्यत्वम् । 'तदुपलम्भनात्' गुणान्तरप्रादुर्भावदर्शनात् । दृश्यते हि तीव्रमन्दादिभावः शब्दे इत्यस्याकाशे गुणान्तरप्रादुर्भावः, ज्ञानादिविरोधि संस्कारादि चान्यत्र ॥ ५ ॥

आप्यादिपरमाणुषु गुणान्तरप्रादुर्भावाभ्युपगमे दोषमाह, "नो चेत् पूर्वविजातीयम्" इति । 'नो चेत्' आप्यादिपरमाणुषु गुणान्तरप्रादुर्भावे ॥ ६ ॥

रूपगन्धरसस्पर्शाद्याश्च कार्य्याश्रितास्तु ये।
स्वकारणगुणोत्पन्नास्ते सर्वे परिकीर्त्तिताः॥ ७॥
पाकजा अष्यमी ज्ञेयाः पृथिवीषु विचक्षणैः।
रूपादीनां लक्षणानि रूपत्वादिकजातयः॥ ८॥
उपाधिर्नात्र रूपत्वं चक्षुर्ग्राह्यत्वमिष्यते।
चक्षुःसम्बन्धमात्रेण रूपमित्युपलम्भनात्॥ ९॥
चक्षुस्तद्ग्राह्यता वा स्याद् उपाधिस्तदचाक्षुषम्।
तद्विशिष्टप्रतीतिश्च चाक्षुषीत्यसमञ्जसम्॥ १०॥
नीलनीलतरेत्येवं तारतम्यं प्रतीयते।
धावल्यासम्भेदजत्वे प्रमाणं नास्ति किञ्चन॥ ११॥

लाघवादेकग्रन्थेन रूप-गन्ध-रस-स्पर्शान् लक्षयति, "रूपादीनां लक्षणानि" इति॥ ८॥

ननु चक्षुर्ग्राह्यत्वं रूपत्वमुपाधिरेव न जातिरित्याशङ्क्याह, "उपाधिर्नात्र रूपत्वम्" इति। "चक्षुः सम्बन्धमात्रेण" इति। यदि हि रूपत्वमुपाधिः स्यात्, चक्षुःपातमात्रेण रूपमिति तद्विशिष्टप्रतीतिर्न स्यात्, न ह्युपाध्यनुसन्धानमन्तरेण तदुपहितप्रत्यय इति भावः॥९॥

एकैका एव नीलपीतादिव्यक्तयो नित्याश्च इति मतं दूषयति, "नीलनीलतरेत्येवम्" इति। एकत्वे तारतम्यप्रतीत्यसम्भव इति भावः। ननु धावल्यासम्भेदकृतस्तथाप्रत्यय इत्याशङ्क्याह, "धावल्यासम्भेदजत्वे" इति॥ ११॥

विनष्टं रक्तमेतस्मिन् उत्पन्नं श्याम इत्यपि ।
नाशोत्पत्ती प्रतीयेते, तदेकत्वमसम्भवि ॥ १२ ॥
समवायस्य नित्यत्वाद् अनुल्लेखाच्च संविदाम् ।
तेन नास्त्यन्यथासिद्धिरन्यत्राप्यस्तु साऽन्यथा ॥ १३ ॥
भिद्यन्ते द्रव्यतस्ते तु रूपस्पर्शादयो गुणाः ।
घटो रूपं घटः स्पर्श इत्याद्यनुपलम्भनात् ॥ १४ ॥
नीलः पटो घटः शुक्ल इत्यादिप्रत्ययाः पुनः ।
उपपाद्या मतुब्लोपाद् उपचारादथापि वा ॥ १५ ॥
गन्धोऽयं चन्दनस्येति भेदेन व्यपदिश्यते ।
गुणानां गुणितो भेदः सुतरामेव सिध्यति ॥ १६ ॥
त्वगिन्द्रियेण गृह्येत पटवद्रूपमन्यथा ।
व्यवहारानैयत्यञ्च प्रसज्येत तथा सति ॥ १७ ॥

ननु समवायेोत्पत्तिविनाशवत्ता तादृशी प्रतीतिरित्याशङ्क्याह, “समवायस्य नित्यत्वात्” इति । उत्पत्तिविनाशशीला बहवः समवाया इति मतमाशङ्क्याह, “अनुल्लेखाच्च” इति । ‘अन्यत्रापि’ घटादिष्वपि । ‘सा’ अन्यथासिद्धिः । अयमर्थः रक्तं नष्टमिति प्रतीतिः समवायं नोल्लिखतीति न समवायविषयत्वं तस्याः । अन्यथा तुल्ययुक्त्या घटो नष्ट इत्यादेरपि समवायविषयत्वमभ्युपेत्य घटादेरपि नित्यत्वं किमिति न रोचयेरिति भावः ॥ १३ ॥

भेदाभेदस्तयोर्नास्ति न चावच्छेदभिन्नता।
अत्यन्ताभाववन्नापि प्रतीतिरिह विद्यते॥ १८॥
रूपत्वेनैव साजात्यात् चाक्षुषानुपपत्तितः।
अन्येषामपि चित्रत्वात् चित्रं रूपं पटादिषु॥ १९॥

"व्यवहारानैयत्यञ्च" इति। पटम् आनयेत्युक्तो यत्किञ्चित् रूपं, रूपमानयेत्युक्तो च यत्किञ्चित् द्रव्यमानयेदिति भावः॥ १७॥

तर्हि गुणगुणिनोर्भेदाभेद एवास्तु, अत्यन्तभेदे घटपटयोरिव, अत्यन्ताभेदे च घटयोरिव सामानाधिकरण्यानुपपत्तेरित्यत्राह, "भेदाभेदस्तयोर्नास्ति" इति। न ह्यवच्छेदकभेदमन्तरेण विरुद्धयोरेकत्र समावेशः न चानयोरवच्छेदकभेदोऽस्तीत्याह, "न चावच्छेदभिन्नता" इति। ननु अन्योन्याभावत्वमव्याप्यवृत्तिवृत्ति, नित्याभाववृत्तिधर्मत्वात् अत्यन्ताभावत्ववदित्यनुमानात् अन्योन्याभावस्याव्याप्यवृत्तित्वसिद्धिरिति चेत्? यत्र तथा प्रतीतिस्तत्रैव (मूले वृक्षः कपिसंयोगवानित्यादौ) वरमुक्तानुमानात् तथात्वमस्तु, एकत्रैव संयोगतदभावयोः प्रतीतिबलादत्यन्ताभावस्य तथात्ववत्, प्रकृते तु तथाप्रतीतिर्नास्तीत्याह, "अत्यन्ताभाववत्" इति॥ १८॥

चित्रमप्यतिरिक्तमित्याह, "रूपत्वेनैव साजात्यात्" इति। तत्र पटादिषु चित्रं रूपमिति प्रतिज्ञा। अवयवानां नीलपीतादिविभिन्नरूपत्वात् परस्परविरोधेन नीलपीताद्येकमात्रारम्भासम्भवादिति भावः। ननु नीलादिभिरवयवैस्तद्विजातीयं चित्रमपि रूपं कथमारभ्यते इत्यत्राह, "रूपत्वेनैव" इति। रूपारम्भे रूपत्वेनैव

अपि सामान्यसामग्र्यां तद्विशेषव्यतिक्रमात्।
नीलपीताद्येकमात्रात् चित्रापत्तिरसाम्प्रतम्॥ २०॥

यत्र वा पाकतश्चित्रं रूपं स्यात् परमाणुषु।
परम्परातदारब्ध-घटादिष्वपि तत्र तत्॥ २१॥

विजातीयारम्भकत्वासम्भवान्न रसादि तत्।

साजात्यमपेक्षितं न तु नीलत्वादिविशेषरूपेणापीत्यर्थः। तत्र हेतुः, "चाक्षुषानुपपत्तितः" इति। यदि हि विजातीयमिति चित्रं रूप-मवयविनि नारभ्यते, तदा तस्य नीरूपत्वात् चाक्षुषत्वानुपपत्तिरिति भावः। अथावयविनो नीरूपत्वेऽप्यवयवरूपैरेव प्रत्यक्षमास्तामि-त्याशङ्क्य, यत्रावयवानामपि चित्रत्वं तत्र तेषामपि नीरूपत्वापत्त्या न तावतापि निर्वाह इत्याह, "अन्येषामपि" इति। अवयवाना-मपीत्यर्थः॥ १९॥

ननु रूपत्वेन साजात्याभ्युपगमे नीलाद्येकमात्रादपि चित्रापत्ति-रित्याशङ्क्याह, "अपि सामान्यसामग्र्याम्" इति। तथा च तत्तत् चित्ररूपं प्रतिविशिष्य-तत्तद्व्यक्तित्वेन नीलादेरवयविनो वा हेतु-त्वाभ्युपगमाददोष इति भावः। प्रागभावस्यैव वा हेतुत्वमभ्युपेयम्। यत्रापि नीलघटे पाकात् रक्तोत्पत्तिर्भविता, तत्रापि कणादनये नानुपपत्तिः, पाकेन पूर्वघट-नाशात् घटान्तरे चित्रोत्पादात्, तत्-प्रागभावस्य पूर्वघटेऽसत्त्वादिति ध्येयम्॥ २०॥

घटादिषु चित्ररूपे प्रमाणान्तरमाह, "यत्र वा पाकतश्चित्रम्" इति॥ २१॥

नीरसत्वेऽप्यदोषत्वाद् अन्यथाप्युपपत्तितः ॥ २२ ॥

नीलपीतादिभेदेन रूपं नानाविधं स्मृतम् ।

मधुराम्लादिभेदेन रसः षड्विध इष्यते ॥ २३ ॥

सुरभिश्च तदन्यश्चेत्येवं गन्धो द्विधा मतः ।

अनुष्णाशीतशीतोष्णभेदात् स्पर्शस्त्रिधोच्यते ॥ २४ ॥

प्रत्यक्षे चाक्षुषे रूपं चक्षुषः सहकारि तत् ।

हेतुता नेष्यते तस्य रूपाभावग्रहादिषु ।

रासनादौ रसादीनां सहकारित्वमूह्यताम् ॥ २५ ॥

पाकजप्रक्रियेदानीं संक्षेपेण निरूप्यते ।

परमाणुषु पाकः स्याद् औलुक्यस्य मुनेर्मते ॥ २६ ॥

पच्यन्ते वह्निसंयोगात् स्वतन्त्राः परमाणवः ।

श्यामादिनाशस्तेनात्र रक्तिमादि च जन्यते ।

रक्ताद्युत्पद्यते पश्चात् तस्मादवयविष्वपि ॥ २७ ॥

चित्ररसादौ प्रमाणं नास्तीत्याह, "विजातीयारम्भकत्वासम्भवात्" इति । तत्रापि रसत्वेनैव साजात्यं किन्निति नोपेयते इति चेदनुपपत्त्यभावादित्याह, "नीरसत्वेऽपि" इति । अवयविन इत्यादिः । तत्रावयवरसस्यैवोपलब्धिरिति भावः ॥ २२ ॥

"श्यामादिनाशस्तेनात्र" इति । 'तेन' अग्निसंयोगेन । 'अत्र' परमाणुषु । 'तस्मात्' परमाणुगतरक्तादिरूपात् ॥ २७ ॥

एकद्रव्यत्वतस्तत्त्वम् एतेषामनुमीयते ।
सामानाधिकरण्येन कार्य्यरूपेषु हेतुता ॥ २८ ॥

स्थाल्यादौ तण्डुलादीनाम् आहितानाञ्च भर्जनात् ।
अधःसन्तापमात्रेण नाग्नः प्रत्यक्षमीक्ष्यते ॥ २९ ॥
आपाके दहनज्वालाजालाभिहतवस्तुनः ।
यथापूर्बमवस्थानं प्रत्याश्रयं महीयसी ॥ ३० ॥

पार्थिवपरमाणुरूपादीनां पाकजत्वेऽनुमानं प्रमाणमाह, "एकद्रव्यत्वतस्तत्त्वम्" इति । 'एकद्रव्यत्वतः' एकमात्रद्रव्यवृत्तित्वात् । 'तत्त्वम्' अग्निसंयोगजत्वम् । अत्रायं प्रयोगः, पार्थिवपरमाणुरूपादयः संयोगजन्याः कार्य्यगुणत्वे सति नित्यनिष्ठाद्विष्ठगुणत्वात्, शब्दवत् बुद्ध्यादिवच्च । विभागजेऽपि शब्दे वायुसंयोगस्य निमित्तत्वमस्तीति न दृष्टान्तहानिः । अत्र च तेजोऽन्वयव्यतिरेकदर्शनात् संयोग इति तेजःसंयोग एव पर्य्यवसानं पक्षधर्मताबलादिति द्रष्टव्यम् । ननु परमाणुरूपादीनां कथं कार्य्यरूपहेतुत्वं वैयधिकरण्यादित्यत्राह, "सामानाधिकरण्येन" इति । स्वसमवायिसमवायरूपसामानाधिकरण्यसम्बन्धेन इत्यर्थः । स्वं परमाणुरूपादि ॥ २८ ॥

इदानीं पिठरपाकवादि-नैयायिकमतं दूषयति, "स्थाल्यादौ तण्डुलादीनाम्" इति ॥ २९ ॥

"प्रत्याश्रयं महीयसी" इति । तथा चापाके द्रव्यनाशावश्यम्भावात् परमाणुष्वेव पाक इति भावः ॥ ३० ॥

पाको नावयविष्वस्ति मध्यभागे स दुर्घटः ।
श्यामा अवयवा, रक्तोऽवयवीत्यसमञ्जसम् ॥ ३१ ॥
दृढावयवसंयुक्ते मध्यभागे विरोधतः ।
सम्भाव्यते कथं नाम संयोगस्तेजसः पुनः ॥ ३२ ॥
यदि द्रव्यविनाशः स्यात् प्रत्यभिज्ञा कथं तदा ? ।
घटादेस्तादृशस्यैव सर्वदा दर्शनं कथम् ? ॥ ३३ ॥
घटादेरूपविन्यस्तं शरावोदञ्चनादिकम् ।
स्फुटनेऽपि घटादीनां तथैव कथमीक्ष्यते ? ॥ ३४ ॥
यावन्त एव निहिताः पुनस्तावन्त एव ते ।

किञ्च "पाको नावयविष्वस्ति" इति । "मध्यभागे" इति, दृढतरावयवान्तरयुक्ते मध्यभागे तेजःसंयोगासम्भवादिति भावः । एवञ्च सति "श्यामा" इति ॥ ३१ ॥

ननु कुम्भादावन्तर्निहितघृतादीनामपि स्यन्दनक्षपनोयलम्भात् सच्छिद्राण्येवावयविद्रव्याणीति न मध्यभागे पाकानुपपत्तिरित्यत्राह, "दृढावयवसंयुक्ते" इति । 'विरोधतः' मूर्त्तानां समानदेशताविरोधात् । तथा च छिद्रावच्छेदेनाग्निसंयोगोऽस्तु, निश्छिद्रावच्छेदेन तु पाकानुपपत्तिरेवेति भावः ॥ ३२ ॥

पिठरपाकवादी प्रत्यवतिष्ठते, "यदि द्रव्यविनाशः स्यात्" इत्यादि ॥ ३३ ॥

प्राप्यन्ते वा कथं ? तेषां न्यूनाधिक्यं कथं न वा ? ॥ ३५ ॥
परिमाणान्यता तेषां कथं वा नोपलभ्यते ? ।
कथं रेखोपरेखादिचिह्नलोपोऽपि नेति चेत् ॥ ३६ ॥
कियतां त्रसरेणूनां सूच्यग्रेण घटादिषु ।
विभागेऽनुपपत्तौनां परेषामपि का गतिः ॥ ३७ ॥
द्रव्यारम्भकसंयोगविनाशो यदि जायते ।
तेऽपि वक्तुं नोत्सहन्तेऽविनाशं वस्तुनस्तदा ॥ ३८ ॥
अणुसंयोगनाशेन द्व्यणुकस्तत्र नश्यति ।
कुतस्तदाश्रितादीनाम् अवस्थानस्य सम्भवः ? ॥ ३९ ॥

पिलुपाकवादी समाधत्ते, "इति चेत्" इति ॥ ३६ ॥

"कियतां त्रसरेणूनाम्" इति । 'का गतिः' किं समाधानम् । तथा च तादृशदोषाणामुभयमतेऽपि तुल्यत्वाददोषत्वमेवेति भावः ॥ ३७ ॥

पिठरपाकवादिमते तत्र द्रव्यनाश आवश्यक इत्याह, "द्रव्यारम्भकसंयोग—" इत्यादि । असमवायिकारणनाशस्य द्रव्यनाशहेतुत्वादिति भावः ॥ ३८ ॥

"अणुसंयोगनाशेन" इति । 'तदाश्रितादीनां' द्व्यणुकाश्रितादीनाम् । द्व्यणुकनाशेन तदाश्रितस्य त्रसरेणोस्तन्नाशे च तदाश्रितस्यापि नाश इत्यादिरीत्या महावयविपर्य्यन्तानामेव तत्र नाश इति भावः ॥ ३९ ॥

सती यद्यपि सामग्री तथाप्येषार्जयिष्यति।
न कार्य्यं, युज्यते नैतन्नचाप्यभ्युपगम्यते ॥ ४० ॥
शिष्टावयवमाश्रित्य कार्य्यावस्थानसम्भवात्।
—नैतत्, नो चेत् कथं तत्र प्रत्यभिज्ञादि? तन्न सत् ॥४१॥
तेषां तेष्वनवस्थानात् सङ्कोचादेरसम्भवात्।
माननाशे हेत्वभावात् तत्राप्येवं प्रसञ्जनात् ॥ ४२ ॥

"सती यद्यपि सामग्री" इत्यादि। 'सती' विद्यमाना। तथा च तत्र सामग्रीसद्भावादवश्यमेव द्रव्यनाश इति भावः ॥ ४० ॥

मीमांसकः शङ्कते, "शिष्टावयवमाश्रित्य" इति। 'नैतत्' न, प्रकृतस्थले (सूच्यग्रेण कियत्परिमित-त्रसरेणुविभागे) द्रव्यनाशः। विपक्षे बाधकमप्याह, "नो चेत्" इत्यादि। द्रव्यनाशे प्रत्यभिज्ञा न स्यादिति भावः। तदेतन्मतं दूषयति, "तन्न सत्" इति। 'तत्' शिष्टावयवमाश्रितद्रव्यावस्थानम् ॥ ४१ ॥

तत्र हेतुः, "तेषां तेष्वनवस्थानात्" इति। 'तेषां' तावदवयवावस्थानयोग्यघटादीनाम्। 'तेषु' स्वल्पेष्ववयवेषु। 'अनवस्थानात्' अवस्थानासम्भवात्। अविनष्ट एव पटे परिमाणसङ्कोचविकाशवदिदमपि किं न स्यात्? इत्यत्राह, "सङ्कोचादेः" इति। अस्तु पटस्याकठिनावयवत्वात् परिमाणसङ्कोचः, कठिनतरावयवानान्तु पाषाणकुम्भादीनां नैतत् सम्भवतीत्यर्थः। ननु सूचीदलनस्थले परिमाणस्यैव नाशो न घटादेरित्यत्राह, "माननाशे" इति। "हेत्व-

प्रत्यभिज्ञा तु साजात्यमवलम्ब्य भविष्यति ।
सैव दीपशिखेत्यादौ तन्मात्रालम्बना हि सा ॥ ४२ ॥
द्रव्यारम्भकसंयोग-प्रतिद्वन्द्वी तथेतरः ।
विभागो जन्यते येषाम् एकेनैव हि कर्मणा ॥ ४४ ॥
द्व्यणुकध्वंसमारभ्य तेषां स्यात् नवमक्षणे ।
रक्तिमा द्व्यणुकेऽन्यस्मिन् एकस्मिन् कर्मचिन्तनात् ॥ ४५ ॥

भावात्" इति, तस्याश्रयनाशैकनाश्यत्वादिति भावः । "तत्रापि" इत्यादि । 'तत्रापि' परिमाणनाशस्वीकारेऽपि । 'एवं प्रसञ्जनात्' घटादिस्थलीय-दोषप्रसङ्गात् । सूचीदलनस्थले हि परिमाणमपि प्रत्यभिज्ञायते इति सुतरामनुपपत्तिरिति भावः ॥ ४२ ॥

पाकात् कतिपयैः क्षणैरक्तादि जायते इतीदमिदानीं दर्शयितुमाह, "द्रव्यारम्भकसंयोग—" इति ॥ ४४ ॥

"द्व्यणुकध्वंसमारभ्य" इति । तथा हि, वह्निना नोदनात् द्रव्यारम्भके परमाणौ कर्म, ततः परमाण्वन्तरेण विभागः, ततो द्रव्यारम्भकसंयोगनाशः, ततो द्व्यणुकनाशः, (१) ततो वह्निसंयोगात् परमाणौ श्यामादिनिवृत्तिः (२), श्यामादौ निवृत्ते अन्यस्माद् अग्निसंयोगात् रक्ताद्युत्पत्तिः (३), उत्पन्ने च रक्तादौ युगपदेव पूर्वक्रियानिवृत्तिरदृष्टवद् आत्मसंयोगात् परमाणौ कर्मान्तरोत्पत्तिश्च (४), ततो विभागः (५), ततः पूर्वसंयोगनिवृत्तिः (६), ततः परमाण्वन्तरेण द्रव्यारम्भकः संयोगः (७), ततो द्व्यणुकोत्पत्तिः (८) ततः

यस्मिन्नेव क्षणे तत्र प्राक्तनं कर्म नश्यति ।
तस्मिन् कर्मान्तरोत्पत्ति-चिन्तनादीदृशी गतिः ॥ ४६ ॥
कर्मान्यच्चेत् क्षणेऽन्यस्मिन् तदेदं दशमक्षणे ।
अन्यदप्यनया रीत्या चिन्तनीयं मनीषिभिः ॥ ४७ ॥

कारणगुणप्रक्रमेण रक्ताद्युत्पत्तिः (९), इति नवक्षणाः। अत्र च द्व्यणुकनाशक्षण एव श्यामादिनिवर्त्तकाग्निसंयोगः, श्यामादिनिवृत्ति-क्षण एव च रक्ताद्युत्पादकाग्निसंयोग इति द्रष्टव्यम् ॥ ४५ ॥

"कर्मान्यत् चेत् क्षणेऽन्यस्मिन्" इति । पूर्वक्रियानिवृत्त्यवन्तरक्षणे क्रियान्तरोत्पत्तौ तु एकक्षणवृद्ध्या दशमक्षणे रक्ताद्युत्पत्तिः सुव्यक्तैव। "अन्यदपि" इत्यादि । 'अन्यत्' एकादशक्षणप्रक्रियानतम् । इद-मत्र तत्त्वम् । विभागजविभागाभ्युपगमेऽपि यदि द्रव्यारम्भकसंयोग-नाशविशिष्टं कालमपेक्ष्य विभागजो विभागस्तदा दशैव क्षणाः, यदि तु द्रव्यनाशविशिष्टं कालमपेक्ष्य विभागजो विभागस्तदैकक्षण-वृद्ध्या एकादशक्षणा प्रक्रिया। तथा हि, द्व्यणुकनाशविभागजवि-भागौ (१), ततः पूर्वसंयोगनाशश्यामादिनिवृत्ती (२), उत्तर-संयोगरक्ताद्युत्पत्ती (३), तत, उत्तरसंयोगेन विभागजविभाग-परमाणुक्रियानिवृत्तौ (४), ततो द्रव्यारम्भानुगुणा परमाणुक्रिया (५), ततो विभागः (६), ततः पूर्वसंयोगनाशः (७), ततो द्रव्यारम्भक-संयोगः (८), ततो द्व्यणुकोत्पत्तिः (९), ततो रक्ताद्युत्पत्तिः (१०) इति दश क्षणाः । एकक्षणवृद्धौ तु, द्व्यणुकनाशः (१), ततो विभा-

परमाण्वन्तरे कर्मान्तरसञ्चिन्तने पुनः ।
पञ्चमादौ क्षणे तत्र रक्ताद्युत्पत्तिरूह्यताम् ॥ ४८ ॥

गजविभागश्यामादिनिवृत्ती (२), ततः पूर्वसंयोगनाशरक्ताद्युत्पत्ती (३), तत उत्तरसंयोगः (४), ततः परमाणुकर्मनाशः (५), ततो द्रव्यारम्भानुगुणक्रिया (६), ततो विभागः (७), ततः पूर्वसंयोगनाशः (८), ततो द्रव्यारम्भकसंयोगः (९), ततो द्व्यणुकं (१०), ततो रक्तादि (११), इत्येकादश क्षणाः ॥ ४७ ॥

"परमाण्वन्तरे" इत्यादि । 'पञ्चमादौ' इत्यादिपदात् षष्ठसप्तमाष्टमपरिग्रहः । आरम्भकसंयोगनाशसमकालं परमाण्वन्तरे कर्मचिन्तने पञ्चैव क्षणा भवन्ति । तथा हि, एकपरमाणौ कर्म, ततो विभागः, तत आरम्भकसंयोगनाशपरमाण्वन्तरकर्मणी, ततो द्व्यणुकनाशः परमाण्वन्तरकर्मजविभागश्च इत्येकः कालः (१), ततः श्यामादिनाशो विभागात् पूर्वसंयोगनाशश्च इत्येकः कालः (२), ततो रक्तोत्पत्तिर्द्रव्यारम्भकसंयोगश्च इत्येकः कालः (३), ततो द्व्यणुकोत्पत्तिः (४), ततो रक्ताद्युत्पत्तिः (५) इति पञ्च क्षणाः । द्रव्यनाशसमकालं परमाण्वन्तरे कर्मचिन्तने तु षट् क्षणाः । तथा हि, द्व्यणुकनाशपरमाण्वन्तरकर्मणी (१), श्यामनाशपरमाण्वन्तरकर्मजविभागौ (२), रक्तोत्पत्तिपूर्वसंयोगनाशौ (३), परमाण्वन्तरेणारम्भकसंयोगः (४), द्व्यणुकोत्पत्तिः (५), रक्ताद्युत्पत्तिः (६), इति षट्क्षणाः । एवं श्यामनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाण्वन्तरे

वह्निवेगस्यातिशय्यात् पूर्वव्यूहविनाशनम्।
तथा व्यूहान्तरोत्पत्तिर्झटित्येव प्रजायते ॥ ४९ ॥
एषा वैशेषिकाजीवरक्षा रक्षतु साम्प्रतम्।
कणभक्ष्यमुनेः पक्षान् अक्षपादेक्षितान्मतात् ॥

इति श्रीचन्द्रकान्ततर्कालङ्कार-प्रणीतायां तत्त्वावलौ
वैशेषिकाजीवरक्षा नाम नवमः परिच्छेदः।

कर्मचिन्तने यथाक्रमं समाप्तौ च क्षणा भवन्तीति विभावनीयम् ॥ ४८ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां
वैशेषिकाजीवरक्षा नाम नवमः परिच्छेदः समाप्तः।

नयमञ्जरी नाम
दशमः परिच्छेदः ।

रूप-गन्ध-रसस्पर्शाभावेऽपि गगनादिषु ।
सङ्ख्याप्रतीतेरेतेभ्यो भिद्यतेऽसौ गुणान्तरम् ॥ १ ॥
एकोऽसौ घट इत्येषा दृश्यते या विशिष्टधीः ।
एकत्वं कारणं तस्यां काश्यपीयाः प्रचक्षते ॥ २ ॥
पटेऽपि जायमानत्वात् घटत्वस्य न हेतुता ।
द्रव्यत्वतुल्यदेशत्वात् नापि सामान्यमेव तत् ॥ ३ ॥
देशतौल्येऽपि सामान्यभेदाभ्युपगमो यदि ।
तदा घटत्वकुम्भत्वे भिद्येयातां परस्परम् ॥ ४ ॥
कर्माणि कर्मशून्यानि गुणशून्या यथा गुणाः ।
एकत्वं तद्वदेकत्व-शून्यमेव प्रचक्षते ॥ ५ ॥

क्रमप्राप्तां सङ्ख्यां निरूपयति, "रूप-गन्ध-रसस्पर्शाभावेऽपि" इति । 'असौ' सङ्ख्या । यत एव भिद्यते अतएव गुणान्तरमित्यर्थः ॥१॥

"पटेऽपि जायमानत्वात्" इति । न च पटत्वमपि हेतुरस्तु इति वाच्यम् अननुगमात् एक इति प्रतीतेश्चानुगतत्वादिति भावः ॥३॥

गुणानां कर्मणाञ्चैव निःसङ्ख्यत्वात् न विद्यते।
सर्वेष्वेकत्वमित्येतत् मतं भ्रान्तिस्तु तन्मतिः॥ ६॥
पारमार्थिकमेकत्वं द्रव्येष्वन्यत्र भक्तितः।—
प्रयुज्यतेऽन्यथा भक्तिदुर्लभाऽप्रमितत्वतः॥ ७॥
न जातु हेतुफलयोरेकत्वं क्वापि विद्यते।
तयोरभेदविरहादिति वैशेषिकं मतम्॥ ८॥
सामानाधिकरण्यं स्याद् वहुत्वैकत्वयोस्तदा।

"गुणानां कर्मणाञ्चैव" इति। सर्वेषु पदार्थेषु एकत्वमित्येतन्मतं न विद्यते। तत्र हेतुः, 'गुणानाम्' इत्यादि। कथं तर्हि एकं रूपमेको रस इत्यादिबुद्धिरित्यत्राह, "भ्रान्तिस्तु" इति॥ ६॥

"पारमार्थिकमेकत्वम्" इति। 'अन्यथा' द्रव्येष्वप्येकत्वस्य पारमार्थिकत्वाभावे। 'अप्रमितत्वतः' इति। कुत्रापि प्रमाया अभावे भ्रम एव न सम्भवति प्रमापूर्वकत्वाद् अप्रमाया इति भावः॥ ७॥

कार्य्यं कारणञ्चैकमिति साङ्ख्या मन्यन्ते। पाट्यमाने हि पटे तन्तूनां प्रत्येकमाकर्षणे त एवोपलभ्यन्ते, न ततोऽन्यत्, यदि हि पटस्तन्तु-भिन्नः स्यादुपलभ्येत घटवत्, न चोपलभ्यते, तस्मान्नास्तीति। तदिदं साङ्ख्यीयं मतं निरस्यति, "न जातुहेतुफलयोः" इति। 'जातु' कदाचित्। 'हेतुफलयोः' कार्य्यकारणयोः। 'क्वापि' कस्मिन्नपि विषये। 'अभेदविरहात्' इति। न हि भिन्नयोरेकत्वं सम्भवति इति भावः॥ ८॥

विशेषो विद्यते पाथःकणिकादिषु कश्चन ॥ ९ ॥
करण्डावस्थिता नैव तन्तवः पटसंज्ञिताः ।
धारणाकर्षणे, नापि प्रत्येकं कर्तुमीशते ॥ १० ॥
तन्तूत्पत्तौ पटोत्पत्तेरभावात् पटपाटने ।
तन्नाशानुपलम्भाच्च नाभेदो विद्यते तयोः ॥ ११ ॥
क्वचिदत्यन्तस्वारूप्यात् न भेदेनोपलभ्यते ।
रूपादि, कुत्रचित् चित्रपटादौ गृह्यतेऽपि च ॥ १२ ॥

अभेदविरह एवासिद्ध इत्याशङ्क्याह, "सामानाधिकरण्यं स्यात्" इति। यदि हि तयोरभेदः स्यात्, तन्तवः पट इति बहुत्वैकत्वयोः सामानाधिकरण्यं स्यात् इत्यर्थः। ननु नेदमनिष्टम् एकस्यामपि पाथःकणिकायाम् आप इति, एकस्याञ्च योषिति दारा इति प्रयोगादित्यत्राह, "विशेषः" इति। तत्र शब्दस्वाभाव्यात् तथेति भावः ॥ ९ ॥

किञ्च "करण्डावस्थिता नैव" इति। तथा च तन्तुपटयोर्भेदः सुस्पष्ट इति भावः ॥ १० ॥

इतश्च तयोर्भेद इत्याह, "तन्तूत्पत्तौ पटोत्पत्तेः" इत्यादि। यदि हि तन्तुपटयोरभेदः स्यात्, तन्तूत्पत्तौ पट उत्पद्येत, पटनाशे तन्तवो नश्येरन्, न चैवम्। 'तत्' इति तन्तवः परामृश्यन्ते। उपलक्षणमिदं, पटोत्पत्तिदशायां तन्तूत्पत्तिप्रसङ्गः, तन्तुनाशदशायां पटनाशप्रसङ्गोऽपि बोध्यः। उपसंहरति, "नाभेदः" इति ॥ ११ ॥

ननु यदि कार्य्यकारणयोर्भेदः, तदा तयोः रूपादिकमपि भेदे-

नित्यद्रव्याश्रितं नित्यमेकत्वं परिकीर्त्तितम्।
अनित्ये तदनित्यं, तत् स्वकारणगुणाद् भवेत्॥ १३॥
अपेक्षा बुद्धिजन्यैव सङ्ख्या द्वित्वादिका मता।
तन्नाशस्तद्विनाशात् स्यात् प्रक्रिया तत्र कथ्यते॥ १४॥
चक्षुर्वस्तुसमागमात् प्रथमतस्त्वेकत्वसामान्यधी-
रेकत्वद्वयधीरियं समुदितोऽपेक्षामतिस्तत्परम्।
द्वित्वोत्पत्तिरनन्तरं खलु भवेत् द्वित्वत्वबुद्धिस्ततो
द्वित्वज्ञानमतः परञ्च सुतरां द्वे द्रव्य इत्थं मतिः॥ १५॥
एकत्वत्वमतिर्विनाशमुपयात्येकत्वबुद्ध्या ततो
द्वित्वत्वानुभवेन सापि च मतिर्द्वित्वप्रमातस्तु सः।

नोपलभ्येत, रूपमिदं कार्य्यस्य, रूपमिदं कारणस्येत्यादि। अत्राह, "क्वचिदत्यन्तसारूप्यात्" इति। "चित्रपटादौ" इति, तत्र तादृश-दोषाभावादिति भावः। सङ्ख्यापरिमाणादिभेदस्तु सुस्पष्ट एवेति 'गृह्यतेऽपि च' इति चकारेण समुच्चीयते॥ १२॥

"तन्नाशस्तद्विनाशात् स्यात्" इति। 'तन्नाशः' द्वित्वादिनाशः। 'तद्विनाशात्' अपेक्षाबुद्धिविनाशात्। 'तत्र' द्वित्वाद्युत्पत्तिविना-शयोः॥ १४॥

"चक्षुर्वस्तुसमागमात्" इत्यादि। 'एकत्वसामान्यधीः' इति। एकत्वगतं यत्सामान्यम्, एकत्वत्वमित्येतत्, तद्बुद्धिरित्यर्थः। 'एक-त्वद्वयधीः' इति। समूहालम्बनेयं बुद्धिरिति बोध्यम्॥ १५॥

सापि द्वाविति तद्विशिष्टमतितः संस्कारतः सा पुनः
द्वित्वं द्वित्वविशिष्टबुद्धिसमयेऽपेक्षामतेर्नाशतः ॥ १६ ॥
सत्यामेकत्वबुद्धौ च द्रव्यबुद्धिर्न जायते ।
द्वित्वाद्युत्पत्तिसामग्र्या तस्या अभिभवोद्भवात् ॥ १७ ॥
केवलं गुणबुद्धीनां नास्ति संस्कारहेतुता ।
विना द्रव्योपरागेण न गुणः स्मर्य्यते क्वचित् ॥ १८ ॥

"एकत्वत्वमतिः" इत्यादि । 'सः' द्वित्वत्वानुभवः । 'सापि' द्वित्वप्रमापि । 'सा' द्वित्वविशिष्टबुद्धिः ॥ १६ ॥

अथैकत्वज्ञानादनुपदं तद्विशिष्टद्रव्यबुद्धिरेव कुतो न भवति तत्सामग्रीसत्त्वात्, तथा च सति तत एवापेक्षाबुद्धिविनाशे द्वित्वस्यापि सुतरामग्रिमक्षण एव नाश इति कथं तद्विशिष्टबुद्धिः, तत्पूर्वक्षण एव द्वित्वनाशसम्भवादित्याशङ्क्याह, "सत्यामेकत्वबुद्धौ च" इति । चकारोऽप्यर्थे भिन्नक्रमेण योज्यः । एकत्वबुद्धौ सत्यामपीत्यर्थः । "अभिभवोद्भवात्" इति । अभिभवश्च फलबलादेव कल्पनीयः । तेनायमर्थः । यत्र द्वित्वाद्युत्पत्तिसामग्री नास्ति, तत्रैवापेक्षाबुद्धेः (अनेकैकत्वबुद्धेः) तद्विशिष्टद्रव्यधीहेतुत्वं, यत्र च द्वित्वाद्युत्पत्तिसामग्री वर्त्तते, तत्र नैतत्, किन्तु द्वित्वाद्युत्पत्तिरेवेति विभावनीयम् । तत्सामग्री च प्रागभावादिघटितैवेति बोध्यम् ॥१७॥

ननु स्वजन्यसंस्कारादपेक्षाबुद्धिनाशो दुर्निवार इत्याशङ्क्याह; "केवलं गुणबुद्धीनाम्" इति । अयमर्थः । संस्कारो हि न प्रत्यक्षः

विशिष्टबुद्धिसमये द्वित्वनाशाद् विशिष्टधीः।
कथमुत्पद्यते ? सा हि वर्त्तमानावभासिनी ॥ १९ ॥
सामग्री वर्त्तते तस्याः सुतरां सा भविष्यति।
पूर्वक्षणे च तेनापि सन्निकर्षोऽतिदुर्लभः ॥ २० ॥
अतद्व्यावृत्तिरेवात्र वैशिष्ट्यमिति गीयते।
तदभावेऽपि तद्भाणं सम्भवेदिति भाव्यताम् ॥ २१ ॥

किन्तु स्मरणादिकार्य्यलिङ्गगम्यः, प्रकृते च तन्नास्तीति संस्कार-कल्पनापि न सम्भवति ॥ १८ ॥

"द्वित्वं द्वित्वविशिष्टबुद्धिसमये" इत्युक्तम्। तत्र शङ्कते "वि-शिष्टबुद्धिसमये" इति। शङ्कायां हेतुः, "सा हि" इत्यादि। 'सा' विशिष्टबुद्धिः ॥ १९ ॥

परिहरति, "सामग्री वर्त्तते तस्याः" इति। विशिष्टबुद्धौ हि विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षादीनां हेतुत्वं, तस्य च पूर्वक्षणे सत्त्वात् फलमुत्पद्यत एव। यदि तु विशेषणेन्द्रियसन्निकर्षोऽपि कारणमुच्यते, तदाप्याह, "पूर्वक्षणे च" इति। 'तेनापि' विशे-षणेनापि। पूर्ववर्त्तिन एव हि कारणत्वमिष्यते इति भावः ॥ २० ॥

ननु तथापि विशेष्ये विशेषणसम्बन्धाभावे कुतस्तद्वैशिष्ट्यज्ञानम्? इत्याशङ्क्य, विशेषणसम्बन्धो न वैशिष्ट्यम् अपितु अतद्व्यावृत्ति-रिति काचिदनुपपत्तिरिति परिहरति, "अतद्व्यावृत्तिरेवात्र" इति। 'तद्भाणं' वैशिष्ट्यभाणम्। 'तदभावेऽपि' विशेषणसम्बन्धाभावे-ऽपि ॥ २१ ॥

तस्मात् क्षणत्रयस्थाय्यपेक्षाबुद्धिरिष्यते ।
द्वित्वनाशस्तद्विनाशाद् अन्यदाऽनुपलम्भनात् ।
क्वचिदाश्रयनाशाच्च क्वचिच्चोभयतस्तथा ॥ २२ ॥
प्रागभावविशेषेभ्यो द्वित्वत्रित्वादिसम्भवः ।
कार्य्यभेदो हि तद्भेदात् पाकजेष्ववधारितः ॥ २३ ॥

उपसंहरति, "तस्मात् क्षणत्रयस्थाय्यपेक्षा—" इत्यादि । अपेक्षाबुद्धेरपि द्विक्षणमात्रस्थायित्वे द्वित्वत्वज्ञानसमय एवापेक्षाबुद्धिविनाश इति अग्रिमक्षणे द्वित्वज्ञानवेलायामेव द्वित्वनाशापत्त्या तद्विशिष्टबुद्धिर्न स्यादिति भावः । अपेक्षाबुद्धेर्द्वित्वनाशकत्वे प्रमाणमाह, "अन्यदानुपलम्भनात्" इति । "क्वचिदाश्रयनाशात्" इति । यत्र द्वित्वाधिकरणावयवक्रियासमकालमेवैकत्वत्वबुद्धिः तत्राश्रयनाशात् द्वित्वं नश्यतीत्यर्थः । तथा हि, द्वित्वाधारावयवकर्म, एकत्वत्वज्ञानञ्चेत्येकः कालः, अवयवकर्मजन्यविभागोऽपेक्षाबुद्धिश्चेत्येकः कालः, आरम्भकसंयोगनाशो द्वित्वोत्पत्तिश्चेत्येकः कालः, द्रव्यनाशो द्वित्वत्वज्ञानञ्चेत्येकः कालः, द्रव्यनाशात् द्वित्वनाशः द्वित्वत्वज्ञानादपेक्षाबुद्धिनाशश्च इत्येकः कालः । अत्र च द्वित्वनाशसमकालमेवापेक्षाबुद्धिनाशात् न ततो द्वित्वनाशसम्भव इति बोध्यम् । "क्वचिच्चोभयतः" इति यत्रापेक्षाबुद्धिसमकालमेव द्वित्वाधारावयवकर्म भवति, तत्रोभाभ्यां द्वित्वनाशः, प्रत्येकमेव सामर्थ्यावधारणात्, विनिगमनाविरहाच्चेति भावः ॥ २२ ॥

"प्रागभावविशेषेभ्यः" इति । एतेनापेक्षाबुद्धिरुपकारण-

अपेक्षाबुद्धितो द्वित्वं केवलातः प्रजायते।
द्वित्वान्वितात्त्रित्वं स्याद् इत्येतद्वा नियम्यताम्॥ २४॥
पिपीलिकानामयुतं हतमित्येवमादिषु।
समवायिविनाशेऽपि गौणः सङ्ख्यापरिग्रहः॥ २५॥
विरहान्नियतापेक्षाबुद्धीनां न शतादिकम्।
सेनावनादौ भवति बहुत्वं केवलं विदुः॥ २६॥
त्रित्वादिवत् बहुत्वञ्च सङ्ख्यान्तरमितीष्यते।
तद्धेतुर्हेतुरत्रापि विशेषः परिवर्जितः॥ २७॥

साम्येऽपि कार्य्यवैचित्र्यमुपपादितम्। प्रागभावस्य कार्य्यविशेषसाधकत्वमाह, "कार्य्यभेदो हि" इति। 'तद्भेदात्' प्रागभावभेदात्। "पाकजेषु" इति। तत्र हि साम्येऽप्यग्निसंयोगानां, केनचिद्रूपं, केनचिद्रसः, केनचिच्च स्पर्श इत्येवं कार्य्यभेदे प्रागभावभेद एव नियामक इति भावः॥ २३॥

'विरहान्नियतापेक्षाबुद्धीनाम्" इति। उक्तक्रमेण त्रित्वादिसङ्ख्या प्रतिनियतापेक्षाबुद्धिजन्यैवेति कथं तदभावे तदुत्पत्तिरिति भावः॥ २६॥

ननु त्रित्वादिपरार्द्धपर्य्यन्तसङ्ख्यैव बहुत्वं तत्कथमेतदित्याशङ्क्याह, "त्रित्वादिवत् बहुत्वञ्च" इति। ननु बहुत्वोत्पत्तौ किं कारणम् इत्यत्राह, "तद्धेतुः" इति 'तद्धेतुः' त्रित्वादिहेतुः 'विशेषः' द्वित्वान्वितायास्त्रित्वम् इत्यादिरूपः। न चैवं गौरवमिति वाच्यं

यथा द्वित्वादियुक्तेषु द्विपृथक्त्वादयो गुणाः ।
त्रित्वाद्याधारभूतेषु बहुत्वं तद्वदिष्यताम् ॥ २८ ॥
बह्वी बहुतरेत्येवं तारतम्योपलम्भनात् ।
इतोऽपि बहुका तस्य सेनेत्यादिप्रयुक्तयः ॥ २९ ॥
रसादिवदिहाप्यस्तु तारतम्यं प्रतीतितः ।
अर्थाभ्युपगमेऽस्माकं शरणं सम्विदेव हि ॥ ३० ॥
असत्कोटिक एवास्तां संशयस्तत्र का क्षतिः ।

फलमुखगौरवस्याकिञ्चित्करत्वात् वक्ष्यमाणरीत्या गौवस्य तुल्यत्वाच्च ॥ २७ ॥

ननु बहुत्वस्य सङ्ख्यान्तरत्वे इतो बहुका सेनेति व्यवहारानुपपत्तिः सङ्ख्यायास्तारतम्याभावात् । मन्मते तु त्रित्वादिपरार्द्धपर्य्यन्तसङ्ख्यैव बहुत्वमिति नानुपपत्तिः । न च नियतापेक्षाबुद्ध्यभावे कथं शतादिसंख्योत्पत्तिरिति वाच्यं प्रतिनियतैकत्वानालम्बनापेक्षाबुद्धिजनितत्रित्वादिरेव बहुत्वमित्यभ्युपगमात् फलबलेन तथा कल्पनात् सेनावनादौ सत्यपि शतादिसंख्या नाभिव्यज्यते, तदभिव्यञ्जकनियतापेक्षाबुद्धिविरहात् इत्याशङ्क्य प्रकृते तारतम्यमनुभवसिद्धमित्याह, "बह्वी बहुतरेत्येवम्" इति ॥ २९ ॥

त्रित्वादौ तारतम्याभावेऽपि बहुत्वे तस्यानुभूयमानत्वात् रसादाविव तदभ्युपगमो युक्त इत्याह, "रसादिवदिहाप्यस्तु" इति ॥३०॥

बहुत्वस्य संख्यान्तरत्वे शतसहस्रादिकोटिकः संशयः कथं सेना-

असन्मात्रालम्बनत्वं तस्यान्यत्रापि दृश्यते ॥ ३१ ॥
कोट्युपस्थितिरत्रापि दुर्लभेति न साम्प्रतम्।
स्मरणं हि शतादीनां बहुत्वादपि सम्भवेत् ॥ ३२ ॥
बहवः सन्ति तावत् ते पञ्चाशत् शतमेव वा।
विशिष्य तन्न जानीम इत्येवं कथमन्यथा ॥ ३३ ॥
सहस्रं वा शतं वापि चूतानामानयाम्यहम्।
बहूनि तावदेतेषाम् आनीयन्तां किमत्र ते ॥ ३४ ॥
विशेषपृच्छयेत्येवं प्रश्नप्रत्युत्तरादिकम्।
सङ्गच्छते कथं वेति चिन्तनीयं मनीषिभिः ॥ ३५ ॥
परेषामपि तुल्यैव कारणान्तरकल्पना।
वैजात्यादिकमेतस्मात् परं तत्रातिरिच्यते ॥ ३६ ॥

वनादावुपलभ्यते इत्यत्राह, "असत्कोटिक एवास्ताम्" इति। "अन्यत्रापि दृश्यते" इति। वल्मीककूटे स्थाणुर्वा पुरुषो वेति संशयस्य वेदान्तिभिर्दर्शितत्वादिति भावः ॥ ३१ ॥

सङ्गच्छते कथं वेति" इति। एवमादौ हि बहुत्वं शतादिकस्य विभिन्नमेव प्रतीयते इति भावः ॥ ३५ ॥

"परेषामपि तुल्यैव" इति। अत्रायमर्थः। अनियतापेक्षाबुद्धिजन्यं त्रित्वादिकमेव बहुत्वमिति परेषां मतम्। तथा चैकस्मिन्नेव त्रित्वादौ नियतापेक्षाबुद्धेरनियतापेक्षाबुद्धेश्च कारणत्वमिति तु-

तद्वरं गौरवाभावाद् बहुत्वमतिरिच्यताम् ।
अनुभूतिश्च लोकानामेवं सत्यनुगृह्यते ॥ ३७ ॥

मानव्यवहृतौ हेतुः परिमाणं प्रचक्षते ।
रूपादिवदमुष्यापि नास्ति द्रव्यस्वरूपता ॥ ३८ ॥

तदेतत् दृष्टसामान्यादनुमेयमणुष्वपि ।
स्थूलः कलस इत्यादौ प्रत्यक्षविषयस्तु तत् ॥ ३९ ॥

कारणानां बहुत्वाद्वा महत्त्वाद्वा प्रजायते ।

त्वम् । इदमुपलक्षणम् । अनियतापेक्षाबुद्धिजन्यत्रित्वादेर्नियमतोऽग्रहकल्पनागौरवमपि बोध्यम् । गौरवान्तरमाह, "वैजात्यादिकम्" इति । तन्मते एकस्मिन्नेव त्रित्वादौ द्विविधापेक्षाबुद्धेः कारणतया परस्परव्यभिचारवारणाय वैजात्यं कल्पनीयं, सा च जातिः त्रित्वादिपरार्द्धपर्य्यन्तसंख्यास्वेव कल्प्या इति वरमनुभवबलाद् बहुत्वमेवातिरिक्तमस्तु त्रित्वादिव्यापकबहुत्वत्वजातिश्च तैरप्यभ्युपेयते। आदिपदेनाव्यवहितोत्तरत्वमन्तर्भाव्य कार्य्यकारणभावे, तस्य स्वत्वघटितत्वेनाननुगमः। अधिकरणसुखवृत्तित्वादिना कथञ्चिदनुगमेऽपि अन्येषामपि क्षणिकगुणानां सम्भवात् सुखमादायैवानुगमे विनिगमनाविरहात् कार्य्यकारणभावबाहुल्यादिकं समुच्चीयते। इति निपुणतरमनुसन्धेयम् ॥ ३६ ॥

"तदेतत् दृष्टसामान्यात्" इति । 'तदेतत्' इति परिमाणं परामृशति । 'दृष्टसामान्यात्' इति द्रव्यत्वलिङ्गकमनुमानमावेदयति । कुत्र परिमाणस्य दृष्टत्वम् ? इत्यत्राह, "स्थूलः कलसः" इति ॥३९॥

प्रचयाद्वा महत्त्वं, तद्विपरीतमणु स्मृतम् ॥ ४० ॥
त्र्यणुके यन्महत्त्वं तत् द्व्यणुकानां बहुत्वतः।
तेषु तच्चेश्वरापेक्षाबुद्धिजन्यमुदीरितम् ॥ ४१ ॥
द्वाभ्यामप्रचिताभ्यान्तु तन्तुभ्यां जनिते पटे।
उत्पद्यते महत्त्वं यत् तत्कारणमहत्त्वतः ॥ ४२ ॥
द्वाभ्यां तूलकपिण्डाभ्यां यत्र पिण्डान्तरोद्भवः।
महत्त्वस्य प्रकृष्टत्वे प्रचयस्तत्र कारणम् ॥ ४३ ॥
बहुत्वं तत्र नास्त्येव तदुत्कर्षे न कारणम्।
महत्त्वं, तस्य तद्धेतु तस्यैवास्त्वत्र हेतुता ॥ ४४ ॥

"कारणानां बहुत्वाद् वा" इत्यादि। 'तद्विपरीतं' महत्त्वविपरीतम्। वैपरीत्यञ्चाप्रत्यक्षत्वं कारणबहुत्वाद्यजन्यत्वञ्च। अणुपरिमाणं हि द्व्यणुक एव जन्यं, परमाणौ तस्य नित्यत्वात्। परमाणुगतद्वित्वसंख्यैव च द्व्यणुकाणुपरिमाणजनिकेति भावः ॥ ४० ॥

"त्र्यणुके यन्महत्त्वम्" इत्यादि। 'द्व्यणुकानां बहुत्वतः' इति। तत्कारणे महत्त्वप्रचययोरभावादिति भावः। 'तेषु' द्व्यणुकेषु। 'तत्' बहुत्वम् ॥ ४१ ॥

प्रचयस्य कारणतामुपपादयति, "बहुत्वं तत्र नास्त्येव" इति। 'तदुत्कर्षे' परिमाणोत्कर्षे। 'तस्य' महत्त्वस्य। 'तत्त्वे' परिमाणोत्कर्षकारणत्वे ॥ ४४ ॥

आरम्भको हि संयोगविशेषः प्रचयो मतः ।
स च स्वाभिमुखं किञ्चिद् अङ्गसंयोगलक्षणः ॥ ४५ ॥
स चावयवसंयोगः स्वकार्य्यार्थमपेक्षते ।
स्वाङ्गशैथिल्यवत् योगमित्येतत् शाङ्करं मतम् ॥ ४६ ॥
शिथिलाख्यञ्च संयोगमन्ये प्रचयमूचिरे ।
तेषां सएव तद्धेतुः सुतरामवसीयते ॥ ४७ ॥
अणु विल्वादामलकं कुवलन्तु ततोऽप्यणु ।
इत्यणुप्रत्ययो भ्रान्तः प्रकर्षविरहाद् भवेत् ॥ ४८ ॥
अणुत्वे कारणाभावात् महत्त्वे तद्विपर्य्ययात् ।
उभयोरेककालत्वात् दृष्टान्तस्यापि सम्भवात् ॥ ४९ ॥

प्रचयं लक्षयति, "आरम्भको हि" इति । "स्वाभिमुखम्" इत्यादि । सावधारणोऽयं निर्देशः । तेन स्वाभिमुखमवयवान्तराणां संयोगाभावोऽवगम्यते ॥ ४५ ॥

"स चावयवसंयोगः" इति । प्रचयस्य महत्त्वजनने तदवयवानां शिथिलाख्यं संयोगमपेक्षते इति शङ्करमिश्रमतम् ॥ ४६ ॥

मुक्तावलीकृतां मतमाह, "शिथिलाख्यञ्च संयोगम्" इति ॥४७॥

"अणु विल्वादामलकम्" इत्यादि । "प्रकर्षविरहात्" इति । विल्वे यः प्रकर्षः तस्याभाव आमलके इत्याद्यूह्यम् ॥ ४८ ॥

भ्रान्तत्वमुपपादयति, "अणुत्वे कारणाभावात्" इति । महत्त्वासमानाधिकरणं हि द्वित्वमणुत्वकारणमिति द्व्यणुके प्रतिपन्नम् ।

महत्त्वाणुत्वयोर्नास्ति महत्त्वमणुताऽथवा।
रूपादयो न रूपादौ नास्ति कर्मापि कर्मसु ॥ ५० ॥

तेन दीर्घत्वह्रस्वत्वे व्याख्याते, तेन गम्यते।
अणु ह्रस्वं महद्दीर्घमित्येतत् तच्चतुर्विधम् ॥ ५१ ॥
द्व्यणुके परमाणौ च ह्रस्वत्वमणुता तथा।
महत्त्वं दीर्घता चैव तदन्यस्मिन्निति स्थितिः ॥ ५२ ॥
तत्राप्यणुत्वह्रस्वत्वे परमे परमाणुषु।

तच्चामलकाद्यवयवेषु नास्त्येव। नित्यस्याणुत्वं परमाणुष्वेवेत्यभिप्रायः। 'तद्विपर्य्ययात्' कारणाभावात्। अवयवबहुत्वादिकं हि महत्त्वकारणम् आमलकाद्यवयवेष्वस्तीति भावः। किञ्च "उभयोः" इत्यादि। एकस्मिन्नेव हि काले आमलकादिष्वापेक्षिकं महत्त्वमणुत्वञ्चानुभूयते, तत् द्वयञ्च न मुख्यं, मुख्ययोस्तयोः परस्परविरोधात्, अतो महत्त्वकारणसद्भावान्महत्त्वमेव मुख्यम्, अणुत्वकारणाभावादणुत्वं भ्रान्तमिति भावः। 'दृष्टान्तस्य' इति वस्तुगत्या शुक्लेष्वेव शुक्लशुक्लतरादिप्रत्ययदर्शनात् यथा तस्य तारतम्यं, तथा वस्तुगत्या महत्स्वेव महन्महत्तरादिप्रत्ययदर्शनात् परिमाणस्यापि तारतम्यम्। तथा चोपपन्नं प्रकर्षविरहादणुत्वज्ञानमिति ॥ ४९ ॥

"रूपादयो न रूपादौ" इति। दृष्टान्तार्थमिदमुक्तम् ॥ ५० ॥

चतुर्विधपरिमाणवादिमतं दर्शयितुं तन्निदानम्, "एतेन दीर्घत्वह्रस्वत्वे व्याख्याते" इति सूत्रं तावदर्थतः पठति "तेन ह्रस्वत्वदीर्घत्वे" इति। तेषामभिप्रायं दर्शयति, "तेन गम्यते" इति ॥ ५१ ॥

तदन्ये द्व्यणुके ते तु विद्वद्भिः परिकीर्त्तिते ।
महत्त्वमपि दीर्घत्वं परमं विभुषु स्मृतम् ॥ ५३ ॥
त्रसरेण्वादिकेऽन्यस्मिंस्तदवान्तरमिष्यते ।
महत्त्वे कारणं यत्तु तद्दीर्घत्वेऽपि कथ्यते ।
अणुत्वहेतुरप्येवं ह्रस्वत्वस्यापि कारणम् ॥ ५४ ॥
कार्य्यवैचित्र्यमत्रापि प्रागभावविभेदतः ।
अस्तु पाकजवत्, तेषु प्रतीतिः सार्वलौकिकी ॥ ५५ ॥
इक्षुदण्डः पटात् ह्रस्वः समित् ह्रस्वा ततोऽपि च ।
इत्यादिबुद्धयः प्राग्वदुपपाद्या विचक्षणैः ॥ ५६ ॥
तदेवं सकलद्रव्यं परिमाणद्वयान्वितम् ।
यन्महत् दीर्घमप्येतत् ह्रस्वमप्यणु यद्भवेत् ॥ ५७ ॥
बहूनां विदुषामेतत् सम्मतं मतमीरितम् ।
किन्त्विदं शक्यते वक्तुं धीरवर्य्यैर्विचार्य्यताम् ॥ ५८ ॥
परिमाणं द्विधैवात्र महत्त्वाणुत्वभेदतः ।
अन्तर्भावात्तयोरेव दीर्घह्रस्वत्वयोरपि ॥ ५९ ॥

कारणसाम्येऽपि कार्य्यवैचित्र्यं कुतः ? इत्यत्राह, "कार्य्यवैचित्र्यमत्रापि" इति । चतुर्विधपरिमाणाभ्युपगमे प्रतीतिं प्रमाणयति, "तेषु प्रतीतिः" इति ॥ ५५ ॥

दीर्घत्वादि, महत्त्वादिभेद एवेति चिन्त्यताम्।
अन्यथातिरिच्येन्तां तदन्ये वर्त्तुलादयः ॥ ६० ॥
अन्तर्भावस्तयोरत्र ज्ञापितः परमर्षिणा।
एतेनेत्यादिसूत्रेण, शाब्दान्तर्भावसूत्रवत्।
न तयोः परिमाणत्वम् अपरे त्वेवमूचिरे ॥ ६१ ॥
अनित्येष्वाश्रयध्वंसात् परिमाणं विनश्यति।
घटादेः कम्बुभङ्गादौ विनाशः प्राक् प्रपञ्चितः ॥ ६२ ॥

"दीर्घत्वादि महत्त्वादि—" इति। महत्त्वादिभेद एव दीर्घत्वादि इत्यर्थः। ननु महत्सु दीर्घमानीयतामित्यादिव्यवहार एव भेदसाधक इति चेत् महत्सु त्रिकोणं वर्त्तुलञ्चानीयतामित्यादिरीत्या वर्त्तुलादयोऽप्यतिरिच्येरन् इत्येतदेवाह, "अन्यथातिरिच्येन्ताम्" इति ॥ ६० ॥

सूत्रमुपपादयति, "अन्तर्भावस्तयोरत्र" इति। महत्त्वाणुत्वे सपरिकरं निरुच्य "एतेन दीर्घत्वह्रस्वत्वे व्याख्याते" इति सूत्रेण तयोरेवानयोरन्तर्भाव इति प्रतिपादितम्। यथा लैङ्गिकं सपरिकरं व्युत्पाद्य "एतेन शाब्दं व्याख्यातम्" इति सूत्रेण शाब्दस्य लैङ्गिकेऽन्तर्भावः प्रतिपादितस्तथेहापीति भावः ॥ ६१ ॥

"अनित्येष्वाश्रयध्वंसात्" इत्यादि। नन्वेवं कम्बुमात्रभङ्गे घटाविनाशेऽपि कथं प्राक्तनपरिमाणनाशः? इत्यत्राह, "घटादेः कम्बुभङ्गादौ" इति। 'प्राक्' वैशेषिकाजीवरक्षायाम् ॥ ६२ ॥

पटस्य तन्तुसंयोगाद् उत्कृष्टपरिमाणता ।
यत्र, ध्वस्यति तत्रापि वेमाद्यभिहतः घटः ॥ ६३ ॥
पश्चात् संयुक्ततन्तोस्तत्पटाङ्गत्वे तमन्तरा ।
न स्यात् तत्पट एवादौ स तस्मिन् कारणं यतः ॥ ६४ ॥
उच्यते यदि नाङ्गत्वं तत्तन्तोस्तत्पटं प्रति ।
तदा तत्परिमाणस्य तेनाधिक्यमसम्भवि ॥ ६५ ॥
पटसंयोगिना ह्येतत् दृश्यते नान्यवस्तुना ।
तस्मादवश्यं तस्यापि नाश एवावसीयते ॥ ६६ ॥
नित्ये तु नित्यं तत्, नित्यं परिमण्डलमुच्यते ।
अणुत्वं गगनादीनां महत्त्वमपि तादृशम् ॥ ६७ ॥

ननु तथाप्यविनष्ट एव पटे तन्त्वन्तरसंयोगात् कथं परिमाणा-न्यत्वम्? इत्याशङ्क्याह, "पटस्य तन्तुसंयोगात्" इति ॥ ६३ ॥

उक्तस्थले पटनाश आवश्यक इतीदमिदानीं प्रतिपाद्यते। तत्र पश्चात् संयुक्ततन्तुस्तत्पटावयवो न वा? आद्ये "पश्चात् संयुक्ततन्तो-स्तत् पटाङ्गत्वे" इति। "अङ्गं प्रतीकोऽवयवः" इत्यमरः ॥६४॥

द्वितीये त्वाह, "उच्यते यदि नाङ्गत्वम्" इति ॥ ६५ ॥

एतदेवोपपादयति, "पटसंयोगिना ह्येतत्" इति ॥ ६६ ॥

"नित्ये तु नित्यं तन्नित्यम्" इति। 'तत्' परिमाणम्। किमणु-परिमाणं नित्यमित्यत्राह, "नित्यं परिमण्डलम्" इति। परिमण्डल-मणुत्वं नित्यमित्यर्थः। परिमण्डलमिति परमाणुपरिमाणस्य वैशे-

अणुत्वप्रत्ययोऽविद्या कुवलामलकादिषु।
विद्या लिङ्गञ्च सापि, स्यात् प्रमापूर्वा हि सेष्यते ॥९८॥
अनयादवतादेषा दोषापेता मनांस्यपि।
कणादपादशिष्याणाम् अञ्जसा नयमञ्जरी ॥

इति श्रीचन्द्रकान्ततर्कालङ्कार-प्रणीतायां तत्त्वावलौ
नयमञ्जरी नाम दशमः परिच्छेदः।

षिकी संज्ञा। परिमण्डलमेव पारिमाण्डल्यमिति शङ्करमिश्राः। किं महत्परिमाणं नित्यम्? इत्यत्राह, "गगनादीनाम्" इति। 'तादृशं' नित्यम् ॥ ९७ ॥

अनुमितमप्यणुत्वं प्रकारान्तरेणाप्यनुमिनोति, "अणुत्व-प्रत्ययोऽविद्या" इति। तथा च कुवलामलकादावणुत्वबुद्धेरप्रमात्वात् तस्याश्च प्रमापूर्वकत्वनियमात्, अवश्यमणुत्वप्रमा वाच्या, सा च परमाण्वेवेति भावः ॥ ९८ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां
नयमञ्जरी नाम दशमः परिच्छेदः।

ऋजुनिर्मला नाम

एकादशः परिच्छेदः ।

पृथक्त्वमपि संख्यावद्भेदतोऽपि विभिद्यते ।
अस्मात् पृथगिदं नेति वैलक्षण्योपलम्भनात् ॥ १ ॥
न भेदवानमुष्यापि नञ्वदर्थोऽव्ययत्वतः ।
अगत्याऽव्ययभिन्नानाम् अन्यादीनां स दृश्यते ॥ २ ॥

क्रमप्राप्तं पृथक्त्वं निरूपयति, "पृथक्त्वमपि सङ्ख्यावत्" इति । 'सङ्ख्यावत्' इत्यनेन द्विपृथक्त्वादिकमपेक्षाबुद्धिजन्यमित्यादिकमूहनीयम् । नन्वन्योन्याभाव एव पृथक्त्वम् इत्यत्राह, "भेदतोऽपि" इति । तत्र हेतुः "अस्मात्" इति । इदमस्मात् पृथक्, इदमिदं नेति प्रतीत्योर्वैलक्षण्यात् अर्थवैलक्षण्यमित्यर्थः ॥ १ ॥

ननु इदमस्माद्भिन्नमित्यादाविव इदमस्मात् पृथक् इत्यत्रापि भेदवानेव पृथक्शब्दस्यार्थ इति वैलक्षण्यमुपपद्यते, इदमिदं नेत्यत्र नञो भेदार्थत्वादित्यत्राह, "न भेदवानमुष्यापि" इति । तथा च पृथक्शब्दस्यापि नञ्वदव्ययतया भेदसम्बन्धेन तदर्थस्यान्वयबोधसम्भवात् न तस्य भेदविशिष्टे शक्तिर्गौरवात्, अन्यथा नञादीनामपि भेदविशिष्टे शक्तिः किं नोपेयते । अन्यादिशब्दानान्तु अनव्ययतया अगत्या विशिष्टे शक्तिरभ्युपेयते इति भावः ॥ २ ॥

भिन्नार्थत्वं विनाप्यस्तु पञ्चमी शाब्दिकस्मृतेः।
वैशिष्ट्यरूपताप्यस्य सर्वथैव न युज्यते ॥ ३ ॥
किञ्चिद्विशिष्टमैत्रादौ व्योम्नि शब्दान्विते तथा।
पृथक्त्वव्यवहारादिर्वार्य्यतां कथमन्यथा ॥ ४ ॥
वैषम्यात् द्विपृथक्त्वादि-गुणान्तरतयेष्यते।
क्लृप्तेनैवोपपत्तेस्तु द्विपरत्वादिकं न तत् ॥ ५ ॥
अप्राप्तिपूर्विका प्राप्तिः संयोगः परिकीर्त्तितः।
कार्य्यैणवाधिता धीश्च तत्प्रमाणं प्रचक्षते ॥ ६ ॥

ननु पृथक्शब्दस्यान्यार्थत्वाभावे कथं तद्योगे पञ्चमी? इत्यत्राह, "भिन्नार्थत्वं विनाप्यस्तु" इति। 'शाब्दिकस्मृतेः' "तृतीया पञ्चमी चैव पृथक् नानाप्रयोगतः" इति शाब्दिकस्मरणात् ॥ ३ ॥

ननु द्वित्वादिसामानाधिकरण्यैरेकपृथक्त्वैरेव व्यवहारोपपत्तौ द्विपृथक्त्वाद्यभ्युपगमो व्यर्थ इत्याशङ्क्याह, "वैषम्यात् द्विपृथक्त्वादि" इति। प्रत्येकपृथक्त्वे हि परस्परावधिकत्वं प्रतीयते, घटात् पटलोष्टौ पृथक् इति द्विपृथक्त्वे तु न परस्परावधिकत्वप्रतीतिरिति वैषम्यम्। तर्हि द्विपरत्वादिकमप्यतिरिच्यताम्? इत्याशङ्क्याह, "क्लृप्तेन" इति। पृथक्त्ववदत्र परस्परपृथक्त्वप्रतीतिरूपबाधकविरहात् क्लृप्तेनैव निर्वाह इति भावः। तथा च द्वाविमौ नीलाविति-वत् द्वाविमौ पराविति बुद्धिरिति ध्येयम् ॥ ५ ॥

संयोगं निरूपयति, "अप्राप्तिपूर्विका प्राप्तिः" इति। 'प्राप्तिः'

अयश्चाविरलोत्पत्त्या प्रत्याख्यातुं न शक्यते ।
क्षणभङ्गादिवादानां निरासात् तदसम्भवात् ॥ ७ ॥
अभिघातो नोदनश्च संयोगो द्विविधो मतः ।
आदिमः शब्दहेतुः स्याद् अन्तिमस्तद्विलक्षणः ॥ ८ ॥
विभज्यते त्रिधाप्येष आद्योऽन्यतरकर्मजः ।
द्वितीयो द्वयकर्मोत्थस्तथा संयोगजोऽन्तिमः ॥ ९ ॥
निष्क्रियस्यापि शैलस्य श्येनेनात्र क्रियावता ।
संयोगो जायते यस्तु स तेष्वादिम इष्यते ॥ १० ॥
धावतः पुरुषस्यापि धावता पुरुषेण यः ।
पृष्ठदेशेन संयोगः स चाप्यादिम उच्यते ॥ ११ ॥
मेषयोर्मल्लयोर्वा यः स द्वितीयः प्रकीर्त्तितः ।
अङ्गुलीतरुसंयोगात् संयोगस्तरुहस्तयोः ॥ १२ ॥
—तृतीयः, क्वचिदेकस्मात् द्वाभ्याञ्च बहुभिस्तथा ।
संयोग एक एव स्याद् एकस्मात् तत् द्वयं क्वचित् ॥ १३ ॥

संबन्धः । "कार्य्याण्यबाधिता धीश्च" इति । 'कार्य्याणि' अवयवसंयोगे द्रव्यं, भेर्य्याकाशसंयोगे शब्द इत्येवमादीनि । 'धीः' संयुक्तप्रतीतिः ॥ ६ ॥

अविरलोत्पत्तिरेव संयोग इति मतं निरस्यति "अयश्चाविरलोत्पत्त्या" इति । 'तदसम्भवात्' अविरलोत्पत्त्यसम्भवात् ॥ ७ ॥

तन्तुवीरणसंयोगाद् एकस्मादेव जायते।

संयोग एक एवात्र पटवीरणयोरपि ॥ १४ ॥

व्योम्नो द्वाभ्याञ्च तन्तुभ्यां द्वौ संयोगौ, पटस्य तु।—

द्वितन्तुकस्य तेनैकस्ताभ्यामेव प्रजायते ॥ १५ ॥

दशभिस्तन्तुभिर्व्योम्नः संयोगा दश, तैः पुनः।

दशतन्तुपटस्यैकः संयोगस्तेन जन्यते ॥ १६ ॥

अनारम्भकसंयोगे जातेऽणोः पार्थिवाप्ययोः।

द्व्यणुकारम्भकौ यत्र द्वौ संयोगौ तयोः पुनः ॥ १७ ॥

ताभ्यामारभ्यते तत्र युगपद् द्व्यणुकद्वयम्।

एवञ्चानारम्भको यः संयोगः पार्थिवाप्ययोः ॥ १८ ॥

परमाण्वोः समुत्पन्नस्तेनैकेनैव जन्यते।

एकस्मादेकमुदाहरति, "तन्तुवीरणसंयोगात्" इति ॥ १४ ॥

द्वाभ्यामेकमुदाहरति, "व्योम्नो द्वाभ्याञ्च तन्तुभ्याम्" इति। 'तेन' व्योम्ना, सहेति शेषः। 'एकः' संयोग इति शेषः। 'ताभ्यां' संयोगाभ्याम् ॥ १५ ॥

बहुभिरेकमुदाहरति, "दशभिस्तन्तुभिर्व्योम्नः" इति। 'तैः' संयोगैः। 'तेन' व्योम्ना ॥ १६ ॥

एकस्मात् संयोगात् संयोगद्वयमुदाहरति, "अनारम्भकसंयोगे" इति ॥ १७ ॥

पार्थिवद्व्यणुकस्यैक आप्येन परमाणुना ॥ १९ ॥
आप्यस्य द्व्यणुकस्यान्यः संयोगः पार्थिवाणुना ।
तदेवमादिष्वेकेन संयोगद्वयसम्भवः ॥ २० ॥
मूर्त्तैर्विभूनां संयोगः स्यादन्यतरकर्मजः ।
विभूनां कारणाभावात् कर्मणामप्यसम्भवात् ।
अन्योन्यं नास्ति संयोगस्तदजत्वमसम्भविः ॥ २१ ॥
न गुणेषु गुणाः सन्ति संयोगे स न विद्यते ।
युतसिद्धेरभावाच्च न हेतुफलयोरपि ॥ २२ ॥
अयमव्याप्यवृत्तिस्तु तादृशानुभवान्मतः ।

"तदेवमादिष्वेकेन संयोगद्वयसम्भवः" इति । कारणाकारण-संयोगेन कार्य्याकार्य्यसंयोगजननावश्यम्भावादिति भावः ॥ २० ॥

"विभूनां कारणाभावात्" इति । विभूनामन्योन्यं संयोगो नास्तीति प्रतिज्ञा । तत्र हेतुः 'कारणाभावात्' इति । तथा च कारणाकारणसंयोगात् कार्य्याकार्य्यसंयोगस्तत्र न सम्भवतीति भावः । "कर्मणामप्यसम्भवात्" इति । विभूनां निष्क्रियत्वं रत्न-सञ्चये समर्थितम् । अथास्त्वज एव संयोग इत्यत्राह, "तदजत्वम्" इति । अप्राप्तिपूर्विका हि प्राप्तिः संयोग उच्यते । नित्यत्वे च तन्न सम्भवतीति भावः ॥ २१ ॥

"युतसिद्धेरभावाच्च" इति । असम्बन्धयोर्विद्यमानत्वं युतसिद्धिः, सैव संयोगप्रयोजिकेति भावः । 'हेतुफलयोः' कार्य्यकारणयोः ॥२२॥

परमाण्वादिसंयोगोऽप्यवच्छेद्यो दिगादिभिः ॥ २३ ॥

विभागादाश्रयस्यापि नाशात् तन्नाश इष्यते ।

संयोगस्य विनाशे तु कर्मणो नास्ति हेतुता ॥ २४ ॥

विरोधिनो गुणस्यैव गुणनाशकता यतः ।

किञ्च हस्ताङ्गुलीदेहभुजानां स्वस्वकर्मभिः ॥ २५ ॥

संयोगे तरुणा सार्द्धम् अङ्गुलीमात्रकर्मणा ।

अङ्गुलीतरुसंयोगविनाशेऽपि करादिभिः ॥ २६ ॥

तत्संयोगो न नश्येत, तेषु कर्म न विद्यते ॥ २७ ॥

"अयमव्याप्यवृत्तिस्तु" इति । "अव्याप्यवृत्तिः" स्वाधिकरणवृत्त्यभावप्रतियोगी । 'तादृशानुभवात्' अग्रे वृक्षः कपिसंयोगी न मूले इत्याद्यव्याप्यवृत्तित्वावगाह्यनुभवात् ॥ २३ ॥

संयोगनाशकमाह, "विभागादाश्रयस्यापि" इति । 'विभागात्' इति; समानाधिकरणात् इति शेषः । आश्रयनाशात् संयोगनाशस्तु यत्र तन्तुद्वयं चिरसंयुक्तमनुत्पन्नक्रियञ्च वर्त्तते, तत्र तावत्, संयुक्ततन्तुद्वयस्य एकतन्त्ववयवे कर्म, ततो विभागः, ततः आरम्भकसंयोगनाशः, ततस्तन्तुनाशः, ततस्तन्तुनाशादेव संयोगनाश इति बोध्यम् ॥ २४ ॥

"विरोधिनो गुणस्यैव" इति । एव कारात् कर्मव्यवच्छेदः ॥२५॥

"तत्संयोगो न नश्येत" इति । 'तत्संयोगः' तरुसंयोगः । 'न

अङ्गुल्यां कर्मसत्त्वेऽपि तत्र तस्य न हेतुता ।
अन्याधिकरणस्थत्वाद् अन्यथातिप्रसञ्जनम् ॥ २८ ॥
एकाधिकरणस्यैव नाशहेतुत्वमिष्यते ।
सर्वत्रास्मिन् परित्यागस्तस्येत्येतदसाम्प्रतम् ॥ २९ ॥
तस्मात् तत्राङ्गुलीवृत्त-विभागात् तरुहस्तयोः ।
विभागो जायते सोऽयं तयोः संयोगनाशकः ॥ ३० ॥
संयोगस्य प्रतिद्वन्द्वी विभागोऽपि गुणान्तरम् ।
इदं विभजते तस्मादित्येवं हि प्रतीयते ॥ ३१ ॥
संयोगाभावतो नास्य चरितार्थत्वसम्भवः ।

नश्येत' इत्यत्र हेतुमाह, "तेषु कर्म न विद्यते" इति । 'तेषु' हस्तादिषु ॥ २७ ॥

"अङ्गुल्यां कर्मसत्त्वेऽपि" इति । 'तत्र' हस्तादिसंयोगनाशे । 'तस्य' अङ्गुलीकर्मणः । 'अतिप्रसञ्जनं' क्वचिदप्युत्पन्नेन कर्मणा सर्वत्र संयोगनाशप्रसङ्गः ॥ २८ ॥

ननु स्वाश्रयाश्रितसमवेतसंयोग एव व्यधिकरणकर्मनाश्य इति नातिप्रसक्तिः । स्वं व्यधिकरणकर्म । इत्यत्राह, "एकाधिकरणस्यैव" इति ॥ २९ ॥

विभागं निरूपयति, "संयोगस्य प्रतिद्वन्द्वी" इति । तत्र प्रतीतिं प्रमाणयति, "इदं विभजते" इति ॥ ३१ ॥

संयोगाभाव एव विभाग इति मतं दूषयति, "संयोगाभावतो

विभक्तव्यवहारस्य प्रसङ्गाद् गुणकर्मणोः ॥ ३२ ॥
अङ्गाङ्गिनोस्तत्प्रसङ्गात् हिमवद्विन्ध्ययोरपि।
भ्रान्तस्याविनियोज्यत्वात्, नष्टे संयोगिनि क्वचित् ॥३३॥
पुनः संयुक्तयोर्वापि वस्तुनोस्तत्प्रसङ्गतः।
यावत्त्वासम्भवाच्चास्ति विभागोऽर्थान्तरं ततः।
किञ्चैवमन्यथासिद्धिरन्यस्यापि प्रसज्यते ॥ ३४ ॥

नास्य" इति। "संयोगाभावोऽत्यन्ताभावो ध्वंसो वा? तत्र आद्ये आह, "विभक्तव्यवहारस्य" इति ॥ ३२ ॥

ननु द्रव्यगतः संयोगात्यन्ताभाव एव विभक्तप्रत्ययहेतुरिति न गुणकर्मणोस्तद्व्यवहार इत्याशङ्क्याह, "अङ्गाङ्गिनोस्तत्प्रसङ्गात्" इति। "अङ्गाङ्गिनोः" अवयवावयविनोः। अवयवावयविभिन्नद्रव्यगतः स तथा इत्याशङ्क्याह, "हिमवद्विन्ध्ययोरपि" इति। 'तत्प्रसङ्गात्' इत्यनुषज्यते। भवत्येव तथेत्यत्राह, "भ्रान्तस्य" इति। अभ्रान्तमधिकृत्यव्यवहार एव प्रमाणं, भ्रान्तस्य तु गुणकर्मणोरपि तथा व्यवहार इति भावः। अस्तु तर्हि संयोगध्वंस एव तथेति द्वितीयपक्षमाशङ्क्याह, "नष्टे" इति। यत्र संयोगिनोर्द्रव्ययोरेकस्मिन् संयोगिनि नष्टे संयोगनाशस्तत्रापि तद्व्यवहारप्रसङ्गादिति वक्तुरर्थः ॥ ३३ ॥

विद्यमानयोर्द्रव्ययोः संयोगनाशस्तथेत्याशङ्क्याह, "पुनः संयुक्तयोर्वापि" इति। 'तत्प्रसङ्गतः' इति। पुनः संयोगदशायामपीति

संयोगवदमुष्यापि त्रैविध्यादिकमूह्यताम् ।
विभागजविभागस्तु द्विविधः परिकीर्त्तितः ॥ ३५ ॥
हेत्वहेतुविभागः स्याद् हेतुमात्रविभागतः ।
हेत्वहेतुविभागाद्वा कार्य्याकार्य्यविभञ्जनम् ॥ ३६ ॥
कपालकर्मणा जातात् विभागाच्च कपालयोः ।
कपालाकाशयोर्भागस्तयोरादिम उच्यते ॥ ३७ ॥
हेत्वहेतुविभागे तु हेतुकर्म न कारणम् ।

शेषः । प्राक्तनसंयोगनाशस्य तत्रापि विद्यमानत्वादिति भावः । यावत् संयोगनाशस्तयेति चेदत्राह, "यावत्त्वासम्भवात्" इति । अनागतसंयोगात् प्रागेकसंयोगध्वंसदशायामपि यावत्त्वं नास्तीति तत्र विभागव्यवहारानुपपत्तिरिति भावः । उपसंहरति, "अस्ति" इति । 'ततः' संयोगाभावात् । "किञ्चैवम्" इति । 'अन्यस्य' संयोगस्य । विभागाभाव एव संयोग इत्येव किं न स्यादिति भावः ॥ ३४ ॥

"संयोगवदमुष्यापि" इति । तथा च श्येनशैलादिविभागः अन्यतरकर्मजः, मल्लयोर्विभाग उभयकर्मज इत्यर्थः ॥ ३५ ॥

"हेत्वहेतुविभागः स्यात्" इत्यादि । 'हेतुः' कारणम् । 'विभञ्जनं' विभागः ॥ ३६ ॥

कारणमात्रविभागात् कारणाकारणविभागमुदाहरति, "कपालकर्मणा जातात्" इति । 'भागः' विभागः ॥ ३७ ॥

एकस्य कर्म्मणस्तादृक् कारणत्वमसम्भवि ॥ ३८ ॥
द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागकम्।
यत्कर्म जनयत्येतत् नान्यस्य जनकं पुनः ॥ ३९ ॥
यच्च द्रव्यारम्भकस्य संयोगस्याविरोधिनम्।
विभागं जनयत्येतत् न तदन्यमिति स्थितिः ॥ ४० ॥
अन्यथा विकसत्पद्मकुड्मलादि विशेषतः।
भज्येत, तद्विभागेन विभागस्तत्र जायते ॥ ४१ ॥
कल्प्यते हेतुवैचित्र्यं परं कार्य्यविरोधतः।
स विरोधः स्फुटस्तत्र कार्य्ययोस्तद्विभागयोः ॥ ४२ ॥
हस्तकमसमुद्भूताद् विभागात् तरुहस्तयोः।
तरुदेहविभागो यः सपरः परिकीर्त्तितः ॥ ४३ ॥

ननु कपालकर्म्मैव कपालद्वयविभागवत् कपालाकाशविभागमपि जनयतु इत्याशङ्क्याह, "हेतुत्वहेतुविभागे तु" इति ॥ ३८ ॥

तादृशकारणत्वासम्भवं स्पष्टयति, "द्रव्यारम्भकसंयोग—" इति। 'अन्यस्य' द्रव्यारम्भकसंयोगाप्रतिद्वन्द्विविभागस्य ॥ ३९ ॥

"यच्च द्रव्यारम्भकस्य" इति। 'यत्' कर्म। 'तदन्यं' द्रव्यारम्भकसंयोगविरोधिविभागम् ॥ ४० ॥

कुत एतत्? इत्यत्राह, "अन्यथा विकसत्पद्म—" इति। 'तत्' तस्मात्। 'तत्र' कपालकर्मणा जातात् इत्युक्तस्थले ॥ ४१ ॥

कारणाकारणविभागात् कार्य्याकार्य्यविभागमुदाहरति, "हस्त-

यावदङ्गक्रियाव्याप्ता भवेद्वयविक्रिया ।
अतः शरीरे सा नास्ति नाप्यन्या तत्र विद्यते ॥ ४४ ॥
शब्दहेतुत्वमेतस्य चिन्तनीयं विचक्षणैः ।
वंशे लोकैः पाट्यमाने ह्यवष्टब्धे दले पदा ॥ ४५ ॥
दलान्तरे चोपरितः कृष्यमाणे प्रजायते ।
यः शब्दः, कारणं तत्र दलाकाशविभञ्जनम् ॥ ४६ ॥
तथैव दह्यमानानां वेणूनां दववह्निना ।
स्फुटतामपि चीत्कारे विभागः कारणं मतः ॥ ४७ ॥
दलद्वयविभागेन द्रव्यनाशक्षणेन च ।
दलाकाशविभागः स्यादित्याद्यूह्यं मनीषिभिः ॥ ४८ ॥

कर्मसमुद्भूतात्" इति । तत्र देहकारणस्य हस्तस्य तदकारणस्य तरोश्च विभागेन हस्तकार्य्यस्य देहस्य तदकार्य्यस्य तरोश्च विभाग इति भावः ॥ ४३ ॥

शरीरे तु तदानीं क्रिया नास्तीत्याह, "यावदङ्गक्रियाव्याप्ता" इति। 'सा' क्रिया। हस्तकर्मणश्च व्यधिकरणत्वात् न शरीर-विभागहेतुत्वमित्याह, "नापि" इति। 'अन्या' हस्तक्रिया। 'तत्र' शरीरे ॥ ४४ ॥

"दलद्वयविभागेन" इति। वंशदले समुत्पन्नं कर्म, दलद्वय-विभागं जनयति, स च विभागः द्रव्यनाशकालमपेक्ष्य दलाकाश-

सोऽयं क्षणत्रयस्थायी विभागः परिकीर्त्यते ॥ ४९ ॥
क्वचिदुत्तरसंयोगात् क्वचिच्चाश्रयनाशतः।
क्वचित् ताभ्यामुभाभ्याञ्च नश्यत्ययमिति स्थितिः ॥ ५० ॥
दैशिकं कालिकञ्चेति परत्वं द्विविधं स्मृतम्।

विभागम्, अन्यथा निरपेक्षस्य तस्य तज्जनने कर्मत्वापत्तिरिति भावः ॥ ४८ ॥

"सोऽयं क्षणत्रयस्थायी" इति। विभागोत्पत्त्यनन्तरं पूर्वसंयोगनाशः तत उत्तरसंयोगः, उत्तरसंयोगश्च विभागनाशक इति क्षणत्रयस्थायी विभागः ॥ ४९ ॥

"क्वचिदुत्तरसंयोगात्" इति। आश्रयनाशात् विभागनाशो यथा। कपालावयवे कर्म, ततः कपालावयवद्वयविभागः, कपालान्तरे च कर्म इत्येकः कालः, ततः कपालावयवद्वयविभागेनारम्भकसंयोगनाशः, कपालान्तरकर्मणा च विभाग इत्येकः कालः, तत आरम्भकसंयोगनाशात् कपालनाशः, ततः कपालनाशात् कपालान्तरकर्मजन्यविभागनाशः। उभाभ्यां यथा। तन्तुकपालयोः संयोगे सति, तन्त्ववयवेऽंशौ कपाले च युगपत् कर्म। ततोऽंशुकर्मणाऽंश्वन्तरविभागः कपालकर्मणा च तन्तुकपालविभाग इत्येकः कालः। ततोऽंशुविभागेन तन्त्वारम्भकसंयोगनाशः तन्तुकपालविभागेन च तन्तुकपालसंयोगनाश इत्येकः कालः। ततस्तन्तुनाशः कपालस्य देशान्तरसंयोगश्च इत्येकः कालः। तत आश्रयनाशोत्तरसंयोगाभ्यां विभागनाशः ॥ ५० ॥

तद्वदेवापरत्वं स्यात् तदुत्पत्तिर्निरूप्यते ॥ ५१ ॥
मूर्त्ताभ्यामेकदिक्काभ्यां परत्वमपरत्वकम् ।
सन्निकर्षवियोगिभ्यां दैशिकं खलु जायते ॥ ५२ ॥
पिण्डाभ्यामेककालाभ्यां तादृशाभ्यान्तु कालिकम् ।
सन्निकर्षादिशब्देन तद्बुद्धिः प्रतिपाद्यते ॥ ५३ ॥

परत्वापरत्वे निरूपयति, "दैशिकं कालिकञ्चेति" इति ॥५१॥

दैशिकपरत्वापरत्वयोर्लक्षणमाह, "मूर्त्ताभ्यामेकदिक्काभ्याम्" इति । एका दिक् ययोस्ताभ्याम् एकदिक्काभ्याम् । 'सन्निकर्षः' संयुक्तसंयोगाल्पत्वम् । 'वियोगः' संयुक्तसंयोगभूयस्त्वम् । तद्वद्भ्यामित्यर्थः । तथा च दैशिकपरत्वं प्रति संयुक्तसंयोगभूयस्त्वज्ञानं दैशिकापरत्वं प्रति च तदल्पत्वज्ञानं हेतुरिति भावः । दैशिकपरत्वमेव दूरत्वं, दैशिकापरत्वमेव चान्तिकत्वमिति बोध्यम् । अत्रावधिरपेक्ष्यते, भवति हि पाटलिपुत्रस्थस्य काशीमपेक्ष्य प्रयागः परः, प्रयागमपेक्ष्य च काश्यपरेति व्यवहारः ॥ ५२ ॥

"पिण्डाभ्यामेककालाभ्याम्" इति । 'तादृशाभ्यां' सन्निकर्षवियोगिभ्याम् । अत्र सन्निकर्षः अल्पतरतपनपरिस्पन्दान्तरितजन्मत्वं, वियोगः बहुतरतपनपरिस्पन्दान्तरितजन्मत्वं बोध्यम् । 'कालिकम्' इति परत्वमपरत्वञ्च जायते इत्यर्थः । भवति हि युवानमपेक्ष्य स्थविरः परः, स्थविरमपेक्ष्य च युवाऽपर इति व्यवहारः । एतद्द्वयमेव यथाक्रमं ज्येष्ठत्वं कनिष्ठत्वञ्चोच्यते इति बोध्यम् ॥ ५३ ॥

द्रव्यं तदेषां समवायिहेतुर्दिगादियोगोऽसमवायिहेतुः।
मतिर्निमित्तं ह्यपरोक्षसिद्धेः परस्परापेक्षितया न दोषः॥५४॥
नाशो दैशिकयोर्ज्ञेयः सप्तधा शाङ्करे मते॥ ५५ ॥
निमित्तस्य विनाशाद्वाऽसमवायिन एव वा।
समवायिविनाशाद्वा निमित्तासमवायिनोः।
—नाशाद्वापि विनाशाद्वा निमित्तसमवायिनोः ॥ ५६ ॥

"द्रव्यं तदेषां समवायिहेतुः" इत्यादि। 'एषां' दैशिककालिकपरत्वापरत्वानाम्। "दिगादियोगः" इति दैशिकपरत्वापरत्वयोर्दिक्पिण्डसंयोगः, कालिकपरत्वापरत्वयोः कालपिण्डसंयोगश्च यथाक्रममसमवायिकारणमित्यर्थः। 'मतिर्निमित्तम्' इति, सन्निकर्षादिबुद्धिर्निमित्तकारणमित्यर्थः। "अपरोक्षसिद्धेः" इति, तथा च परत्वापरत्वयोः परस्परापेक्षित्वेऽपि कारणसामर्थ्यादुत्पन्नयोः प्रत्यक्षसिद्धत्वाददोषः। न हि दृष्टेऽनुपपन्नं नामेति न्यायादिति भावः॥ ५४ ॥

"निमित्तस्य विनाशाद्वा" इति। निमित्तनाशात् यथा। परत्वोत्पत्तिः, ततः परत्वज्ञानं, ततः विप्रकर्षबुद्धिनाशपरत्वज्ञाने, ततो विशिष्टबुद्धिपरत्वनाशौ। असमवायिकारणनाशात् यथा। विप्रकर्षबुद्धिः परत्वाधारपिण्डे कर्म चेत्येकः कालः। ततः परत्वोत्पत्तिर्दिक्पिण्डविभागश्चेत्येकः कालः। ततः परत्वज्ञानं दिक्पिण्डसंयोगनाशश्चेत्येकः कालः। ततो विप्रकर्षबुद्धिनाशः परत्व-

निमित्तभिन्नयोर्वापि नाशात् कारणयोः क्वचित् ।
विनाशादपि सर्वेषां हेतूनामेकदैव वा ॥ ५७ ॥

नाशश्चेत्येकः कालः । अत्र च विप्रकर्षबुद्धिनाशस्य परत्वनाशतुल्य-कालतया न तन्नाशकत्वमिति द्रष्टव्यम् । परत्वाधारस्यान्यत्र गमने हि विप्रकर्षो निवर्त्तते इति परत्वस्यापि निवृत्तिरुचिता, न च तदानीं तन्नाशकान्तरसम्भव इत्यनायत्या असमवायिकारणनाश-स्यैव तन्नाशकत्वं कल्प्यते । एवमवधेर्देशस्य तद्देशसंयोगनाशादपि परत्वादिनाशोऽभ्युपगन्तव्यः युक्तितौल्यादिति ध्येयम् । समवायि-कारणनाशात् यथा । पिण्डावयवे कर्म, ततोऽवयवविभागो विप्र-कर्षबुद्धिश्च इत्येकः कालः । ततः पिण्डारम्भकसंयोगनाशः परत्वो-त्पत्तिश्चेत्येकः कालः । ततः पिण्डनाशः परत्वज्ञानश्चेत्येकः कालः । ततः परत्वनाशो विप्रकर्षबुद्धिनाशश्चेत्येकः कालः । निमित्तासम-वायिकारणनाशाभ्यां यथा । परत्वोत्पत्तिः पिण्डकर्म चेत्येकः कालः । विभागः परत्वत्वज्ञानश्चेत्येकः कालः । विप्रकर्षबुद्धिनाशो दिक्-पिण्डसंयोगनाशश्चेत्येकः कालः । ततस्ताभ्यां परत्वनाशः । द्रव्य-नाशविप्रकर्षबुद्धिनाशाभ्यां यथा । पिण्डावयवकर्मविप्रकर्षबुद्धी । अवयवान्तरविभागपरत्वोत्पत्ती । आरम्भकसंयोगनाशपरत्वत्व-ज्ञाने । ततो द्रव्यनाशविप्रकर्षबुद्धिनाशौ । ततस्ताभ्यां परत्व-नाशः । द्रव्यनाशदिक्पिण्डसंयोगनाशाभ्यां यथा । द्रव्यावयव-विभाग-पिण्डकर्म-विप्रकर्षबुद्धयः । अवयवसंयोगनाश-दिक्पिण्ड-विभाग-परत्वोत्पत्तयः । द्रव्यनाश-दिक्पिण्डसंयोगनाश-परत्वत्व-

त्रिधा कालिकयोर्नाशः समवायिविनाशतः।
निमित्तनाशतो वाभ्यामुभाभ्यां वापि कुत्रचित्।
निमित्तमात्रनाशेन तन्नाशः कस्यचिन्मते ॥ ५८ ॥
परत्वादपरत्वाच्च समवायिन एव तु।
व्यवहारस्तयोस्तत्र नान्यत्र विषयत्वतः ॥ ५९ ॥
परत्वमपरत्वञ्च न परत्वापरत्वयोः।

स्थानानि। परत्वनाश-विप्रकर्षबुद्धिनाशौ। सर्वेषां युगपन्नाशात् यथा। परत्वोत्पत्ति-पिण्डावयवविभाग-पिण्डकर्माणि। परत्व-स्थान-पिण्डावयवसंयोगनाश-दिक्पिण्डविभागाः। विप्रकर्षबुद्धि-नाश-पिण्डनाश-दिक्पिण्डसंयोगनाशाः। ततस्तेभ्यः परत्वनाशः। ५६ ॥ ५७ ॥

"त्रिधा कालिकयोर्नाशः" इति। दिक्पिण्डसंयोगनाशे सन्नि-कर्षादिनाशात् असमवायिकारणनाशेन दैशिकपरत्वापरत्वयो-र्नाशो युक्त एव, कालिकयोस्तु न तथात्वमिति नासमवायिकारण-नाशनाश्यत्वमिति त्रिधैव तयोर्नाश इति भावः। नाशप्रकारश्च पूर्ववदूह्यः ॥ ५८ ॥

ननु प्रयागमपेक्ष्य काशीपरेति बुद्धेर्विषयतासम्बन्धेन प्रयागेऽपि सत्त्वात् तत्रापि अपरत्वव्यवहारः स्यात्, एवं काशीमपेक्ष्यः प्रयागः पर इत्यत्रापि। अत्राह, "परत्वादपरत्वाच्च" इति। समवायि-कारणस्यैव परत्वादपरत्वाच्च तत्रैव तयोर्व्यवहारः, न तु सन्निकर्षादि-

नाणुत्वादिष्वणुत्वादि न गुणादि गुणादिषु ॥ ६० ॥

लोकोपकाराय कणादपादै-
र्ये लक्षिता विस्तरतस्त एव ।
संक्षेपतः सङ्कलितास्तदस्यां
रमन्तु लोका ऋजुनिर्मलायाम् ॥

इति श्रीचन्द्रकान्ततर्कालङ्कार-प्रणीतायां तत्त्वावलौ ऋजुनिर्मलानामक एकादशः परिच्छेदः ।

बुद्धिविषयतामात्रेणान्यत्र, व्यवहारं प्रति व्यवहर्त्तव्यस्य तत्त्वादिति भावः ॥ ५९ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां ऋजुनिर्मलाभिधेय एकादशः परिच्छेदः ।

बोधविलासो नाम

द्वादशः परिच्छेदः ।

यतो बोधेऽपि बहुधा विवदन्ते बुधा अपि ।
ततः कणादपादानां मतमत्र प्रदर्श्यते ॥ १ ॥
ज्ञानमात्मगुणः प्रोक्तं जानामीति प्रतीयते ।
तदेव प्रत्ययो बुद्धिरुपलब्धिश्च, तत् पुनः ॥ २ ॥
वदन्ति चयवत्, साक्षादक्षादिभ्यस्तदुद्भवः ।
अविद्या चैव विद्या च तद्भेदद्वयमीरितम् ॥ ३ ॥
संस्कारदोषादक्षाणां दोषाच्चैव प्रजायते ।
अविद्या, तत्र दूरत्वपित्तादेरपि हेतुता ॥ ४ ॥
विद्यां तु बुद्धिं विद्वांसः प्रवदन्ति गुणोद्भवाम् ।
तत्तद्विषयभेदेन सोऽपि नानाविधो मतः ॥ ५ ॥
संशयोऽथ विपर्य्यासः स्वप्नोऽनध्यवसायकः ।

"संस्कारदोषादक्षाणाम्" इत्यादि । अक्षदोषस्थापाटवादि ॥४॥
"विद्यां तु बुद्धिं विद्वांसः" इत्यादि । "तत्तद्विषयभेदेन" इति । प्रत्यक्षस्थले विशेषणवद्विशेष्येन्द्रियसन्निकर्षो गुणः । लैङ्गिकस्थले साध्यवत् पक्षे यथोक्तलिङ्गपरामर्शो गुण इत्यादि ज्ञेयम् ॥ ५ ॥

इत्यवान्तरभेदेभ्यः स्यादविद्या चतुर्विधा ॥ ६ ॥
प्रत्यक्षं लैङ्गिकं चैव स्मृतिरार्षं तथैव च ।
चतुर्धैव कणादानां विद्याप्येवं विभिद्यते ॥ ७ ॥
ग्रहात् सामान्यधर्मस्य कोटिद्वयविमर्शनात् ।
तदेककोटिव्याप्यस्य ग्रहाभावाच्च संशयः ॥ ८ ॥
योऽप्यसाधारणो धर्मो व्यावृत्त्यैव सकारणम् ।
सा तु साधारणी, यद्वा तस्यानध्यवसायके ॥ ९ ॥

"ग्रहात् सामान्यधर्मस्य" इति । तथा च साधारणधर्मज्ञानं, संशयविषयकोटिद्वयज्ञानं, तदेककोटिव्याप्यत्वनिश्चयाभावसंशयकारणमित्यर्थः ॥ ८ ॥

साधारणधर्मासाधारणधर्मविप्रतिपत्तिरूपकारणत्रैविध्यात् त्रिविधः संशय इति न्यायवार्त्तिकादिमतम् । उपलभ्यमानत्वमनुपलभ्यमानत्वञ्च संशायकमिति पञ्चविधः संशय इति न्यायभाष्यादिमतम् । तदुभयं निराकरोति, "योऽप्यसाधारणो धर्म" इत्यादिना । असाधारणधर्मः संशायको भवन् व्यावृत्त्यैव भवति । यथा शब्दत्वव्यावृत्तिर्नित्येऽनित्ये चास्तीति शब्दो नित्यो न वेति संशयः । व्यावृत्तिश्च साधारणधर्म एवेति नाधिक्यम् । "यद्वा" इति । 'तस्य' साधारणधर्मस्य । तथा च तस्य संशायकत्वमेव नास्तीति भावः । शब्दो नित्यो न वेति संशयस्य शब्दत्वव्यावृत्तिज्ञानात् सत्त्वप्रमेयत्वादिज्ञानाद्वा भवतीत्यनुसन्धेयम ॥ ९ ॥

ज्ञाने कारणता ज्ञेया सद्भिर्वैशेषिके नये ।
तथा विप्रतिपत्तेश्च नात्र कारणतेष्यते ।
तयोरयुगपद्भावात् नास्ति सम्भूयहेतुता ॥ १० ॥
यच्चोपलभ्यमानत्वं यच्च तद्विपरीतकम् ।
समानतन्त्रभाष्योक्तं तदस्मिन्नातिरिच्यते ॥ ११ ॥
यस्तु साधारणो धर्मः स संशायक इष्यते ।
धर्मिद्वये गृह्यमाणः क्वचिदेकत्र धर्मिणि ॥ १२ ॥
स्थाणुपुंसोर्द्वयोर्दृष्टम् ऊर्द्ध्वत्वं तेन हेतुना ।
स्थाणुर्वा पुरुषो वेति पुरोवर्तिनि संशयः ॥ १३ ॥
प्राक् चैत्रः, केशवान् दृष्टस्तथा केशविनाकृतः ।
कालान्तरे, क्रमेणास्मिन् दृष्टे प्रावृतमस्तके ॥ १४ ॥

"तथा विप्रतिपत्तेश्च" इति । विरुद्धप्रतिपत्तिद्वयजन्यं वाक्यद्वयं तज्जन्यज्ञानद्वयं वा विप्रतिपत्तिरित्युच्यते । तयोरयौगपद्यात् संशयहेतुता न सम्भवतीति भावः । अत्रापि पूर्वोक्तं संशयकारणमनुसन्धेयम् ॥ १० ॥

"यच्चोपलभ्यमानत्वम्" इति । 'तद्विपरीतकम्' अनुपलभ्यमानत्वम् । सदप्युपलभ्यते, असदप्युपलभ्यते एवं सदपि नोपलभ्यते, असदपि नोपलभ्यते इति तयोः संशायकत्वम् । स्वमते तदपि साधारणधर्म एवेति नाधिक्यम् ॥ ११ ॥

निष्केशः स्यात् सकेशो वा चैत्रोऽयमिति संशयः ।
अभिन्नधर्मिदृष्टेन चैत्रत्वेनैव जायते ॥ १५ ॥
वहिर्विषयकश्चान्तर्विषयश्चेति स द्विधा ।
उदाहृतः पुरैवात्र वहिर्विषयसंशयः ॥ १६ ॥
मौहूर्तिकः सम्यगथासम्यगप्यादिशत्यतः ।
स्वज्ञाने संशयोऽमुष्य जायते यस्तु कर्हिचित् ॥ १७ ॥
आदिष्टमुपरागादि सम्यग्वाऽसम्यगेव वा ।
अन्तर्विषय इत्येवं सोऽयं संशय इष्यते ॥ १८ ॥
एवमन्यत्र यो ज्ञातुर्ज्ञानमेतत् प्रमा न वा ।
इत्येवं संशयः सोऽपि भवेदान्तरसंशयः ॥ १९ ॥
कृशोऽहं वधिरः स्थूलः शंखोऽयं पीतवर्णकः ।
इत्यादिनिश्चयः प्राच्यैर्विपर्य्यय इहोच्यते ॥ २० ॥
उपारतेन्द्रियस्यापि ज्ञानं यत् लीनचेतसः ।
संस्कारादात्ममनसोः संयोगाच्च विलक्षणात् ।
तत्स्वप्न इत्यभिहितं स्वप्नान्तिकमपि स्मृतम् ॥ २१ ॥

संशयमभिनयति, "आदिष्टमुपरागादि" इति ॥ १८ ॥
स्वप्नं निरूपयति, "उपारतेन्द्रियस्यापि" इति । आत्ममनःसं-योगस्य वैलक्षण्यञ्च निद्रादोषविशिष्टत्वम् । चकारादट्टष्टादिसमु-

कथ्यते तद्विभेदाय विशेषः कश्चनानयोः ।
स्वप्नः स्यात् मानसं ज्ञानं स चानुभव इष्यते ॥ २२ ॥
संस्कारात् स्मरणं पश्चात् सन्निकर्षादलौकिकात् ।
ज्ञानलक्षणरूपाच्च मानसस्यास्ति सम्भवः ॥ २३ ॥
तदुत्पन्नाच्च संस्कारात् ज्ञानमुत्पद्यते तु यत् ।
स्मृतिरूपं तदेवात्र स्वप्नान्तिकमितीर्य्यते ॥ २४ ॥
संस्कारपाटवात् धातुदोषाच्चादृष्टतस्तथा ।
स्वप्नः प्रजायते तस्मात् सोऽयं त्रिविध उच्यते ॥ २५ ॥
यमर्थमादृतः कामी क्रुद्धो वा परिचिन्तयन् ।
स्वपितस्य तदा ज्ञानं भवत्यर्थचसम्मितम् ॥ २६ ॥
वसुन्धरापर्य्यटनं व्याघ्रभीतिपलायनम् ।

क्षयः । तथा च स्वप्नज्ञानं प्रति, तादृशात्ममनःसंयोगः, पूर्वानुभवजनितसंस्कारश्च कारणमित्यर्थः ॥ २१ ॥

स्वप्नज्ञानस्यानुभवरूपत्वं समर्थयति, "संस्कारात् स्मरणं पश्चात्" इति ॥ २३ ॥

"तदुत्पन्नाच्च संस्कारात्" इति । तथा च संस्कारात् स्मरणानन्तरं ज्ञानलक्षणसन्निकर्षजं मानसं स्वप्नः । स्वप्नावस्थाजातानुभवजनितसंस्कारेण स्वप्नानुभूतस्यैवार्थस्य स्वप्नमध्ये या स्मृतिः तत्स्वप्नान्तिकमिति भेदः ॥ २४ ॥

आकाशगमनञ्चान्यत् वातदोषेण पश्यति ॥ २७ ॥
अग्निप्रवेशं दिग्दाहं तथा कनकपर्वतम् ।
विद्युद्विस्फुरणञ्चान्यत् पित्तदोषेण पश्यति ॥ २८ ॥
नदीसन्तरणं सिन्धुप्लवं रजतपर्वतम् ।
आसारमेवमन्यच्च श्लेष्मदोषेण पश्यति ॥ २९ ॥
पर्वतारोहणं छत्रलाभं पायसभक्षणम् ।
शुभावेदकमन्यच्च धर्मादेव प्रपश्यति ॥ ३० ॥
अन्धकूपप्रपतनं पङ्कमज्जनमेव च ।
अशुभावेदकञ्चान्यत् अधर्मादेव पश्यति ॥ ३१ ॥
यस्तु ज्ञानविशेषः स्याद् असाधारणधर्मजः ।
जिज्ञासाजनकः सोऽनध्यवसाय इहोच्यते ॥ ३२ ॥
ज्ञानमिन्द्रियजं प्रोक्तं प्रत्यक्षं, लैङ्गिकं पुनः ॥ ३३ ॥
यथोक्तलिङ्गविज्ञानजनितं ज्ञानमुच्यते ।
प्रपञ्चस्त्वनयोरुक्तः प्रमाणपरिचिन्तने ॥ ३४ ॥
प्रणिधानादिसहितात् संयोगादात्मचेतसोः ।

"यस्तु ज्ञानविशेषः स्याद् असाधारणधर्मजः" इति । भवति हि नित्यानित्यव्यावृत्तं शब्दत्वं शब्दे उपलभमानस्य शब्दः किं नित्यः आहोस्विदनित्य इति जिज्ञासा ॥ ३२ ॥

संस्कारात् प्राक्तनज्ञानादतीतविषया स्मृतिः ॥ ३५ ॥
संस्कारजनकज्ञानयथार्थत्वाद्यपेक्षया।
स्फुटं तादृक्त्वमेतस्याश्चिन्तनीयं विचक्षणैः ॥ ३६ ॥
भुजङ्गमतया रज्जुमुपलभ्य पलायितः।
तथैव स्मरतीत्येवं लोके वज्ञलमीक्ष्यते ॥ ३७ ॥
संस्कारोद्बोधजन्यैव स्मृतिस्तत्र च कारणम्।
उद्बोधकास्ततो नास्ति सर्वदास्याः समुद्भवः ॥ ३८ ॥
संस्कारकारणन्त्वत्र विज्ञानं निश्चयात्मकम्।
सुतरां संशयज्ञानगोचरस्यापि न स्मृतिः ॥ ३९ ॥
अस्मिन् वल्मीककूटे मे स्थाणुर्वा पुरुषोऽपि वा।
इत्येवं संशयः पूर्वमासीदेषा स्मृतिस्तु या ॥ ४० ॥

स्मृतिं निरूपयति, "प्रणिधानादिसहितात्" इति। अत्र च प्राक्तनानुभवः करणं, संस्कारश्च भावनाख्यो व्यापारः। एवमात्ममनःसंयोगोऽसमवायिकारणं, प्रणिधानादिकं निमित्तकारणमित्यनुसन्धेयम् ॥ ३५ ॥

"संस्कारजनकज्ञान—" इत्यादि। 'तादृक्त्वं' यथार्थत्वादि। 'एतस्याः' स्मृतेः ॥ ३६ ॥

"संस्कारोद्बोधजन्यैव" इति। तथा चोद्बुद्ध एव संस्कारः स्मृतिहेतुरिति भावः। 'तत्र' संस्कारोद्बोधे। 'अस्याः' स्मृतेः ॥३८॥

संशयात्मकविज्ञानगोचरैव हि सा मता ।
तस्य निश्चय एवासीत् पुरा संस्कारकारणम् ॥ ४१ ॥
स्थाणुर्वा पुरुषो वेति न ह्यन्यत्रैव जातुचित् ।
अत्रापि विषयं लोकः कोऽपि स्मरति केवलम् ॥ ४२ ॥
ऋषीणां गालवादीनाम् अतीतानागतेष्वपि ।
ज्ञानमार्षमिति प्रोक्तं धर्मेभ्यस्तत् प्रजायते ॥ ४३ ॥
आर्षं चतुर्थीं विद्येति केचित् नेच्छन्ति सूरयः ।
योगि-प्रत्यक्षपतितं तद्धि सूत्रकृतां मते ॥ ४४ ॥
विवक्षामात्रमाश्रित्य विभागं केचिदूचिरे ।
महर्षिणैव नवमे तत् तु सुस्पष्टमीरितम् ॥ ४५ ॥
उत्पद्यते ज्ञानमिदं लोकानामपि कर्हिचित् ।
तथा हि कन्यका काचिद् वदत्यन्यजनं प्रति ।
आगन्ता श्वो मम भ्राता चित्तं मे कथयत्यदः ॥ ४६ ॥

"संशयात्मकविज्ञान—" इत्यादि । 'तस्य' संशयात्मकविज्ञानस्य । "निश्चयः" इति, संशयविज्ञानस्यानुव्यवसाय एव तन्निश्चय इति भावः ॥ ४१ ॥

उक्तस्थले संशयज्ञानमेव स्मर्य्यते इत्येतदुपपादयति, "स्थाणुर्वा पुरुषो वेति" इति ॥ ४२ ॥

"उत्पद्यते ज्ञानमिदम्" इति । 'इदम्' आर्षम् ॥ ४६ ॥

विप्रकृष्टेष्वपि ज्ञानं सिद्धानामञ्जनादिभिः ।
सिद्धदर्शनमित्याहुः तदस्मिन्नातिरिच्यते ॥ ४७ ॥
संशयो निर्णयश्चेति पुनर्ज्ञानं द्विधा मतम् ।
संशयो लक्षितः पूर्वं तदन्यो यः स निर्णयः ॥ ४८ ॥
भूयोऽप्येतत् द्विधाभिन्नमनुभूतिः स्मृतिस्तथा ।
अनुभूतिः स्मृतेरन्या स्मृतिः पूर्वं निरूपिता ॥ ४९ ॥
सोऽयं बोधविलासो विलसतु हृदये विधूय सन्देहम् ।
नानाविधमतदृष्ट्या जातमपि बहुलं लोकानाम् ॥ ५० ॥

इति श्रीचन्द्रकान्ततर्कालङ्कार-प्रणीतायां तत्त्वावलौ बोधविलासो नाम द्वादशः परिच्छेदः ।

"विप्रकृष्टेष्वपि ज्ञानम्" इति । "नातिरिच्यते" इति । अञ्जनादिनिमित्तजं विप्रकृष्टविषयज्ञानं प्रत्यक्षमेव । ग्रहनक्षत्रादिसञ्चाराधीनं दिव्यान्तरीक्षादिविषयज्ञानञ्च लैङ्गिकमेवेति भावः ॥ ४७ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां बोधविलासो नाम द्वादशः परिच्छेदः ।

रत्नमञ्जुषा नाम

त्रयोदशः परिच्छेदः ।

कार्य्याणां कारणानाञ्च वैलक्षण्योपलम्भनात् ।
विरोधादपि भेदः स्याद् अन्योन्यं सुखदुःखयोः ॥ १ ॥
कार्य्यं नेत्रप्रसादादिसुखादुत्पद्यते परम् ।
मुखमालिन्यमन्यच्च दुःखादेव तु तादृशम् ॥ २ ॥
सुखस्य कारणं प्रोक्तमिष्यमाणं स्रगादिकम् ।
अनिष्टमेव दुःखस्य कण्टकेष्टवधादिकम् ॥ ३ ॥

इदानीमुद्देशक्रमप्राप्ते सुखदुःखे निरूपयितव्ये । तत्र तावत्, "दुःखविकल्पे सुखाभिमानाच्च" इति गौतमीय-सूत्रदर्शनात् दुःखमेव सुखं, न तु गुणान्तरमिति भवत्याशङ्का । तां निरस्यति, "कार्य्याणां कारणानाञ्च" इति । तथा च कार्य्यवैलक्षण्यं, कारणवैलक्षण्यं, 'विरोधः' सहानवस्थानञ्च, सुखदुःखयोः परस्परं भेदकमिति न तयोरैक्यम् । गौतमीयं सूत्रन्तु वैराग्याय सुखमपि दुःखत्वेन भावनीयमित्येतत्परम् ॥ १ ॥

कार्य्यवैलक्षण्यं दर्शयति, "कार्य्यं नेत्रप्रसादादि" इति ॥ २ ॥

कारणवैलक्षण्यं दर्शयति, "सुखस्य कारणं प्रोक्तम्" इति ॥ ३ ॥

वस्तुतः सर्वलोकानां साक्षादनुभवागतम्।
गीर्वाणगुरुणाप्येतदपह्नोतुं न शक्यते॥ ४॥ ॥
संशये निर्णयेऽनन्तर्भावान्न ज्ञानरूपता।
यावद्विशेषबाधाद्धि सामान्यमपि बाध्यते॥ ५॥
अहं सुखीति दुःखीति प्रत्ययः सुखदुःखयोः।
न तु जाने निश्चिनोमि सन्देग्धीति कथञ्चन॥ ६॥
प्रत्यक्षलैङ्गिकाभ्यान्तु तयोर्निष्पत्तिरिष्यते॥ ७॥

"वस्तुतः सर्वलोकानाम्" इत्यादि। 'एतत्' सुखदुःखयोर्भिन्नत्वम्॥ ४॥

ज्ञानस्वरूपे एव सुखदुःखे स्यातामित्यत्राह, "संशये निर्णयेऽनन्तर्भावात्" इति। संशयकोटिद्वयस्य निर्णयेऽप्येककोटेरुल्लेख आवश्यकः, सुखदुःखयोस्तु स नास्ति इति न ज्ञानत्वन्तयोः इति भावः॥ ५॥

ज्ञानाद्भेदकमनुभववैलक्षण्यञ्चाह, "अहं सुखीति दुःखीति" इति॥ ६॥

भेदकान्तरमाह, "प्रत्यक्षलैङ्गिकाभ्यान्तु" इति। "निष्पत्तिः" सिद्धिः। स्वात्मनि सुखादिकं प्रत्यक्षं; परात्मनि च नयनप्रसादाद्यनुमेयम्। एतेन निर्विकल्पज्ञानरूपत्वमेव सुखदुःखयोः स्यादिति निरस्तम्। न हि तत्प्रत्यक्षं, नापि नयनप्रसादाद्यनुमेयमिति भावः। यद्वा 'तयोः' संशयनिर्णययोः। 'निष्पत्तिः' उत्पत्तिः। तथा च सं-

भवद्भूतं भविष्यद्वा ज्ञानं वस्त्ववगाहते ।
नैवं सुखं वा दुःखं वा तस्मादप्यनयोर्भिदा ॥ ८ ॥
सत्यामपि च सामग्र्यां लैङ्गिकाध्यक्षयोर्द्वयोः ।
तयोरदर्शनात् ताभ्यामन्यत्वं सुखदुःखयोः ॥ ९ ॥
न सामग्र्येकदेशस्य कार्य्यसाजात्यहेतुता ।
तत्प्रागभावादिजत्वेऽपि नास्ति ज्ञानस्वरूपता ॥ १० ॥
नो चेत् कालादिहेतुत्वसाधारण्योपलम्भनात् ।
सर्वेषामेव कार्य्याणाम् ऐकजात्यं प्रसज्यते ॥ ११ ॥
विशेष्यादेरनुल्लेखात् प्रत्यक्षत्वाच्च नानयोः ।

शयो निर्णयश्च यथायथं प्रत्यक्षाल्लिङ्गाच्चोत्पद्यते, सुखं दुःखं वा नैवमिति भावः । अस्मिंश्च पक्षे लैङ्गिकमिति स्वार्थे ठक् ॥ ७ ॥

ज्ञानाद्भेदकान्तरमाह, "भवद्भूतं भविष्यद्वा" इति ॥ ८ ॥

भेदकान्तरमाह, "सत्यामपि च सामग्र्याम्" इति । 'तयोः' सुखदुःखयोः । 'ताभ्यां' लैङ्गिकाध्यक्षाभ्याम् ॥ ९ ॥

ननु सुखस्यापि प्रत्यक्षादिजन्यत्वमस्त्येव स्रगादाविन्द्रियसन्निकर्षेणैव प्रथमं तस्य जातत्वात् इत्याशङ्कामभ्युपगम्य परिहरति, "न सामग्र्येकदेशस्य" इति । सुखाद्युत्पत्तिसामग्री वक्ष्यते, तदेव च ज्ञानाद्भेदकं, सामग्र्येकदेशश्च विषयेन्द्रियसन्निकर्ष इति न तस्य साजात्यप्रयोजकत्वमिति भावः ॥ १० ॥

विपक्षे बाधकमाह, "नो चेत् कालादिहेतुत्व—" इति ॥ ११ ॥

ज्ञानत्वं, किञ्च न ज्ञानं नास्ति ह्येतद्विलक्षणम् ॥ १२ ॥
एकार्थसमवेतेषु विजातीयेषु हेतुषु।
उत्पत्तिदर्शनाद् अर्थान्तरता सुखदुःखयोः ॥ १३ ॥
एकस्मिन् एकदेशे च शिरःपृष्ठमथोदरम्।
मर्माणीत्यादयः सन्ति व्यवहारा विलक्षणाः ॥ १४ ॥

किञ्च सुखादेर्ज्ञानत्वे तत् किं सविकल्पकं, निर्विकल्पकं वा? न तावदाद्यः इत्याह, "विशेष्यादेरनुल्लेखात्" इति। नापि द्वितीयः इत्याह, "प्रत्यक्षत्वाच्च" इति ॥ १२ ॥

"एकार्थसमवेतेषु" इति। सत्सु इति शेषः। तथा च धर्मः, सुखे रागः, सुखकारणेच्छा, तदुपादानयत्नः, स्रक्चन्दनादिज्ञानमित्येतान्येकार्थसमवेतानि विजातीयान्यसाधारणकारणानि, सुखं स्वोत्पत्तावपेक्षते। दुःखन्तु अधर्मः, कण्टकादिज्ञानमित्येतानि। ज्ञानन्तु सविकल्पकं नैकार्थसमवेतासाधारणकारणमपेक्षते इति कारणवैलक्षण्यात् कार्य्यवैलक्षण्यमिति भावः। सविकल्पकञ्च ज्ञानं यद्यपि विशेषणज्ञानमपेक्षते, तथापि न तत् विजातीयम्। मनःसंयोगादिकन्तु नासाधारणमिति तत्रापि वैलक्षण्यमस्तीति भावः। लैङ्गिकञ्च ज्ञानं यद्यपि व्याप्तिस्मृत्यादिकमपेक्षते, तथापि तदपि न विजातीयमिति ततोऽपि भेदः। स्मृतिभेदस्तु स्पष्ट एवेति हृदयम् ॥१३॥

ननु यदि कारणभेदाधीनः कार्य्यभेदः तदा शरीर-तदवयवानामभेदप्रसङ्ग इत्याशङ्क्याह, "एकस्मिन्नेकदेशे च" इति। 'एकस्मिन्' देहे। 'एकदेशे' अवयवे ॥ १४ ॥

व्यवहर्त्तव्यवैजात्यं सुतरामेव सिध्यति ।
तत्रापि हेतुवैजात्यमस्तु तन्तुकपालवत् ॥ १५ ॥
शर्करांशुकवैजात्यात् तद्वैजात्यं यथेष्यते ।
तथोपादानवैजात्यमेतस्मिन्नपि चिन्त्यताम् ॥ १६ ॥
अनागते तु विषये द्वयं सङ्कल्पमात्रजम् ।
अतीते स्मृतिमात्रोत्थं भवत्येतद्विलक्षणम् ॥ १७ ॥
अवान्तरविभागादि स्वयमूह्यं मनीषिभिः ।
समुपारस्यतेऽस्माभिः परं विस्तरभीरुभिः ॥ १८ ॥

ततः किमित्यत्राह, "व्यवहर्त्तव्यवैजात्यम्" इति । विलक्षणव्यवहारो विलक्षणव्यवहर्त्तव्यमवगमयति । ननु नास्ति कारणवैलक्षण्यमित्यत्राह, "तत्रापि" इति । न हि यज्जातीयं शिरः समवायिकारणं तज्जातीयमेव पृष्ठादेरपीत्यस्ति कारणवैजात्यम् ॥१५॥

ननु शिरःप्रभृतिसमवायिकारणवैजात्यमेव कुतः ? इत्याशङ्क्य तत्समवायिकारणवैजात्यादिति सदृष्टान्तमाह, "शर्करांशुकवैजात्यात्" इत्यादि । द्व्यणुकवैजात्यञ्च यद्यपि नोपादानवैजात्याधीनं तदुपादानस्य परमाणोः साधारणत्वात्, तथापि तत्तद्विजातीयकार्य्यजनकतावच्छेदकतया तत्रापि तदनुसन्धेयम् ॥ १६ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां रत्नमञ्जुषाभिधेयस्त्रयोदशः परिच्छेदः ।

मनांसि काव्यपीयानां सुमनांसीव मञ्जुषा ।
दधात्वेषा रत्नमञ्जुरञ्जसा रत्नमञ्जुषा ॥ १८ ॥

इति श्रीचन्द्रकान्ततर्कालङ्कार-प्रणीतायां तत्त्वावलौ
रत्नमञ्जुषानामकस्त्रयोदशः परिच्छेदः ।

44

गुणपरिशेषो नाम
चतुर्दशः परिच्छेदः ।

फलोपायविभेदेन तदिच्छापि द्विधा मता ।
सुखदुःखनिवृत्तीच्छा फलेच्छा फलबुद्धिजा ॥ १ ॥
इष्टसाधनताज्ञानाद् उपायेच्छा प्रजायते ।
प्रवृत्तिहेतुरिच्छा या सा चिकीर्षा तदुद्भवे ॥ २ ॥
इष्टसाधनताबुद्धिः कृतिसाध्यत्वधीस्तथा ।
बलवद्द्विष्टहेतुत्वबुद्ध्यभावश्च कारणम् ॥ ३ ॥
प्रतिकूले भवेत् द्वेषो दुःखं द्वेषे तु कारणम् ।—
तद्धीस्तत्साधनद्वेषे तद्धेतुत्वमतिस्तथा ॥ ४ ॥
बलवत्सुखहेतुत्वबुद्धिस्तत्प्रतिबन्धिका ।

"प्रवृत्तिहेतुरिच्छा या" इति । कृतिसाध्यत्वप्रकारिकेच्छैव चिकीर्षोच्यते। जलताड़नादौ इष्टसाधनत्वाभावान्न चिकीर्षा। समुद्रलङ्घनादौ कृतिसाध्यत्वाभावात्, मधुविषसंपृक्तान्नभोजने च, बलवद्द्विष्टहेतुत्वान्न चिकीर्षा। बलवदिति कथनाच्च न पाकादौ चिकीर्षानुपपत्तिः ॥ २ ॥

नान्तरीयकदुःखेऽतः पाकादौ स न जायते ॥ ५ ॥

प्रयत्नस्त्रिविधः प्रोक्तः प्राक्तनैस्तत्त्ववेदिभिः ।

प्रवृत्त्याख्यो निवृत्त्याख्यस्तथा जीवनकारणम् ॥ ६ ॥

कृतिसाध्यत्वधीरिष्टसाधनत्वमतिस्तथा ।

चिकीर्षा स्यादुपादानाध्यक्षञ्चादिमकारणम् ॥ ७ ॥

निवृत्तिकारणं द्वेषो द्विष्टहेतुत्वधीस्तथा ।

जीवनादृष्टजन्योऽन्यः स निःश्वासादिकारणम् ॥ ८ ॥

गुरुत्वमाद्यपतने कारणं, तदनित्यगम् ।

अनित्यं, नित्यगं नित्यमित्यादि स्वयमूह्यताम् ॥ ९ ॥

सांसिद्धिकादिभेदेन द्रवत्वं द्विविधं मतम् ।

जले सांसिद्धिकं, तच्च नित्यं तत् परमाणुषु ॥ १० ॥

वह्निसंयोगादिजन्यं नैमित्तिकमिति स्मृतम् ।

सुवर्णादिषु तेजःसु घृतादिपृथिवीषु च ॥ ११ ॥

तदेव स्नेहसहितं पिण्डीकरणकारणम् ।

"कृतिसाध्यत्वधीरिष्ट—" इत्यादि । 'आदिमकारणम्' आदिमस्य प्रवृत्त्याख्यप्रयत्नस्य कारणम् ॥ ७ ॥

"गुरुत्वमाद्यपतने" इति । द्वितीयपतनादौ तु वेग एव कारणमिति बोध्यम् ॥ ९ ॥

विज्ञेयं शक्तुकादीनाम् अन्वयव्यतिरेकतः ॥ १२ ॥

नित्ये नित्यस्तदन्यत्रानित्यः स्नेहो गुणो मतः ।
सलिलं स्निग्धमित्येषा प्रतीतिः सार्वलौकिकी ॥ १३ ॥

द्रवत्वमन्तरायेष हिमादौ उपलभ्यते ।
तद्वत्यपि सुवर्णादौ नेति तस्माद् गुणान्तरम् ॥ १४ ॥

संस्कारस्त्रिविधो वेगः स्थितिस्थापक एव च ।
भावनाख्यश्च, तत्रापि वेगो द्विविध इष्यते ॥ १५ ॥

कर्मजो वेगजश्चैव, कर्मजस्तत्र जन्यते ।
शरादौ कर्मणा वेगस्तेन कर्मान्तरं ततः ॥ १६ ॥

यस्तु वेगवता जाते कपालेन घटे पुनः ।
वेग उत्पद्यते सोऽयं वेगजो वेग उच्यते ॥ १७ ॥

या समाकृष्टशाखादेः परित्यागादनन्तरम् ।
पूर्वदेशगतिः सा तु स्थितिस्थापककारिता ॥ १८ ॥

यः संस्कारो भावनाख्यो निश्चयेन स जन्यते ।
उपेक्षानात्मकेनासौ कारणं स्मरणादिषु ॥ १९ ॥

"तदेव स्नेहसहितम्" इति । "अन्वयव्यतिरेकतः" इति, सत्यपि द्रवत्वे द्रुतसुवर्णादिभिः, सत्यपि च स्नेहे हिमकरकादिभिस्तदजननात् स्नेहसहितमेव द्रवत्वं तत्कारणमिति भावः ॥ १२ ॥

अयमन्त्यफलात् कालात् रोगादपि विनश्यति।
समानविषयस्मृत्या विनाशं केचिदूचिरे ॥ २० ॥
सुखस्य कारणं धर्मो जन्यते शुभकर्मभिः।
अन्यथा चिरनष्टेभ्यः कथं तेभ्यः फलोदयः ? ॥ २१ ॥
अधर्मो दुःखहेतुः स्याद् असौ निन्दितकर्मजः।
अदृष्टसंज्ञौ द्वावेतौ विशेषस्तत्र कथ्यते ॥ २२ ॥
सामानाधिकरण्येन धर्मादेः फलहेतुता।
बलवच्छास्त्रसंवादाद् अन्यथात्वमपीष्यताम् ॥ २३ ॥
उपधाभावदोषः स्याद् अदोषोऽनुपधा मतः।

"अयमन्त्यफलात् कालात्" इति। 'अयं' भावनाख्यः संस्कारः। "समानविषयस्मृत्या" इति। तथा च समानविषयस्मृत्या पूर्वसंस्कारनाशः संस्कारान्तरोत्पत्तिश्च जायते इति तेषामाशयः। अतो नाग्रिमस्मृत्यन्तरानुपपत्तिः ॥ २० ॥

"सुखस्य कारणं धर्मः" इत्यादि। "अन्यथा" इति। तथा च यागादेः स्वर्गादिफलजनकत्वस्यागमसिद्धस्यान्यथानुपपत्त्या तावत्कालस्थायी धर्माख्यो व्यापारः कल्प्यते इति भावः ॥ २१ ॥

"सामानाधिकरण्येन" इत्यादि। "बलवच्छास्त्रसंवादात्" इति तथा च सामानाधिकरण्येन फलहेतुत्वमित्युत्सर्गः। तथा च "यन्नाम्ना पातयेत् पिण्डं तन्नयेत् ब्रह्म शाश्वतम्" इत्यादिस्मृतेः, "पितृस्वर्गकामः पुष्करिण्या यजेत" इत्यादिश्रुतेश्च नानुपपत्तिरिति ध्येयम् ॥२३॥

धर्माधर्मनिमित्तत्वमनयोरपि चिन्त्यताम् ॥ २४ ॥

रूप-गन्ध-रसस्पर्शैः शास्त्रोक्तैर्युक्तमुत्तमम् ।
प्रोक्षिताभ्युक्षितं द्रव्यं शुच्यन्यदशुचि स्मृतम् ॥ २५ ॥

स्वतः शुच्यपि वाग्दुष्टं भावदुष्टमथापि वा ।
अशुचि स्यात्, यमस्यापि धर्मोत्पत्तिनिमित्तता ॥ २६ ॥

ये मुनिना सुस्पष्टं स्पष्टमिति न लक्षिता गुणास्तेऽपि ।
अस्मिन् गुणपरिशेषे लक्षिताः समासतोऽस्माभिः ॥ २७ ॥

इति श्रीचन्द्रकान्ततर्कालङ्कार-प्रणीतायां तत्त्वावलौ
गुणपरिशेषो नाम चतुर्दशः परिच्छेदः ।

इदानीमुपधादेरधर्मादिनिमित्तत्वमाह, "उपधाभावदोषः स्यात्" इति । कामक्रोधादयो भावदोषा उपधाशब्देनोच्यन्ते श्रद्धामनःप्रसादादयश्चानुपधाशब्देन । तदेतयोरपि यथासम्भवं धर्माधर्मनिमित्तत्वमित्यर्थः ॥ २४ ॥

शुचि, अशुचि च धर्मादिसहकारिकारणमित्यभिप्रेत्य शुच्यशुचिलक्षणमाह, "रूप-गन्ध-रसस्पर्शैः" इत्यादि ॥ २५ ॥

यमोऽपि धर्मोत्पत्तौ सहकारिकारणमित्याह, "यमस्यापि धर्मोत्पत्तिनिमित्तता" इति ॥ २६ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां
गुणपरिशेषो नाम चतुर्दशः परिच्छेदः ।

कणादहृदयं नाम

पञ्चदशः परिच्छेदः ।

श्रोत्रेण गृह्यते योऽर्थः स शब्दः, स्फोटनामकम् ।—
नास्ति शब्दान्तरं शब्दे कणादस्य मुनेर्मते ॥ १ ॥
अर्थव्यक्तिः पदादेव सङ्केतस्तत्र कारणम् ।
वर्णादन्यः पदात्मा तु न कश्चिदुपलभ्यते ॥ २ ॥
वर्णोऽन्त्यः पूर्ववर्णानां स्मरणेन समन्वितः ।
अर्थबोधसमर्थस्तदनर्था स्फोटकल्पना ॥ ३ ॥

क्रमप्राप्तं शब्दं निरूपयति, "श्रोत्रेण गृह्यते योऽर्थः" इति । शब्दत्वशब्दाभावादेरपि श्रोत्रग्राह्यत्वात् "अर्थः" इति । भावभूतो धर्मी तदर्थः । केचित् शब्देऽपि स्फोटनामकं शब्दान्तरमभ्युपगच्छन्ति । तेषामयमाशयः । वर्णानां प्रत्येकं तावदर्थप्रत्यायकत्वं नास्ति, नापि मिलितानाम्, आशुविनाशिनां क्रमिकाणां तेषां मेलनासम्भवात् । तस्मादर्थप्रत्ययार्थं स्फोटनामा नित्यः शब्दः कल्प्यते । स्फोटस्य चरमवर्णे स्फुटीभवति । तदेकत्वनिबन्धनमेव च बहूनामपि वर्णानाम् एकं पदम् एकं वाक्यमित्येकत्वव्यवहार इति । तदेतन्मतं दूषयति, "स्फोटनामकम्" इति ॥ १ ॥

बहूनामपि वर्णानाम् एकार्थप्रतिपादनम् ।
धर्ममेकमभिप्रेत्य पदमेकमिति प्रथा ॥ ४॥

शब्दो द्रव्यं गुणो वा स्यात् किं वा कर्मान्यदेव वा ।
तदन्येष्वेव शब्दत्व-व्यावृत्तेरुपलम्भनात् ॥ ५ ॥

न द्रव्यमेकद्रव्यत्वात् न कर्माचाक्षुषत्वतः ।
सत्तावत्त्वात् न चाप्यन्यत् परिशेषाद् गुणो भवेत् ॥ ६ ॥

शब्दस्याशुविनाशित्वं साधर्म्यं खलु कर्मभिः ।
अनैकान्तं सुखाद्येषु कथं कर्मत्वसाधकम् ॥ ७ ॥

शब्दे बहुधा विप्रतिपत्तिरस्तीति निर्णयार्थं प्रथमं चातुष्कोटिकं संशयं दर्शयति, "शब्दो द्रव्यं गुणो वा स्यात्" इत्यादि । 'अन्यत्' सामान्यादि । 'तदन्येषु' शब्दभिन्नेषु । यद्यपि शब्दत्वमसाधारणो धर्मः तथापि शब्दत्वप्रतियोगिकी व्यावृत्तिरेव संशयहेतुरिति न दोषः । सा हि समान एव धर्मः ॥ ५ ॥

"न द्रव्यमेकद्रव्यत्वात्" इति । 'एकद्रव्यत्वात्' एकमात्रवृत्तित्वात् । न हि किमपि द्रव्यं तथेति द्रव्यवैधर्म्यान्नायं द्रव्यमिति भावः । 'अचाक्षुषत्वतः' चाक्षुषप्रत्यक्षावृत्तिजातिमत्त्वात् । अत्र रसादिर्दृष्टान्त ऊहनीयः । 'अन्यत्' सामान्यादि ॥ ६ ॥

ननु शब्दः कर्म आशुविनाशित्वात् उत्क्षेपणादिवत् इत्यत्राह, "शब्दस्याशुविनाशित्वम्" इति । "सुखाद्येषु" इति तेषामप्याशुविनाशित्वादिति भावः ॥ ७ ॥

ऊर्द्ध्वमुच्चारणात् प्राग्वा शब्दो नैवोपलभ्यते।
न वा तदानीं तत्सत्त्वे प्रमाणमपि किञ्चन॥ ८॥

धूमेन वह्निवद्वक्त्रा वचनेनानुमीयते।
व्यञ्जकस्य प्रदीपादेर्न व्यङ्ग्येन घटादिना।
अस्य कारणवत्त्वात् तु जन्यत्वमनुमीयते॥ ९॥

भेरीदण्डाभिघातस्य तीव्रमन्दादिभावतः।
शब्देऽपि तेन रूपेण विकार उपलभ्यते॥ १०॥

न चायं वायुधर्मस्तद्धर्माणां श्रोत्रयोग्यता।—
नास्ति, नादोऽपि निर्वक्तुम् अशक्यस्तद्विलक्षणः॥ ११॥

मीमांसकास्तु नित्य एव शब्दो न तु जन्यः अभिघातादयस्तु व्यञ्जका एवेति नित्यस्यापि व्यञ्जकाभावकालेऽनुपलम्भ इत्याहुः। तदेतन्मतं दूषयति, "ऊर्द्ध्वमुच्चारणात् प्राग्वा" इति। ननु व्यञ्जकाभावकृत एवानुपलम्भः इत्याशङ्क्याह, "न वा" इति॥ ८॥

किञ्च "धूमेन वह्निवद्वक्त्रा" इति। एतच्च पटाद्यावृतेषु शुकशारिका-योषिदादिषु स्फुटतरम्॥ ९॥

शब्दस्य कारणवत्त्वमसिद्धमित्याशङ्क्याह, "भेरीदण्डाभिघातस्य" इति। न ह्यभिव्यञ्जकतीव्रत्वादिभिरभिव्यङ्ग्य-तीव्रत्वादिसम्भव इति भावः। तथा चैतदनुपपत्त्या शब्दस्य भेरीदण्डाभिघातादिकारणवत्त्वमवश्यमभ्युपेयमित्यभिप्रायः॥ १०॥

वायुधर्म एव तीव्रमन्दत्वादिरित्यत्राह, "न चायं वायुधर्मः"

औपाधिकत्वमेतस्य तरुणी कुङ्कुमारुणा ।
इत्यादिष्विव नो साक्षात् ज्ञातोपाधिनिबन्धनम् ॥ १२ ॥
औपपत्तिकताप्यस्य तरां दूरपराहता ।
उपपत्तेः प्रमाणस्य कस्याप्यनुपलम्भनात् ॥ १३ ॥
अभिव्यक्तौ च यत्किञ्चिद्वर्णाभिव्यक्तिकारणे ।
युगपत् सर्ववर्णानाम् अभिव्यक्तिः प्रसज्यते ॥ १४ ॥
समानदेशा ये सर्वे समानेन्द्रियगोचराः ।
सर्वत्रैकव्यञ्जकेन, तेषां व्यङ्ग्यत्वमिष्यते ॥ १५ ॥

इति। नापि नादधर्म इत्याह, "नादोऽपि" इति। 'तद्विलक्षणः' वायुविलक्षणः ॥ ११ ॥

ननु तीव्रमन्दत्वादिरौपाधिक एवास्तु इत्यत्राह, "औपाधिकत्वमेतस्य" इति। 'एतस्य' तीव्रमन्दादिभावस्य ॥ १२ ॥

"औपपत्तिकताप्यस्य" इति। 'अस्य' औपाधिकत्वस्य ॥ १३ ॥

ननु यदि वर्णानामेकं व्यञ्जकं स्यात्, स्यादपि एकवर्णाभिव्यक्तिदशायां सर्ववर्णाभिव्यक्तिप्रसङ्गः, न त्वेवं, किन्तु प्रत्येकमेव वर्णाः प्रतिनियतव्यञ्जकव्यङ्ग्या इति नोक्तदोष इत्यत्राह, "समानदेशा ये सर्वे" इति। समानदेशानां सामानेन्द्रियग्राह्यानामेकव्यञ्जकव्यङ्ग्यत्वं नियमः इत्यर्थः। अन्यथा आलोकसंयोगे घटादिगतसङ्ख्यापरिमाणादयो न गृह्येरन्, तत्रापि व्यञ्जकभेदप्रसङ्गादिति भावः।

यावान् देशोऽस्ति सत्त्वस्य ब्राह्मणत्वनरत्वयोः ।
न तावानेव देशोऽस्तस्तेषां न समदेशता ॥ १६ ॥
भेरीदण्डादिसंयोगात् विभागादपि कुत्रचित् ।
शब्दाच्च शब्दनिष्पत्तिर्लिङ्गाच्चानित्य एव सः ॥ १७ ॥
दूरे यत्र च वीणादौ उत्पन्नः शब्द आदितः ।
सन्तानक्रमतस्तत्र जायमानस्ततः परम् ॥ १८ ॥
श्रोत्रमासादयन् शब्दो गृह्यते न तु दूरजः ।
अन्यथा दूरजाः शब्दा गृह्येरन् अविशेषतः ॥ १९ ॥
प्रवृत्तिविरहापत्तेः पाठे चावृत्तिदर्शनात् ।

समानदेशानाम् इत्यनेन घटपटरूपादीनां व्यवच्छेदः । समानेन्द्रिय-ग्राह्याणाम् इत्यनेन रूप-रसादीनां व्यवच्छेदः ॥ १५ ॥

ननु समानदेशानामपि सत्त्वब्राह्मणत्वनरत्वानां कथं व्यञ्जक-भेद इत्याशङ्क्य तत्र समानदेशत्वमेव नास्तीत्याह, "यावान् देशो-ऽस्ति सत्त्वस्य" इत्यादि ॥ १६ ॥

"भेरीदण्डादिसंयोगात्" इत्यादि । विभागस्य शब्दहेतुत्वम् ऋजुनिर्मलायां समर्थितम् । शब्दात् शब्दनिष्पत्तिर्वक्ष्यते । "लिङ्गात्" इति । अयं प्रयोगः, वर्णात्मकः शब्दोऽनित्यः जातिमत्त्वे सति श्रोत्रग्राह्यत्वात् मृदङ्गादिध्वनिवत् । शब्दत्वादौ व्यभिचारवारणाय सत्यन्तम् ॥ १७ ॥

शब्दात् शब्दनिष्पत्तिं दर्शयति, "दूरे यत्र च वीणादौ" इति ॥ १८ ॥

प्रत्यभिज्ञाप्रभावाच्च शब्दानां नित्यतेष्यताम् ॥ २१ ॥

नृत्यादीनां बहुत्वेऽपि प्रवृत्त्यावृत्तिदर्शनात् ।

प्रत्यभिज्ञोपलम्भाच्च हेतवो व्यभिचारिणः ॥ २२ ॥

मीमांसकः शङ्कते, "प्रवृत्तिविरहापत्तेः पाठे च" इति । 'पाठे च' इति चकारात् पाठनायाश्चेति बोध्यम् । अयमर्थः, गुरोर्वेदस्याध्यापनं, शिष्याणाञ्चाध्ययनं विहितम् । अध्यापनञ्च दानमेव, अध्ययनमपि ग्रहणमेव, वेदस्य दानं ग्रहणञ्च तदा स्यात्, यदि शब्दानां नित्यत्वं स्यात् आशुविनाशित्वे च तद्द्वयमपि न सम्भवतीत्यध्ययनेऽध्यापने च प्रवृत्तिर्न स्यादित्यर्थः । तदनुरोधेन तावत्कालपर्य्यन्तं स्थायित्वाभ्युपगमे तु, तदुत्तरमपि नाशकाभावात् स्थायित्वमेवेति नित्यत्वमेव पर्य्यवस्यति, "तावत्कालस्थिरञ्चैनं कः पश्चान्नाशयिष्यति" इति न्यायात् इत्यभिप्रायः । "आवृत्तिदर्शनात्" इति । "त्रिः प्रथमामन्वाह त्रिरुत्तमाम्" इति त्रिर्वचनं स्थैर्य्यं विनाऽनुपपन्नम् । एवं दशकृत्वोऽधीतोऽनुवाक इत्यादि ज्ञेयम् । "प्रत्यभिज्ञाप्रभावाच्च" इति । 'य एव वेदो देवदत्तेनाधीतः स एव मैत्रेणापि' 'स एव श्लोकः पठ्यते' 'स एवायं मकारः' इत्यादिका प्रत्यभिज्ञा ॥ २१ ॥

मीमांसकमतं दूषयति, "नृत्यादीनां बहुत्वेऽपि" इत्यादि । 'बहुत्वेऽपि' नानात्वेऽपि, अस्थैर्य्येऽपीत्येतत् । तथा हि नृत्यमधीते, द्विर्नृत्यति, यदेव नृत्यं चैत्रेण कृतं तदेव मैत्रोऽपि करोति इति । नृत्यञ्चाङ्गक्रियाविशेष इति तदस्थैर्य्यमुभयवादिसिद्धमिति भावः ॥२२॥

पञ्चमूर्त्तादिवत् सञ्ज्ञासामान्यादुपपद्यते ।
कोलाहलो निवृत्तः को नास्तीत्यादिप्रतीतितः ।
प्रत्यभिज्ञापि साजात्यम् अवलम्ब्य भविष्यति ॥ २३ ॥
परपक्षाधरीकार-मूर्त्तिमत् कीर्तनोचितम् ।
कणादहृदयं धीरा हृदये धारयन्त्विदम् ॥ २४ ॥

इति श्रीचन्द्रकान्ततर्कालङ्कार-प्रणीतायां तत्त्वावलौ
कणादहृदयं नाम पञ्चदशः परिच्छेदः ।

ककारादीनामानन्त्ये पञ्चाशद्वर्णा इति पञ्चाशत्त्वादिका सञ्ज्ञा कथमुपपद्यते इत्यत्राह, "पञ्चमूर्त्तादिवत् सञ्ज्ञा" इति ॥ २३ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां
कणादहृदयं नाम पञ्चदशः परिच्छेदः ।

लघुविमला नाम

षोड़शः परिच्छेदः ।

एकद्रव्यं निर्गुणञ्च यत् संयोगविभागयोः ।
अनपेक्षनिमित्तं तत् कर्मैतत् कर्मलक्षणम् ॥ १ ॥
ऊर्द्धसंयोगफलकं कर्मोत्क्षेपणमुच्यते ।
विपरीतमवक्षेपस्तद्द्वयं मुषलादिषु ॥ २ ॥

कर्मलक्षणमाह, "एकद्रव्यं निर्गुणञ्च" इति । एकं द्रव्यमाश्रयत्वेनास्त्यस्य, तदेकद्रव्यम्, अनेकानाश्रितमित्येतत् । तथा चानेकाश्रितावृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं तदर्थः । संयोगत्वादिकं, नानेकाश्रितावृत्ति । शब्दत्वादेस्तथात्वेऽपि न सत्तासाक्षाद्व्याप्यत्वम् । निर्गुणमिति निर्गुणवृत्तिगुणावृत्तिजातिमत्त्वस्य लक्षणत्वे तात्पर्य्यम् । "यत् संयोगविभागयोः" इत्यादि । अत्र च मिलितयोः संयोगविभागयोर्निरपेक्षकारणत्वं लक्षणम् । संयोगविभागयोः प्रत्येकमेव संयोगविभागकारणत्वं न मिलितयोः । धर्माधर्मादीनां न निरपेक्षमिति नातिव्याप्तिः । निरपेक्षत्वञ्च स्वोत्पत्त्यनन्तरोत्पत्तिकभावानपेक्षत्वम् । तेन कर्मणोऽप्युत्तरसंयोगजनने समवायिद्रव्यकालादृष्टाद्यपेक्षत्वेऽपि पूर्वसंयोगनाशापेक्षत्वेऽपि च नासम्भव इति ध्येयम् ॥ १ ॥

सत्यारम्भकसंयोगेऽप्यन्यसंयोगकारणम् ।
अङ्गकौटिल्यजनकं कर्माकुञ्चनमुच्यते ॥ ३ ॥
एवमाकुञ्चिताङ्गानां यत्कर्मोत्पद्यते पुनः ।
अनारम्भकसंयोगनाशकं तत्प्रसारणम् ॥ ४ ॥
एतच्चतुष्टयान्यत् तु यत्किञ्चित् कर्म जायते ।
तत्सर्वं गमनं प्राज्ञैर्भ्रमणाद्येवमूह्यताम् ॥ ५ ॥
आत्मसंयोगयत्नाभ्यां हस्तोत्क्षेपणमादितः ।
उत्क्षेपणवता योगात् हस्तेन मुषलेऽपि तत् ॥ ६ ॥
उत्क्षेपणप्रयत्नस्तु तदिच्छातः प्रजायते ॥ ७ ॥
उदूखलाभिघातेन मुषलोत्पतनन्तु यत् ।

हस्तमुषलाद्युत्क्षेपणकारणमाह, "आत्मसंयोगयत्नाभ्याम्" इति। आत्मनः संयोगप्रयत्नाभ्यां प्रथमतो हस्तकर्म भवतीत्यर्थः। तथा च हस्तः समवायिकारणं, प्रयत्नवदात्मसंयोगोऽसमवायिकारणं, प्रयत्नस्त निमित्तकारणम्। "उत्क्षेपणवता" इति। तथा च मुषलोत्क्षेपणे मुषलं समवायिकारणं, प्रयत्नवदात्मसंयुक्तोत्क्षेपणवद् हस्तसंयोगोऽसमवायिकारणं, प्रयत्नहस्तोत्क्षेपणादिकं निमित्तकारणम्। इत्यादिकमुन्नेयम् ॥ ६ ॥

"उत्क्षेपणप्रयत्नस्तु" इति। 'तदिच्छातः' उत्क्षेपणेच्छातः। मुषलमुत्क्षिपामि, हस्तमुत्क्षिपामीत्यादिकेच्छाप्रयत्नजनिकेत्यर्थः ॥ ७ ॥

न तत्र हस्तसंयोगः कारणं व्यभिचारतः ॥ ८ ॥
अन्तरा करसंयोगम् अकस्मादुत्पतत्यदः ।
सुदृढे सति संयोगे न भवत्येव तत् पुनः ॥ ९ ॥
मुषलेनान्वितस्यापि हस्तस्योत्पतनं प्रति ।
यत्नान्वितात्मसंयोग-स्तस्मादेव न कारणम् ॥ १० ॥
उदूखलाभिघातेन वेगः स्यात् मुषलादिषु ।
तेन वेगवता योगाद् हस्तेऽप्युत्पतनं मतम् ॥ ११ ॥
अवशो हि तदा हस्तस्तेनोत्पतति सत्वरम् ।
मुषलेन सहामुष्य मुखदेशस्थलोहवत् ॥ १२ ॥
नोदनादभिघाताद्वा पृथिव्यां कर्म जायते ।

"उदूखलाभिघातेन" इत्यादि । 'हस्तसंयोगः' इत्युपलक्षणं, प्रयत्नोऽपि न कारणमिति बोध्यम् ॥ ८ ॥

व्यभिचारमेव स्पष्टयति, "अन्तरा करसंयोगम्" इति । 'अदः' मुषलम् । 'तत्' उत्पतनम् । तथा च प्रयत्नवदात्मसंयोगस्तत्र प्रतिबन्धक एवेति ध्येयम् ॥ ९ ॥

कुतस्तर्हि तत्रोत्पतनमित्यत्राह, "उदूखलाभिघातेन" इति । 'तेन' मुषलादिना ॥ ११ ॥

"अवशो हि तदा हस्तः" इत्यादि । 'तेन' वेगवता, मुषलेनेति संबन्धः । 'अमुष्य' मुषलस्य ॥ १२ ॥

तथा संयुक्तसंयोगाद् इत्याद्यूह्यं मनीषिभिः ॥ १३ ॥
कर्म यन्मनसः स्वेष्टविषयग्राहिणीन्द्रिये ।
सन्निकर्षार्थमेतच्च व्याख्यातं हस्तकर्मणा ॥ १४ ॥
संयोगः कारणं तत्र तद्वद् यत्नवतात्मना ।
साक्षात् प्रयत्नविषयो न मनो यद्यपीन्द्रियम् ॥ १५ ॥
तथापि तद्वहा नाड़ी स्यात् प्रयत्नस्य गोचरः ।
नाड़ी त्वगिन्द्रियग्राह्या मन्तव्या भुक्तमन्यथा ।
पीताद्यभ्यवहारोऽपि प्राणिनां नोपपद्यते ॥ १६ ॥
यातु प्राणवहा नाड़ी परं तद्गोचरेण हि ।

"नोदनादभिघाताद्वा" इति । 'नोदनात्' यथा वंशादौ वह्नि-नोदनात् कर्म । तथा तत्रैव कुठाराभिघातात् । रथादौ तु चल-दश्वादिसंयुक्तरज्जुसंयोगात् कर्म ॥ १३ ॥

"कर्म यन्मनसः स्वेष्ट—" इति । यथा प्रयत्नवदात्मसंयोगात् हस्ते कर्म, तथा स्वाभिमतविषयग्राहिणि इन्द्रिये सन्निकर्षार्थं मनः-कर्मापि प्रयत्नवदात्मसंयोगाज्जायते ॥ १४ ॥

एतदेव स्फुटयति, "संयोगः कारणं तत्र" इति । 'तत्र' मनः-कर्मणि । 'तद्वत्' हस्तकर्मवत् । "साक्षात् प्रयत्नविषयः" इति । इन्द्रियस्य मनसोऽतीन्द्रियत्वादिति भावः ॥ १५ ॥

ननु मनोवहा नाड्यपि अतीन्द्रियैव इत्याशङ्क्याह, "नाड़ी त्वगि-न्द्रियग्राह्या" इति ॥ १६ ॥

प्रयत्नेनास्य निष्पत्तिरित्याहुस्तत्त्ववेदिनः ॥ १७ ॥
अर्थानामिन्द्रियैरात्मेन्द्रियैश्च मनसस्तथा ।
संयोगात् सुखदुःखादि न चासौ कर्मणा विना ॥ १८ ॥
इच्छाविशेषविरहादपि कर्म प्रजायते ।
मुषलोत्क्षेपणे हस्तोत्क्षेपणं तन्निदर्शनम् ॥ १९ ॥
क्रोड़स्थदारकस्यापि क्रीड़ार्थं परिचालनम् ।
परितश्चरणादीनाम् एतादृशमुदाहृतम् ॥ २० ॥
दग्धस्य गृहादेहादेर्यद्विष्फोटनमीच्यते ।
तद्वह्निनोदनादेव यत्नस्तत्र न कारणम् ॥ २१ ॥

कथं नोपपद्यते ? इत्यत्राह, "यातु प्राणवहा नाड़ी" इति । तथा च नाड्या अतीन्द्रियत्वे तद्गोचरप्रयत्नासम्भवान्नाभ्यवहारः स्यादिति भावः ॥ १७ ॥

ननु मनःकर्मणि किं प्रमाणम् ? इत्यत्राह, "अर्थानामिन्द्रियैः" इति । विषयाणामिन्द्रियसंयोगः, मनसश्चेन्द्रियैरात्मना च संयोगः, सुखदुःखादिकारणम् । न च क्रियामन्तरेण इन्द्रियैः सह मनसो योगः सम्भवति । चित्ततत्त्वे हि तस्याणुत्वं समर्थितम् ॥ १८ ॥

"इच्छाविशेषविरहात्" इति । मुषलमुत्क्षिपामीति इच्छा मुषलोत्क्षेपण एव कारणं न हस्तोत्क्षेपणे इति भावः ॥ १९ ॥

"दग्धस्य गृहदेहादेः" इति । 'विष्फोटनं' तदवयवानां तिर्य्यगूर्द्ध्वञ्च गमनम् ॥ २१ ॥

यत्नाभावे प्रसुप्तस्य चरणाद्यङ्गचालनम्।
तृणगुल्मादिकर्मापि वायुसंयोगतस्तथा ॥ २२ ॥
संयोगादिप्रतिद्वन्द्वि विरहे तु गुरुत्वतः।
पतनं जायते तत्र यत्नाभावेऽपि वस्तुनः ॥ २३ ॥
संयोगः फलपत्रादौ प्रयत्नः पतगादिषु।
प्रक्षिप्ते शरकाण्डादौ संस्कारः प्रतिबन्धकः ॥ २४ ॥
विधारकप्रयत्नेन संयोगादीश्वरेण तु।
क्षित्याद्यपतनं पक्षिदन्तलग्नतृणादिवत् ॥ २५ ॥
कयाचिदीशशक्त्यैव क्षितिः शून्येऽवतिष्ठताम्।
सोऽचिन्त्यशक्तिः किं तत्र न शक्तो यत्नमन्तरा ? ॥ २६ ॥
शक्तः, किन्त्वेष एवास्य स्वभावो जगदीशितुः।

यद्यपि फलादीनामपि गुरुत्वमस्तीति पतनं प्रसज्यते, तथापि प्रतिबन्धकसद्भावान्नैवमित्याह, "संयोगः फलपत्रादौ" इति। 'संस्कारः' वेगः ॥ २४ ॥

"विधारकप्रयत्नेन" इत्यादि। अत्रायं प्रयोगः। क्षित्यादिकं पतनप्रतिबन्धकप्रयत्नवदधिष्ठितं धृतिमत्त्वात् वियति विहङ्गमधृततृणादिवत्। धृतिश्च गुरुत्ववतां पतनाभावः ॥ २५ ॥

अत्र शङ्कते, "कयाचिदीशशक्त्यैव" इति ॥ २६ ॥

करोति नियमं किञ्चिद् अतिक्रम्य न लौकिकम् ॥ २७ ॥
लौकिकेष्वपि कार्य्येषु हेतुभिर्गतमन्यथा ।
ईशः कुर्य्यात् स्वशक्त्यैव तत्सर्वं सर्वशक्तिमान् ॥ २८ ॥
नियमं तत्कृतं कुर्य्यात् स एव कथमन्यथा ? ।
इति चेत् प्रकृतेऽप्येतत् समानमिति चिन्त्यताम् ॥ २९ ॥
गुरुत्वं पतने हेतुरीश्वरेच्छात्र कारणम् ।
कथं गुरुतरा पृथ्वी न पतेद् यत्नमन्तरा ? ॥ ३० ॥
गुरूणां विहगादीनां गगने चरतां पुनः ।
यत्नेन पतनाभावो विस्पष्टमुपलभ्यते ॥ ३१ ॥
लौकिकानां हितायैव तद्विधिं करुणानिधिः ।
नातिक्रामति, तेनैव स लोकैरवगम्यते ॥ ३२ ॥

ईश्वरस्य तादृशसामर्थ्यमनुजानाति, "शक्तः" इति । तथापि प्रकृते यत्नस्यावश्यकत्वमाह, "किन्तु" इति ॥ २७ ॥

ईश्वरो लौकिकं नियमं नातिक्रामतीत्येतदेवाह, "लौकिकेष्वपि कार्य्येषु" इति ॥ २८ ॥

ननु घटादिकं प्रति मृदादेर्बीजादिकं प्रत्यङ्कुरादेश्च कारणत्वमित्यपीश्वरकृत एव नियम इति स एव कथंकारमन्यथयतु तमित्येतदेव शङ्कते, "नियमं तत्कृतं कुर्य्यात्" इति ॥ २९ ॥

साम्यं स्फुटयति, "गुरुत्वं पतने हेतुः" इति ॥ ३० ॥

"लौकिकानां हितायैव" इत्यादि । 'तद्विधिं' लौकिकविधिम् ॥ ३२ ॥

लोकरीत्यनुसारार्थम् अतएव महेशितुः ।
तदर्थमागमेऽप्युक्ता नागकूर्मगजाकृतिः ॥ ३३ ॥
जलक्लिन्ना भवेत् पृथ्वी केवलं कूर्मपृष्ठगा ।
इति सर्पशरीरोऽसौ बभूव परमेश्वरः ॥ ३४ ॥
विषवानुरगः कोऽपि भासमानश्चिरं जले ।
न दृश्यते, तदाधारः कूर्मरूपस्ततः प्रभुः ॥ ३५ ॥

"लोकरीत्यनुसारार्थम्" इत्यादि । 'तदर्थं' क्षित्यादिधारणार्थम् । अत्रायमाशयः, वस्तुगत्या निराकार एवेश्वरः । तस्मिंश्च ज्ञानेच्छादीनां जन्यत्वं न सम्भवति जन्यज्ञानादीनां शरीरावच्छेद्यत्वनियमादीश्वरस्य च शरीराभावादिति तस्य नित्यज्ञानादिमत्त्वमेवाभ्युपेयते । विधारकप्रयत्नस्तु न नित्यः सम्भवति प्रलयाद्यवच्छेदे तदभावात्, तथा च तादृशजन्यप्रयत्नस्यावच्छेदकतया शरीराभ्युपगमोऽप्यावश्यक इत्यागमे तदीय-शरीरग्रहणमुक्तम् । इत्थमेव तत्त्वादिशरीराणामप्यभ्युपगमः । तच्छरीरपरिग्रहे तु प्राणिकर्मवैचित्र्यं हेतुः । अदृष्टवदात्मसंयोगादेव च तन्निष्पत्तिरिति न तत्र शरीरापेक्षा । अणूनामाद्यकर्मवत् । दृश्यते च शरीरान्तरमन्तरेणैव शरीरक्रियादिकम् । शरीरान्वयव्यतिरेकानुविधायिनि तु कार्ये ईश्वरस्यापि शरीरवत्त्वमित्यन्यत्र विस्तरः ॥ ३३ ॥

शरीरत्रितयाभ्युपगममुपपादयति, "जलक्लिन्ना भवेत् पृथ्वी" इत्यादि ॥ ३४ ॥

नमनोन्नमनं पृथ्व्यास्तावतापि प्रसज्यते ।
इति स्तम्बेरमास्तस्याः स्तम्भप्राया व्यवस्थिताः ॥ ३६ ॥
तत्र त्वेकान्ततो नास्ति लोकसिद्धिविरुद्धता ।
लोकैरप्युपलभ्यन्ते वङ्कलं जलकुञ्जराः ॥ ३७ ॥
लोष्टादेस्तिर्य्यगूर्द्धं वा गमनं यत् समीक्ष्यते ।
तन्नोदनविशेषात् स्यात् स प्रयत्नविशेषतः ॥ ३८ ॥
पततः फलदेहादेर्यत्नो यदि न विद्यते ।
कुत एव भवेदूर्द्धं गमनं तिर्य्यगेव वा ॥ ३९ ॥
शरादौ कालभेदेन कर्मनानात्वहेतवः ।
तत्संयोगविशेषाः स्युरन्यथा तदसम्भवः ॥ ४० ॥

ननु गुरुत्वं न पतनहेतुः गुरुत्ववतामपि लोष्टादीनामूर्द्ध्वगमनादिदर्शनादित्याशङ्क्याह, "लोष्टादेस्तिर्य्यगूर्द्ध्वं वा" इति । "प्रयत्नविशेषतः" इति । प्रयत्नविशेषश्च तिर्य्यक् क्षिपामि, ऊर्द्ध्वं क्षिपामि इत्यादीच्छाजनितः ॥ ३८ ॥

यत्र च यत्नाद्यभावस्तत्र गुरुत्वात् पतनमेव इत्याह, "पततः फलदेहादेः" इति ॥ ३९ ॥

विक्षिप्तशरादौ पतनपर्य्यन्तं कर्मणो नैकत्वम्, अपि तु नानात्वमित्याह, "शरादौ कालभेदेन" इति । तथा च कालभेदेन जायमानाः 'तत्संयोगविशेषाः' स्वजन्योत्तरसंयोगाः, कर्मनानात्व-

स्वजन्योत्तरसंयोगो नाशकः खलु कर्मणः।
नो चेत्? कालान्तरे कर्मविनाशोऽपि न सम्भवेत्॥ ४१॥
न चोपलभ्यते क्वापि कर्म किञ्चित् ततः परम्।
तस्मात् तत्प्राक्तनं नैव शरादावनुवर्त्तते॥ ४२॥
शिञ्जिन्या नोदनादाद्यम् इषोः कर्म, तदुद्भवात्।
एकस्मादेव संस्कारादुत्तरा कर्मसन्ततिः॥ ४३॥
कर्मवद्वेगनानात्वे प्रमाणं नास्ति किञ्चन।
तस्मात् न्यायनये व्यर्था वेगसन्तानकल्पना॥ ४४॥

साधका इत्यर्थः। 'अन्यथा' कर्मनानात्वाभावे। 'तदसम्भवः' तावत्कार्णं कर्मासम्भवः॥ ४०॥

कुत एवम्? इत्यत्राह, "स्वजन्योत्तरसंयोगः" इति। 'नो-चेत्' स्वजन्योत्तरसंयोगस्य कर्मनाशकत्वाभावे॥ ४१॥

"न चोपलभ्यते क्वापि" इति। दृश्यते हि गच्छतामपि शरादीनां कुड्यादिसंयोगादनुपदमेव कर्मोपरम इति भावः। उपसंहरति, "तस्मात्" इति। 'तत्' कर्म॥ ४२॥

कुतस्तर्हि शरादौ कर्मान्तरोत्पत्तिः? इत्यत्राह, "शिञ्जिन्या नोदनादाद्यम्" इति। "शिञ्जिन्या" मौर्व्याः। "मौर्वी ज्या शिञ्जिनी गुणः इत्यमरः। 'तदुद्भवात्' तत्कर्मजनितात्। तथा च प्राथमिके कर्मणि नोदनं, द्वितीयादौ तु वेग एवासमवायिकारणमिति भावः॥ ४३॥

नष्टे कालेन संस्कारे क्वचिद् वस्त्वन्तरेण वा ।
गुरुत्वात् पतनं, तर्हि न किञ्चित् प्रतिबन्धकम् ॥ ४५ ॥
प्रतिबन्धकसंयोगाभावेऽपां पतनं भवेत् ।
गुरुत्वादेव, तस्माच्च चितौ शक्तिर्निरर्थिका ॥ ४६ ॥
ऊर्द्ध्वं वापो न गच्छेयुरधो वा नेयुरन्यथा ।
अधोगतिर्गुरुत्वाच्चेत्, कृतं तत्कल्पनेन ते ॥ ४७ ॥
चितौ निपतितानान्तु विन्दूनां स्यन्दनं पुनः ।
द्रवत्वात्, वायुनुन्नास्तु ग्रीष्मे सूर्य्यस्य रश्मयः ।
भूमिष्ठानामपामूर्द्ध्वगमने कारणं परम् ॥ ४८ ॥

"प्रतिबन्धकसंयोगाभावे" इत्यादि । 'शक्तिः' आकर्षण-शक्तिः ॥ ४६ ॥

"ऊर्द्ध्वं वापो न गच्छेयुः" इति । 'अन्यथा' चितावाकर्षण-शक्तिस्वीकारे । अयमर्थः, सूर्य्यरश्मिसंयोगादपामूर्द्ध्वगमनमित्यनुपद-मेव वक्ष्यते । चितावाकर्षणशक्त्यभ्युपगमे तु चित्याकृष्टानामपां सूर्य्यरश्मिसंयोगेऽप्यूर्द्ध्वगमनं न सम्भवति । यदि च चित्यपेक्षया रश्मीनामाकर्षकत्वमधिकमित्युच्यते, तदापि रश्म्याकृष्टानामपां चि-त्याकर्षणेनापि पतनं न सम्भवति । अथ पतनहेतुकं गुरुत्वमभ्यु-पेयते, तर्हि तेनैव निर्वाहादलमाकर्षणशक्त्यभ्युपगमेनेति विभाव-नीयम् ॥ ४७ ॥

"चितौ" इत्यादि । 'स्यन्दनं' सम्भूय स्रोतोरूपेण प्रसरणम् ।

वेगवद्वायुसंयोगो रश्मिष्वादौ प्रजायते।
ततः संयुक्तसंयोगाद् अपामूर्द्ध्व-गतिर्भवेत्॥ ४९॥
वेगवद्वायुना नुन्नाः केवलं वह्निरश्मयः।
स्थालीस्थिताः कथ्यमाना ऊर्द्ध्वमारोहयन्त्यपः॥ ५०॥

अयस्कान्ताभिमुख्येन लोहानां गमनन्तु यत्।
यत्किञ्चिदेवमन्यच्च तत्कर्मादृष्टकारितम्॥ ५१॥
कम्पादिकं क्षितेः कर्म केवलादृष्टजं विदुः।
वृक्षमूले निषिक्तानामपां यदभिसर्पणम्।
वृक्षाभ्यन्तरतोऽदृष्टकारितं तदपि स्मृतम्॥ ५२॥

इदानीं मेघसम्पादकमपामूर्द्ध्वगमनमाह, "वायुनुन्नास्तु" इति॥४८॥

तदेव विशदयति, "वेगवद्वायुसंयोगः" इति। तथा च रश्मीनामूर्द्ध्वगमने वेगवद्वायुसंयोगोऽसमवायिकारणम्, अपामूर्द्ध्वगमने तु वेगवद्वायुसंयुक्तरश्मिसंयोगस्तथेति भावः॥ ४९॥

अत्र दृष्टान्तमाह, "वेगवद्वायुना नुन्नाः" इति॥ ५०॥

इदानीमदृष्टकारणकानि कर्माणि विशेषतो दर्शयति, "अयस्कान्ताभिमुख्येन" इति। 'यत्किञ्चिदेवमन्यत्' इति तृणकान्ताभिमुख्येन तृणगमनमित्यर्थः॥ ५१॥

"वृक्षमूले निषिक्तानाम्" इत्यादि। 'अभिसर्पणम्' अभितः सर्पणम्, ऊर्द्ध्वं तिर्य्यक् च गमनमित्येतत्। एतच्च 'वृक्षाभ्यन्तरतः' इत्यनेनान्वेति॥ ५२॥

अपां संयोगतस्तासां स्तनयित्नोर्विभागतः ।
विस्फूर्जथुरपामेव कर्म तत्रापि कारणम् ॥ ५३ ॥
तदप्येतादृशं विद्यादणूनामाद्यकर्म च ।
दिग्दाहे तेजसः कर्म वायोर्वृक्षादिचालने ।
अग्नेस्तथोर्द्ध्वज्वलनं तिर्य्यग्गमनमेव च ।—
वायोरादिममित्येतत् भवेत् सर्वमदृष्टतः ॥ ५४ ॥
अनाद्यानामथैतेषां विज्ञेया वेगजन्यता ।
दृष्टे हि कारणे युक्ता नादृष्टपरिकल्पना ॥ ५५ ॥
प्राणादेरुत्क्रमे देहादन्यत्रापि प्रवेशने ।
पीताशिताद्यप्राणानां तत्संयोगप्रयोजके ॥ ५६ ॥

"अपां संयोगतस्तासाम्" इति । 'अपां' 'संयोगतः' वाय्वभिघाततः, इत्यर्थः । 'तासाम्' अपाम् । 'स्तनयित्नोः' मेघात् । 'तत्रापि' विस्फूर्जथुजनकसंयोगविभागयोरपि ॥ ५३ ॥

"तदप्येतादृशं विद्यात्" इत्यादि । 'तदपि' दर्शितस्थलीयजलकर्मापि । 'एतादृशम्' अदृष्टकारितम् । 'आद्यकर्म' सर्गाद्यकालीनं कर्म । "तेजसः कर्मः" इति । अत्रापि "आदिमम्" इति पराचीनस्य सम्बन्धो बोध्यव्यः । एवमग्रेऽपि ॥ ५४ ॥

"अनाद्यानामथैतेषाम्" इति । 'एतेषां' ज्वलनपवनकर्मणाम् ॥ ५५ ॥

"प्राणादेरुत्क्रमे देहात्" इत्यादि । आदिपदं मनःपरम् । उत्-

तथा धातुमलादीनां कर्मण्यपि विशेषतः।
अदृष्टं कारणं प्राज्ञैश्चिन्त्यमन्यन्मनीषिभिः ॥ ५७ ॥
कर्मणस्तादृशात् यस्य सुखमुत्पद्यते क्वचित्।
दुःखं वा तददृष्टस्य तत्र कारणतेष्यताम् ॥ ५८ ॥
कर्म दृष्टफलं किञ्चित् किञ्चिचादृष्टसाधनम्।
यत्र दृष्टफलाभावस्तत्रादृष्टं फलं विदुः ॥ ५९ ॥
किञ्चित् शीघ्रफलं दृष्टफलेष्वभ्यवहारवत्।
कालान्तरफलं कर्म यत्किञ्चित् कर्षणादिवत् ॥ ६० ॥
किञ्चित् शीघ्रफलं कर्मादृष्टार्थेष्वपि दृश्यते।
कारीर्य्यादि, विलम्बेन यागादिफलसाधनम् ॥ ६१ ॥

क्रमश्च मरणावस्थायां बोद्धव्यः। 'अन्यत्र' देहान्तरे। "पीताशित—" इत्यादि। पीतस्य, अशितस्य, 'अक्षाणि' इन्द्रियाणि च, प्राणाश्च, तेषाम्। 'तत्' इति देहपरामर्शः। तथा च पीताशितादीनां देह-संयोगप्रयोजके, कर्मणीति शेषः ॥ ५६ ॥

अन्यथापि कर्म विभजते, "कर्म दृष्टफलं किञ्चित्" इति। 'दृष्ट-फलं' दृष्टं प्रत्यक्षं फलं यस्य, तादृशम्। अदृष्टस्य अप्रत्यक्षस्य स्वर्गादेः साधनमित्यर्थः ॥ ५९ ॥

दृष्टफलककर्मणामपि द्वैविध्यमाह, "किञ्चित् शीघ्रफलम्—" इत्यादि ॥ ६० ॥

तददृष्टफलानामपि तथात्वमाह, "किञ्चित् शीघ्रफलम्" इति ॥६१॥

पाकादेः कर्षणादेर्वा वैगुण्यान्न फलं यथा ।
कुत्रचिद् विगुणं वा स्यात् यागादौ तद्वदिष्यताम् ॥६२॥
वैफल्यासम्भवाद् दुःखफलत्वासम्भवात् तथा ।
अन्यानपेक्षणाच्चास्मिन् अदृष्टं परिकल्प्यते ॥ ६३ ॥
इष्टानां कर्मणां दृष्टफलानां दृष्टबाधने ।
प्रयोगोऽभ्युदयाय स्याद् वेदे तस्योपलम्भनात् ॥ ६४ ॥
अभिषेकोपवासौ च ब्रह्मचर्य्यं गुरौ स्थितिः ।
दिङ्नक्षत्रे मन्त्रकालौ नियमा ये प्रकीर्तिताः ।

कर्मणामदृष्टफलकत्वं समर्थयति, "वैफल्यासम्भवात्" इत्यादि । अयमर्थः, यागादिकं हि शिष्टैरनुष्ठीयते इति तत्रावश्यं फलेन भवितव्यम् । वैफल्ये प्रवृत्त्यसम्भवात्, तत्रेष्टसाधनताज्ञानस्य हेतुत्वात् । अतएव दृष्टमेव दुःखादिकं फलमित्यपि न युक्तं प्रवृत्त्यसम्भवतादवस्थ्यात् इत्येतदाह, "दुःखफलत्वासम्भवात्" इति । नन्वस्तु दृष्टमेव ख्यातिसम्मानादिकं फलमित्यत्राह, "अन्यानपेक्षणात्" इति । अन्यस्य ख्यातिसम्मानादेरनपेक्षणात् अपेक्षाविरहादित्यर्थः । इदमुक्तं भवति । ख्यातिसम्मानादिनिरपेक्षैरपि निभृतमनुष्ठीयते वैदिकं कर्मेति न तस्य तत्फलत्वमिति भावः । 'अदृष्टम्' अप्रत्यक्षं स्वर्गादि । तच्चास्थिविनाशिनो व्यापारमन्तरेण न सम्भवतीति तद्व्यापारतया धर्मः कल्प्यते ॥ ६३ ॥

नन्वेवं स्वर्गाद्यप्रेप्सुभिरपि कथमनुष्ठीयते कर्म इत्यत्राह, "इष्टानां

यानि चैवंप्रकाराणि तेषामेतत् फलं विदुः ॥ ६५ ॥

दुष्टानां भोजने श्राद्धात् फलमेव न जायते।

निषिद्धकर्मण्यासक्ता विप्रा दुष्टाः प्रकीर्तिताः ॥ ६६ ॥

कर्मणाम्" इति। 'दृष्टानां' शास्त्रदृष्टानाम्। 'दृष्टफलानां' विध्यर्थवादादिभिः 'दृष्टम्' अवगतं, फलं, येषां, तादृशानाम्। 'दृष्टबाधने' 'दृष्टस्य' विध्यर्थवादादिज्ञातस्य फलस्य स्वर्गादेः। 'बाधने' तत्तत्कामनाविरहादसम्भवे। 'प्रयोगः' अनुष्ठानम्। 'अभ्युदयाय' अभ्युदयप्रयोजकचित्तशुद्धये। तथा च स्वर्गादिफलापेक्षाभावे कर्मानुष्ठानन्तु चित्तशुद्धये भवतीति नानुपपत्तिरिति भावः। कुत एवमित्यत्राह, "वेदे तस्योपलम्भनात्" इति। तथा च श्रूयते, "तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन" इत्यादि। स्मर्य्यते च "इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते। निष्कामं ज्ञानपूर्बन्तु निवृत्तमुपदिश्यते। प्रवृत्तं कर्मसंसेव्य-देवानामेति साष्टिताम्। निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै" इत्यादि ॥६४॥

कानिचिददृष्टार्थककर्माण्याह, "अभिषेकोपवासौ च" इत्यादि। 'गुरौ स्थितिः' गुरुकुलवासः। 'दिक्' दानादौ प्राङ्मुखत्वादि। नक्षत्रं श्राद्धादौ मघादि। मन्त्रं प्रणवगायत्र्यादि। कालः पूर्बाह्णादिः। 'नियमाः' शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि ॥ ६५ ॥

सम्यगनुष्ठितकर्मणामेव फलजनकत्वमिति दर्शयितुमाह, "दुष्टानां भोजने श्राद्धात्" इति ॥ ६६ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां लघुविमलाभिधेयः षोड़शः परिच्छेदः।

दोषभाजो भवन्त्यन्ये तेषां संसर्गतः पुनः ।
सत्पात्रविरहादादौ यत्र दुष्टा निमन्त्रिताः ॥ ६७ ॥
पुनर्विशिष्टे तत्रैव प्रवृत्तिस्तोषयेत् तु तान् ।
समे कार्य्याप्रवृत्तिर्वा हीने दुष्टेऽप्यसम्भवे ॥ ६८ ॥
फलाल्पत्वबहुत्वादि यथायुक्तं विविच्यताम् ।
हीनात् समात् विशिष्टाद्वा धार्मिकात् स्वप्रतिग्रहे ॥ ६९ ॥
यथोत्तरं धर्मवृद्धिश्चिन्तनीया विचक्षणैः ॥ ७० ॥
अदत्तादानमिच्छन्ति प्राणसंशयसङ्कटे ।
तच्च हीनात् समानाद्वा विशिष्टाद्वाप्यसम्भवे ॥ ७१ ॥
हीना यदि विरुद्धाः स्युर्बधस्तेषां विधीयते ।
समानाश्चेत् तदप्यात्मावसादस्तद्वधोऽपि वा ॥ ७२ ॥
सर्वथापि विशिष्टानां बधो धर्मविगर्हितः ।
वरं तत्रात्मनस्त्यागं भगवान् काश्यपोऽब्रवीत् ॥ ७३ ॥
सत्यपि वादिवितर्कैः सगौरवायामपि स्फुरत्तर्कैः ।
लघुविमलायामस्यां रमन्तु विमलान्तराः सन्तः ॥ ७४ ॥

इति श्रीचन्द्रकान्ततर्कालङ्कार-प्रणीतायां तत्त्वावल्यां
लघुविमलाभिधेयः षोड़शः परिच्छेदः ।

नित्यभावविवेको नाम

सप्तदशः परिच्छेदः।

अनेकसमवेतं यत् नित्यं, सा जातिरुच्यते।
सामान्यञ्च विशेषश्च तद्द्वयं बुद्धिलक्षणम् ॥ १ ॥
अनुवृत्तत्वबुद्धिस्तु भवेदाद्यस्य लक्षणम्।
व्यावृत्तत्वमतिस्तद्वद् विशेषस्येति चिन्त्यताम् ॥ २ ॥
यतो हि सत्सदित्येवं स्यात् द्रव्यगुणकर्मसु।—
प्रत्ययो व्यवहारश्च. सा सत्तेत्यभिधीयते ॥ ३ ॥
सा तु सामान्यमेव स्याद् अनुवृत्तमतिं प्रति।—
हेतुत्वात् केवलं तस्याः, द्रव्यत्वादीनि वै पुनः।

क्रमप्राप्तां जातिं लक्षयति, "अनेकसमवेतं यत्" इत्यादि। जलीयपरमाणवादिरूपव्यवच्छेदाय अनेकेति। अत्यन्ताभाववारणाय समवेतमिति। संयोगवारणाय नित्यमिति। जातिं विभजते, "सामान्यञ्च" इति। 'सामान्यं' परम्, अधिकदेशवृत्तीत्येतत्। 'विशेषः' अपरम्, अल्पदेशवृत्तीत्येतत्। "बुद्धिलक्षणम्" इति। बुद्धिर्लक्षणं यस्य तादृशमित्यर्थः ॥ १ ॥

तदेव प्रकाशयति, "अनुवृत्तत्वबुद्धिस्तु" इति। 'आद्यस्य' सामान्यस्य ॥ २ ॥

सामान्यानि विशेषाश्च चिन्त्यमन्यन्मनीषिभिः ॥ ४ ॥
वैलक्षण्याज्जात्यभावात् तथा द्रव्यादिषु त्रिषु ।
भावादयुतसिद्धत्वात् सत्तार्थान्तरमिष्यते ॥ ५ ॥

"द्रव्यत्वादीनि वै पुनः" इत्यादि। द्रव्यमिदं द्रव्यमिदम् इत्यनुगतप्रत्यये सत्येव, नेदं कर्मेति व्यावृत्तिबुद्धिदर्शनाद्विशेषत्वमपीति भावः। अथवा सत्येव द्रव्यमिदमित्यनुगतप्रत्यये नेदं पृथिवीत्यादिव्यावृत्तिबुद्धिरत्र द्रष्टव्या ॥ ४ ॥

ननु द्रव्यगुणकर्मवृत्तिसत्ता न पदार्थान्तरं, द्रव्यादिभिरेव तादृशप्रत्ययादिकमस्तु इत्याशङ्क्याह, "वैलक्षण्याज्जात्यभावात्" इत्यादि। 'वैलक्षण्यात्' इति। द्रव्यादिषु सदित्यनुगतप्रत्ययनिमित्तं सत्ताऽतिरिक्तैव न द्रव्यादिरूपा, तेभ्यो वैलक्षण्यात्, द्रव्यादयो ह्यननुगतस्वरूपाः, सत्ता चानुगतस्वरूपेति विरुद्धधर्माध्यासात् तेभ्यो भिन्नैव सत्तेत्यर्थः। इतश्चार्थान्तरं सत्तेत्याह, "जात्यभावात्" इति। सत्ताया द्रव्यादिरूपत्वे द्रव्यत्वादिका जातयस्तत्रोपलभ्येरन्, न चैवम्। तथात्वे हि सत्ता द्रव्यं गुणः कर्मेति प्रत्ययादिकमापद्यते। इतश्चार्थान्तरं सत्तेत्याह, "द्रव्यादिषु त्रिषु भावात्" इति न हि किमपि द्रव्यं गुणः कर्म वा द्रव्यादिषु त्रिषु वर्त्तते इति भावः। ननु यदि द्रव्यादित्रिकभिन्ना सत्ता, तदा तेभ्यो भेदेनोपलभ्येत, यद्धि यतो भिन्नं तत्ततो भेदेनोपलभ्यते यथा घटात् पटः, न चोपलभ्यते, तथा च कथमेतदित्यत्राह, "अयुतसिद्धत्वात्" इति। घटपटयोस्तु युतसिद्धिरिति वैषम्यम् ॥ ५ ॥

स्वरूपत्वं नानुगतं नातस्तदपि तादृशम्।
गोत्वाश्वत्वादिभिश्चापि सामान्यैर्गतमन्यथा ॥ ६ ॥
स्वरूपत्वस्य तत्त्वे तु सैव सत्तास्तु का क्षतिः ?।
नाममात्रे विवादो हि केवलं परिशिष्यते ॥ ७ ॥
सत्सामान्यं विशेषोऽपि समवायोऽपि सन्निति।
एकार्थसमवायेन भवतु प्रत्ययादिकम् ॥ ८ ॥

ननु द्रव्यादिस्वरूपाणां भिन्नत्वेऽपि स्वरूपत्वमादायैवानुगतप्रत्ययादिकमस्तु इत्यत्राह, "स्वरूपत्वम्" इति। 'तदपि' स्वरूपत्वमपि। 'तादृशम्' अननुगतप्रत्ययादिनिमित्तम्। अननुगतैरपि स्वरूपैरनुगतप्रत्ययादिकं किं न स्यादित्यत्राह, "गोत्वाश्वत्वादिभिः" इति। 'अन्यथा' अनुगतेनाप्यनुगतप्रत्ययाद्यभ्युपगमे ॥ ६ ॥

ननु स्वरूपत्वमनुगतमेवास्तु इति चेत् तदा सैव सत्ता इत्याह, "स्वरूपत्वस्य" इति। 'तत्त्वे' अनुगतत्वे। "का क्षतिः" इति। वस्तु तावत द्रव्यादित्रितयानुगतं सिद्धमेव, किन्तु तदेव त्वया स्वरूपत्वमिति, मया तु सत्तेत्युच्यते इति नाम्न्येव विवादो न वस्तुनीति नास्ति क्षतिरिति भावः ॥ ७ ॥

नन्वेवं सामान्यं सदिति प्रत्ययादिकं कथमुपपद्यते इत्यत्राह, "सत्सामान्यम्" इति। तथा च तादृशप्रत्ययादिकं न शुद्धसमवायेन किन्त्वेकार्थसमवायेनेति भावः। अत्र च स्वरूपमिव तादात्म्यमप्येकार्थसमवायस्य संसर्गताघटकमिति समवायेनासम्भवः इति ध्येयम् ॥ ८ ॥

तथा द्रव्येषु सद्भावात् जात्यभावाच्च भिद्यते ।—
द्रव्यत्वं, रीतिरेषैव गुणकर्मत्वयोर्मता ॥ ९ ॥
लिङ्गाविशेषादेकैव सत्ता वैशेषिके नये ।
न च तद्भेदकं लिङ्गान्तरमप्युपलभ्यते ॥ १० ॥
प्रदीपोऽसौ स एवेति बुद्धिर्यद्यपि विद्यते ।
तथापि भेदिका तत्र परिमाणविभिन्नता ॥ ११ ॥
व्यक्तिभेदादतुल्यत्वात् योगभावादसङ्करात् ।

द्रव्यत्वमपि द्रव्याद्भिद्यते इत्यत्राह, "तथा द्रव्येषु सद्भावात्" इति । 'द्रव्येषु' सर्वद्रव्येषु । न हि किमपि द्रव्यं सर्वद्रव्यसमवेतमिति भावः । सत्तायास्तथात्वेऽपि सर्वद्रव्यमात्रसमवेतत्वं विवक्षितमित्यदोषः । 'जात्यभावाच्च' इति पूर्ववद्व्याख्येयम् ॥ ९ ॥

"लिङ्गाविशेषादेकैव" इति । सत्तालिङ्गयोरनुगतप्रत्ययव्यवहारयोरविशेषादित्यर्थः ॥ १० ॥

प्राभाकराः संस्थानव्यङ्ग्यत्वं जातेरभ्युपगम्य गुणकर्मणोस्तां नेच्छन्ति । तन्मतनिरासायाह, "व्यक्तिभेदादतुल्यत्वात्" इति । तत्र गुणादिगतजातिषु न तावद्व्यक्त्यभेदो बाधकः रूपादिव्यक्तीनामनेकत्वादित्याह, 'व्यक्तिभेदात्' इति । नापि तुल्यत्वं बाधकं तद्धि अन्यूनानतिरिक्तव्यक्तिकत्वं तच्चेह नास्ति रूपत्वादेर्गुणत्वाद्यपेक्षया न्यूनव्यक्तिकत्वात् नीलत्वाद्यपेक्षयाऽधिकव्यक्तिकत्वाच्चेत्याह, अतुल्यत्वात्' इति । नापि सम्बन्धाभावो बाधकः लाघवेन समवायस्यैवात्र सम्बन्धत्वा-

अनवस्थारूपहान्योरभावाच्च गुणादिषु ॥ १२ ॥

भ्युपगमात्, तथात्वे बाधकाभावाच्च इत्याह, 'योगभावात्' इति। 'योगः' सम्बन्धः, स च प्रकृते समवायः, तस्य 'भावात्' सत्त्वात्, इत्यर्थः। नापि सङ्करो बाधकः, तत्त्वं हि परस्परात्यन्ताभावसमानाधिकरणयोरैकाधिकरण्यं, स्वसामानाधिकरण्य-स्वात्यन्ताभावसामानाधिकरण्य-स्वाधिकरण-वृत्त्यभावप्रतियोगित्व-एतत्त्रितयसम्बन्धेन जातिमत्त्वं वा। तच्च प्रकृते नास्तीत्याह, "असङ्करात्" इति। (अत्र च जलत्वादीनां जातित्वरक्षार्थे स्वसामानाधिकरण्येति। जलत्वं हि पृथिवीत्वाधिकरणवृत्त्यभावप्रतियोगि, पृथिवीत्वाभावाधिकरणवृत्ति च। क्षितित्वादेर्जातित्वरक्षार्थे स्वात्यन्ताभावसामानाधिकरण्येति, क्षितित्वं हि द्रव्यत्वाधिकरणवृत्ति, द्रव्यत्वाधिकरणजलादिवृत्त्यभावप्रतियोगि च द्रव्यत्वादेर्जातित्वरक्षार्थे स्वाधिकरणवृत्त्यभावप्रतियोगित्वेति, द्रव्यत्वं हि क्षितित्वसमानाधिकरणं, क्षितित्वात्यान्ताभावसमानाधिकरणञ्च। इति द्रष्टव्यम्) नाप्यनवस्था बाधिका, रूपत्वादिगतजात्यन्तराभावात्, न वा रूपहानिः, प्रकृते तदसम्भवात् इत्याह, "अनवस्थारूपहान्योरभावात्" इति। एतावन्त्येव जातिबाधकानि। तदुक्तं "व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः। रूपहानिरसम्बन्धो जातिबाधकसंग्रहः" इति। तत्र व्यक्त्यभेदादाकाशत्वं न जातिः। तुल्यव्यक्तिकत्वाद्घटत्वं कलसत्वञ्च न जातिद्वयम्। सङ्करात् भूतत्वं मूर्त्तत्वञ्च न जातिः। तथा हि मनसि मूर्त्तत्वं वर्त्तते, न भूतत्वं, गगने भूतत्वं वर्त्तते न मूर्त्तत्वं, पृथिव्याञ्च तदुभयमेव वर्त्तते इति

अनुवृत्तत्वधीस्तत्र साक्षिणी, सा गुणादिषु ।
द्रव्यवत्, तेऽपराद्धं किं गुणादिगतजातिभिः ॥ १३ ॥
व्यापकत्वादसम्बन्धाद् विकल्पानवकाशतः ।
विधिरूपन्तु सामान्यं प्रत्ययादपि तादृशात् ॥ १४ ॥

साङ्कर्य्यम् । द्वितीयलक्षणपक्षेऽपि उत्पत्तिकालावच्छेदेन द्रव्ये भूतत्वं मूर्त्तत्वञ्च नास्तीति नानुपपत्तिरिति ध्येयम् । एवं तेजस्त्वादिना सङ्करात् पशुत्वादेरपि न जातित्वं, तथा हि गवादौ पशुत्वमेव न तेजस्त्वं, दहने तेजस्त्वमेव न पशुत्वम्, उच्चैःश्रवसि तु तद्द्वयमेवास्ति । इत्याद्यूह्यम् । एवमनवस्थाभयात् सामान्यत्वं न जातिः । रूपहानिभयात् विशेषत्वं न जातिः । तथा हि विशेषो यदि जातिमान् स्यात्, तदा स्वतो व्यावृत्तं न स्यादिति स्वतो व्यावृत्तत्वस्य, 'रूपस्य' असाधारणधर्मस्य, 'हानिः' व्याघातः स्यात् । यद्वा 'रूपहानिः' स्वरूपहानिः । तथा हि विशेषा यदि मूर्त्तवृत्तित्वे सति जातिमन्तः स्युर्गुणाः कर्माणि वा स्युः, विभुवृत्तित्वे सति यदि जातिमन्तः स्युर्गुणाः स्युरिति विशेषपदार्थस्य स्वरूपहानिभयाद्विशेषत्वं न जातिः । एवं समवायसम्बन्धाभावादभावत्वं न जातिरित्यास्तां विस्तरः ॥ १२ ॥

किञ्च "अनुवृत्तत्वधीस्तत्र" इत्यादि ॥ १३ ॥

अत्र सौगताः विधिरूपं नास्त्येव सामान्यम्, अतद्व्यावृत्तेरेवानुगतमतिविषयत्वात् । किञ्च गोत्वं किं गवि वर्त्तते, आहोस्विदगवि ? न तावदाद्यः गोत्ववृत्तेः पूर्वं तदभावात्, नान्त्यः विरो-

एकस्मिन्नेव सत्तावद्भिन्नो यः समवैति सः।

धात्। किञ्च उत्पन्ने गोपिण्डे कुत आगत्य गोत्वं वर्त्तते? पिण्ड-समवायिकारण एव गोत्वमासीदिति चेन्न तदा तस्यापि गोत्वप्रस-ङ्गात्, नापि पिण्डेन समुत्पन्नमेव गोत्वं, नित्यत्वाभ्युपगमात्, नापि गोपिण्डान्तरादागतं निष्क्रियत्वाभ्युपगमात्। किञ्च सामान्यं कि-मेकत्र कार्त्स्न्येन वर्त्तते, एकदेशेन वा? नाद्यः अन्यत्र तद्बुद्ध्यभाव-प्रसङ्गात्, न द्वितीयः एकदेशानभ्युपगमात्। तदुक्तं "न याति न च तत्रासीन्न चोत्पन्नं न चांशवत्। जहाति पूर्वं नाधारमहो व्यसन-सन्ततिः॥" इति। इत्याहुः। तन्मतनिरासार्थमाह, "व्यापकत्वादस-म्बन्धात्" इति। व्यापकत्वञ्च स्वरूपतः सर्वदेशसम्बन्धत्वम्। तथा च यदैव पिण्ड उत्पद्यते तदैव सम्बध्यते इति नानुपपत्तिः। ननु सर्वदेशसम्बद्धत्वे सामान्यस्य देशेष्वपि गोव्यवहारप्रसङ्ग इत्याश-ङ्क्याह, 'असम्बन्धात्' इति। सम्बन्धोऽत्र समवायः, तदभावादि-त्यर्थः। तथा च समवायेनैव गोत्वादेर्गवादिव्यवहारनियामकतया नातिप्रसङ्ग इति भावः। ननु तथापि कार्त्स्न्यैकदेशविकल्पानुप-पत्तिरित्यत्राह, 'विकल्पानवकाशतः' इति। कृत्स्नता ह्यनेकाशेषता, न चैकस्य सामान्यस्य तत्सम्भव इति तादृशविकल्प आत्मानमेव न लभते इति क्वानुपपत्तिरिति विभावनीयम्। तस्मात् 'न याति न तत्रासीत्' इत्यादिकमफलमेव परिदेवितमिति बोध्यम्। यत्तु अतद्व्यावृत्तिरेव गोत्वादिकमित्युक्तं तत्राह, 'प्रत्ययादपि तादृशात्' इति। 'तादृशात्' विधिमुखात्। तदुक्तं, "विधिजः प्रत्ययोऽन्योऽयं व्यतिरेकासमर्थकः" इति॥ १४॥

विशेषः प्रोच्यते सोऽयं नानाविध उदाहृतः ॥ १५ ॥
सर्वेषां द्व्यणुकान्तानां तत्तदङ्गविभेदतः ।
भेदोऽसौ परमाणूनां विशेषादेव केवलम् ॥ १६ ॥
नास्ति जातिमतां यस्मात् स्वतो व्यावृत्तता क्वचित् ।
तस्मादणूनां तादृक्त्वमङ्गीकर्त्तुमसाम्प्रतम् ॥ १७ ॥
यस्मादयुतसिद्धानाम् इहेदमिति धीर्भवेत् ।
आधार्य्याधारभूतानां समवायः स उच्यते ॥ १८ ॥
संयोगासम्भवात् तत्र स्वरूपेष्वपि गौरवात् ।
तद्विशिष्टमतौ तेषां विषयत्वं न विद्यते ॥ १९ ॥

विशेषपदार्थं लक्षयति, "एकस्मिन्नेव सत्तावत्—" इत्यादि । जातिवारणाय एकस्मिन्नेव इति । एकमात्राश्रितगुणकर्मव्यवच्छेदाय सत्तावच्छिन्न इति । अभाववारणाय समवैतीति ॥ १५ ॥

समवायं लक्षयति, "यस्मादयुतसिद्धानाम्" इति । 'अयुतसिद्धानाम्' असम्बन्धयोरविद्यमानानाम् । 'इहेदम्' इति, इह तन्तुषु पटः, इह द्रव्ये गुणा इत्यादिधीरित्यर्थः । तथा च तादृशविशिष्टबुद्धिर्यस्मात् भवति स एव सम्बन्धः समवाय इति भावः । उक्तबुद्धिर्हि सम्बन्धविशेषसत्तैव, अन्यथा इह तन्तुषु घट इत्यादिकमपि किं न स्यादित्यभिप्रायः ॥ १८ ॥

"संयोगासम्भवात् तत्र" इति । संयोगे युतसिद्धेः प्रयोजकत्वादिति भावः । नन्वस्तु तत्र स्वरूप एव संसर्ग इत्यत्राह, "स्वरूपे-

तयोरयुतसिद्धत्वान्न विश्लेषः परस्परम्।
आपत्तिर्युतसिद्धेर्नो, बाधादनुपलम्भनात् ॥ २० ॥
स चायं भाववन्नैव द्रव्यं नापि गुणादिकम्।
किन्त्वन्यस्तन्मतेस्तेभ्यो वैलक्षण्योपलम्भनात् ॥ २१ ॥
तत्त्वं नित्यत्वमप्यस्य सत्तावत् सद्भिरिष्यते।
विनष्टं रूपमित्येवं प्रतियन्ति हि लौकिकाः ॥ २२ ॥

ष्वपि" इति। तथा चानन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवमिति भावः ॥ १९ ॥

ननु समवायो यदि सम्बन्धस्तदा संयुक्तयोरिव समवायवतोरपि विश्लेषः किं न स्यादित्यत्राह, "तयोरयुतसिद्धत्वात्" इति। ननु समवायस्य सम्बन्धत्वादेव युतसिद्धिरापाद्यते इत्यत्राह, "आपत्तिः" इति। 'बाधात्' इति आपाद्यस्य युतसिद्धेर्जातिव्यक्त्यादिषु बाधादित्यर्थः। बाध एव कुतः ? इत्यत्राह, "अनुपलम्भनात्" इति। न हि क्वचिदपि जातिव्यक्त्योर्युतसिद्धिरनुभूता येनान्यत्रापाद्यते। तथा च समवायवतोर्युतसिद्ध्यननुभवात् तदापत्त्यसम्भवः स्वरूपवतोस्तु तथानुभवोऽन्यत्रास्त्येवेति स्वरूपस्य संसर्गत्वे आपत्तिर्युज्यत एवेति न स्वरूपस्यात्र संसर्गत्वमिति चिन्तनीयम् ॥ २० ॥

"स चायं भाववन्नैव" इत्यादि। 'भाववत्' सत्तावत्। अत्र विलक्षणबुद्धिवेद्यत्वं हेतुमाह, 'तन्मतेः' इत्यादि ॥ २१ ॥

"तत्त्वं नित्यत्वमप्यस्य" इति। 'तत्त्वम्' एकत्वम्। यथा हि सद्द्रव्यं सन् गुणः सत्कर्मेति प्रतीत्यविशेषाद्विशेषलिङ्गाभावात् लाघ-

नायमुत्पद्यते हेतोर्विरहात् समवायिनः ।
आत्माश्रयानवस्थाभ्यां सुतरामन्ययोरपि ॥ २३ ॥
स्वरूपेणैव निष्पाद्या समवायविशिष्टधीः ।
तेनैव रूपबुद्धिः स्यादिति चेत् तत्समाहितम् ॥ २४ ॥
नाशकालेऽपि रूपाणां न रूपप्रत्ययः कथम् ? ।
रूपाणामपि हेतुत्वात् तदभावान्न तन्मतिः ॥ २५ ॥

वाच एकैव सत्ता, तथैव घटः समवेतः पटः समवेतः स्तम्भः समवेत इति प्रतीत्यविशेषात् भेदकलिङ्गाभावात् लाघवाच्च समवायोऽप्येक एवेत्यर्थः। 'विनष्टं रूपम्' इत्यादि। तथा च रूपादेरेव विनाशावगाहिनी प्रतीतिरस्ति न समवायस्येति भावः ॥ २२ ॥

किञ्चाकारणवत्त्वादपि नित्योऽसावित्याह, "नायमुत्पद्यते" इति। कुतस्तस्य समवायिकारणं नास्तीत्यत्राह, 'आत्माश्रयानवस्थाभ्याम्' इति। अयमर्थः, समवायिकारणं हि समवायेन कार्यसम्बद्धं भवति, प्रकृते समवायस्य यत् समवायिकारणं, तत् किं तेनैव समवायेन कार्य्यसम्बद्धं, समवायान्तरेण वा? आद्ये आत्माश्रयता, द्वितीये त्वनवस्था। इत्थञ्च समवायस्य समवायिकारणाभावे तदधीनयोरसमवायिनिमित्तकारणयोरप्यभाव इत्याह, 'सुतरामन्ययोरपि' इति। 'अन्ययोः' असमवायिनिमित्तकारणयोः ॥ २३ ॥

समवायस्य नित्यत्वे सति प्रश्नते, "नाशकालेऽपि रूपाणाम्" इति समाधत्ते "रूपाणामपि" इति ॥ २५ ॥

आधाराधेयनियमात् सङ्करो नात्र शंक्यते।
अन्यथा वदरादीनां कुण्डाद्याधारता न किम्? ॥२६॥
तस्मात् सम्बन्धसत्त्वेऽपि वायौ रूपं न गम्यते।
तदाधारत्वविरहात् स्वभावस्तन्नियामकः॥ २७॥
स चातीन्द्रिय एव स्याद् अनुमानवलादिह।
अन्यत्र व्याप्तिसन्देहात् नास्ति सत्प्रतिपक्षता॥ २८॥

ननु समवायस्यैकत्वे य एव द्रव्यत्वसमवायः स एव गुणत्वसमवाय इति द्रव्यत्वादीनां सङ्करप्रसङ्ग इत्यत्राह, "आधाराधेयनियमात्" इति। अयमस्याधारः अयमस्याधेय इति नियमात् न दोषः, द्रव्ये गुणत्वसमवायसत्त्वेऽपि तस्य तदाधारत्वविरहादिति भावः। आधाराधेयनियमस्यावश्यमभ्युपेय इत्याह, 'अन्यथा' इति। तथाचोक्तनियमाभावे कुण्डवदरयोः संयोगाविशेषेऽपि कुण्डमेवाधारो न वदरमिति नियामकाभावात् वदरमपि कुण्डस्याधारः स्यादिति भावः॥ २६॥

"तस्मात् सम्बन्धसत्त्वेऽपि" इत्यादि। ननु कुत्र कस्याधारत्वमित्यत्र किं नियामकमित्याकाङ्क्षायामाह, "स्वभावस्तन्नियामकः" इति। यद्यपि रूपाभावादपि वायौ रूपवत्ताबुद्ध्यसम्भवस्तथापि सिद्धान्तान्तरमिदमुक्तमिति मन्तव्यम्॥ २७॥

"स चातीन्द्रिय एव स्यात्" इति। 'स' समवायः। 'अनुमानबलात्' इति। समवायोऽतीन्द्रियः आत्मान्यत्वे सत्यसमवेतभावत्वात् आकाशादिवत् इत्यनुमानादित्यर्थः। 'इह' वैशेषिकनये।

एष काश्यपशिष्याणां सामान्यादिविनिर्णये ।
नित्यभावविवेकोऽस्तु शरणं सारसंग्रहः ॥ २८ ॥

इति श्रीचन्द्रकान्ततर्कालङ्कार-प्रणीतायां तत्त्वावलौ
नित्यभावविवेको नाम सप्तदशः परिच्छेदः ।

नन्वत्र सत्प्रतिपक्षः तथा हि समवायः प्रत्यक्षः योग्यप्रतियोगित्वे सति विशेषणतया योग्यवृत्तित्वात् भूतलवृत्तिघटात्यन्ताभाववदित्यत्राह, 'अन्यत्र व्याप्तिसन्देहात्' इति ॥ २८ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां
नित्यभावविवेको नाम सप्तदशः परिच्छेदः ।

रहस्यचिन्ता नाम ।

अष्टादशः परिच्छेदः ।

प्रागुत्पत्तेरसत् सर्वं कार्य्यं घटपटादिकम् ।
क्रियावत्त्वं गुणित्वं वा न तदा व्यपदिश्यते ॥ १ ॥
हेतुव्यापारसद्भावे चक्षुर्विस्फारणात्परम् ।
कार्य्यं भविष्यतीत्येवं प्रत्यक्षं सार्वलौकिकम् ॥ २ ॥
स चायं प्रागभावः स्व-प्रतियोगिनि कारणम् ।
उत्पन्न-पुनरुत्पत्तिर्वार्य्यतां कथमन्यथा ? ॥ ३ ॥

इदानीमभावो निरूपयितव्यः । तत्र प्रथमं प्रागभावमाह, "प्रागुत्पत्तेरसत्सर्वम्" इति । 'असत्' तत्कालीन-स्वजनकाभाव-प्रतियोगि । तत्र हेतुः, "क्रियावत्त्वम्" इत्यादि । यदि हि उत्पत्तेः प्रागपि सदेव कार्य्यं स्यात्, पश्चादिव तदानीमपि क्रियावत्त्वेन गुणवत्त्वेन च व्यपदिश्येत, न चैवम् ॥ १ ॥

प्रागभावे प्रत्यक्षं प्रमाणमाह, "हेतुव्यापारसद्भावे" इति । तथा च चक्रारूढ़ायां मृदि भविष्यत्यत्र घट इति प्रत्यक्षे वर्त्तमानप्रागभाव-प्रतियोगित्वमेव भासते इति भावः ॥ २ ॥

इदानीं प्रागभावस्य प्रतियोगि जनकत्वमाह, "स चायं प्राग-भावः" इति । "उत्पन्नपुनरुत्पत्तिः" इत्यादि । 'अन्यथा' प्रागभावस्य

प्रतिबन्धकसंसर्गाभावत्वेनापि हेतुता ।
निस्प्रत्यूहा, तद्विनाशस्तत्काले तद्विरोधवान् ।
सोऽयं चरमसामग्री-व्यञ्जकव्यङ्ग्य इष्यते ॥ ४ ॥
विनाशकस्य दण्डादेर्व्यापारादप्यनन्तरम् ।
पूर्वं सदप्यसत्कार्य्यं ध्वंसः सोऽयं प्रगीयते ॥ ५ ॥

प्रतियोगिजनकत्वानभ्युपगमे । तथा च कारणान्तरेषु सत्स्वपि उत्पन्न एव घटः पुनस्तावन्नोत्पद्यते, तत्रावश्यं कारणवैकल्येन भवितव्यं, तदनुसन्धाने च प्रागभाववैकल्यमेव परिशिष्यते इति भावः ॥ ३ ॥

ननु तस्यैव घटस्य पुनरुत्पत्तौ स एव घटः प्रतिबन्धकोऽस्तु अलं प्रागभावस्य कारणत्वकल्पनयेति चेत् ? तर्हि प्रतिबन्धकसंसर्गाभावत्वेन प्रागभावस्य कारणत्वमायातमित्येतदेवाह, "प्रतिबन्धक—" इत्यादि । नन्वेवं घट एव प्रागभावस्याभावरूप इत्यापतितं, घटसत्त्वे तदभावात्, तथा च विनष्टे घटे प्रागभावस्य पुनरुन्मज्जनापत्तिरित्याशङ्क्याह, "तद्विनाशः" इति । तदिति घटस्य परामर्शः । तथा च घटवत् घटध्वंसोऽपि तद्विरोधीति न दोषः । न भवति विरोध्यन्तरसत्त्वेऽपि विरोध्यन्तरप्रादुर्भाव इति भावः । 'तत्काले' इत्युपादानाच्च अनयोः कालकृत एव विरोधो न तु गोत्वाश्वत्ववद्देशकृत इति न तयोर्देशभेदेनाप्येककालवर्त्तित्वसम्भव इति ज्ञापितम् ॥ ४ ॥

ध्वंसाभावं व्युत्पादयति, "विनाशकस्य दण्डादेः" इति ॥ ५ ॥

ध्वस्तो घटः पटो नष्टः श्रुतपूर्वो न विद्यते।
गकार इत्येवमादि स्पष्टं प्रत्यक्षमीक्ष्यते॥ ६॥
असतोऽवर्त्तमानस्य क्रियादिव्यपदेशनम्।
नास्त्यतोऽर्थान्तरं तत्र भासते, न घटादिकम्॥ ७॥
सदप्यसङ्भवेत्सोऽयम् अन्योन्याभाव उच्यते।
अयं तदात्मनाऽभावो नास्ति कुम्भः पटात्मना॥ ८॥
अघटो गौरगौरश्वः पटादन्ये घटादयः।
अधर्मः सुखमित्यादि प्रत्यक्षं तत्परं विदुः॥ ९॥
तादात्म्येन विरोधित्वम् अत्रापि प्रतियोगिनः।

तत्रापि प्रत्यक्षं प्रमाणयति, "ध्वस्तो घटः पटो नष्टः" इत्यादि॥६॥

ननु दण्डादिप्रहारानन्तरं मृद्येव घटस्तिरोभूतस्तिष्ठति, तदवस्थापन्नो घट एव ध्वंसव्यवहारविषय इति नार्थान्तरं ध्वंस इत्याशङ्क्याह, "असतोऽवर्त्तमानस्य" इति। 'असतः' इत्यस्यैवार्थः 'अवर्त्तमानस्य' इति। यदि हि तदानीमपि घटः सन् स्यात्, प्रागिव तस्य क्रियादिव्यपदेशोऽभविष्यत्, न चैवं, तस्मान्नास्तीति ध्वंसोऽर्थान्तरमेव न घटादिरूप इति भावः। अथवा घटध्वंसोऽस्ति घटध्वंसमुपलभे इत्यादिव्यवहारविषयत्वं नाविद्यमानस्य घटादेरपि तु विद्यमानस्यैव ध्वंसस्येत्यर्थः॥ ७॥

इदानीमन्योन्याभावमाह, "सदप्यसत् भवेत् सोऽयम् इत्यादि॥८॥
अत्रापि प्रत्यक्षं प्रमाणयति, "अघटो गौरगौरश्वः" इत्यादि॥९॥

तयोः कदापि तादात्म्यासम्भवान्नित्य एव सः ॥ १० ॥

उक्ताभावत्रयादन्यदसत् यदुपलभ्यते ।

अत्यन्ताभावनामासौ तुरीयः परिकीर्त्तितः ॥ ११ ॥

इदानीं नास्ति तद्भूतं सेयं ध्वंसपरा मतिः ।

अतदुल्लेखवन्नास्ति तदित्येवंविधं पुनः ॥ १२ ॥

अत्यन्ताभावमालम्ब्य प्रत्यक्षमुपजायते ।

कदापि यत्र यन्नासीत् न कदाचिद्भविष्यति ॥ १३ ॥

तत्र तद्वस्तुनोऽभावो यः स एवायमिष्यते ।

असौ त्रैकालिकस्तस्मादुक्त आत्यन्तिकस्तथा ॥ १४ ॥

प्रध्वंसं प्रागभावं वा धीरन्यत्रावलम्बते ॥ १५ ॥

ननु भूतले सत्यपि घटे भूतलं न घट इति भवत्यन्योन्याभाव-प्रतीतिः, सा च कथम् उपपद्यते, अभावं प्रति हि प्रतियोगी विरोधी, घटवत्यपि हि भूतले घटो नास्तीति न भवति प्रतीतिः इत्याशङ्क्याह, "तादात्म्येन विरोधित्वम्" इति । अयमर्थः । प्रति-योगितावच्छेदकसम्बन्धेनैव हि प्रतियोगिनो विरोधित्वम्, अन्यथा संयोगेन घटवति भूतलादौ समवायेन घटो नास्तीति प्रतीत्यनुप-पत्तेः । इत्यञ्च संयोगेन घटवत्यपि भूतले तादात्म्येन नास्ति घट इति नानुपपत्तिः । 'तयोः' घटपटाद्योः ॥ १० ॥

अत्यन्ताभावं व्युत्पादयति, "उक्ताभावत्रयादन्यत्" इति ॥११॥

"प्रध्वंसं प्रागभावं वा" इति । घटध्वंसदशायां घटो नास्तीति

मानाभावाद्विरोधित्वे ध्वंसादेस्तत्र, तस्य च।
प्रागभावादिकालेऽपि वृत्तिमिच्छन्ति केचन ॥ १६ ॥
नास्ति गेहे स इत्यादौ गेहसंसर्गवर्जनम्।
तत्पुनः प्रागभावो वा प्रध्वंसस्त्वर्थ्य एव वा ॥ १७ ॥
घटे गेहस्य संसर्ग-प्रतिषेधेऽपि नेष्यते।
सुबर्थाभावबोधार्थम् अनुयोगिनि सप्तमी ॥ १८ ॥

बुद्धेर्ध्वंसो विषयः, एवं घटप्रागभावदशायां तादृशबुद्धेस्तत्प्रागभावो विषय इति बोध्यम् ॥ १५ ॥

"मानाभावात् विरोधित्वे" इति। 'तत्र' अत्यन्ताभावबुद्धौ, ध्वंसादेर्विरोधित्वे मानाभावात्, 'तस्य च' अत्यन्ताभावस्यापि, प्रागभावादिकालावच्छेदेन वृत्तिरित्यर्थः ॥ १६ ॥

ननु गृहे घटो नास्तीत्यादौ न घटात्यन्ताभावः, गृहे कदाचित् घटस्यापि सत्त्वात्, नापि ध्वंसः प्रागभावो वा, तयोः समवायिदेशवृत्तित्वनियमात्, तत् कोऽयमभाव इत्यत्राह, "नास्ति गेहे स इत्यादौ" इति। तथा च गृहे घटः नास्तीत्यादौ घटे गृहसंसर्गो निषिध्यते। स च संसर्गस्याभावः प्रागभावादित्रितयरूप एव सम्भवतीत्याह, "तत् पुनः" इत्यादि ॥ १७ ॥

नन्वेवं घटे गृहवृत्तित्वाभावबोधने घटपदात् सप्तम्यापत्तिः संसर्गाभावबोधस्थले अनुयोगिनि तस्यास्त्वत्वादित्यत्राह, "घटे गेहस्य संसर्ग—" इत्यादि। 'सुबर्थाभावबोधार्थं' 'सप्तमी' 'नेष्यते' इत्यन्वयः। तथा च प्रातिपदिकार्थस्याभावस्थल एवानुयोगिनि

अस्तित्वबोधो नञर्थे न सम्भवति यद्यपि ।
तथापि घट एवास्तु तद्विशिष्टे तदन्वयः ॥ १९ ॥
अस्तु व्युत्पत्ति-वैचित्र्यात् नञर्थस्यापि कुत्रचित् ।
धर्मितावच्छेदकत्वं बाधकं नास्ति किञ्चन ॥ २० ॥
अस्तित्वस्यैव वा तत्त्वं तदन्यत्रापि दृश्यते ।
"यो यः पचति शूद्रस्य द्विजोऽन्नं सोऽतिनिन्दितः" ॥२१॥

सप्तम्यपेक्षा, इह च 'गेहे' इति सप्तम्यर्थ-वृत्तित्वस्यैवाभाव इति नानुयोगिनि सप्तम्यपेक्षेति भावः ॥ १८ ॥

ननु अस्तित्वस्य कुत्रान्वयः, न तावन्नञर्थे, तथात्वे नञथा-भावस्यैक्यात् घटो न स्त इत्यादेरयोग्यत्वापत्तेरित्यत्राह, "अस्तित्व-बोधो नञर्थे" इत्यादि । 'तद्विशिष्टे' नञर्थविशिष्टे । 'तदन्वयः' अस्तित्वान्वयः । तथा च गेहवृत्तित्वाभाववान् घटोऽस्तीत्यन्वय इति भावः ॥ १९ ॥

ननु तादृशान्वयो न सम्भवति नञर्थस्य, आख्यातार्थस्य च वि-शेष्यतावच्छेदकतया भानस्याव्युत्पन्नत्वात्, अन्यथा न घटः पटस्तिष्ठति इत्यादेः पचति चैत्रो गच्छतीत्यादेश्च साधुत्वापत्तेः इत्यत्राह, "अस्तु व्युत्पत्तिवैचित्र्यात्" इति । 'कुत्रचित्' नञा सुबर्थाभावबोधनस्थले । तथा च प्रातिपदिकार्थाभावरूपनञर्थस्य धर्मितावच्छेदकतया भाना-भावेऽपि सुबर्थाभावरूपनञर्थस्य तथात्वमिष्यते इति भावः ॥२०॥

"अस्तित्वस्यैव वा तत्त्वम्" इति । 'तत्त्व' धर्मितावच्छेदकत्वम्, 'अस्तु' इति पूर्वस्मादनुषज्यते । तथा च अस्तितावान् घटो गेह-

केवलान्वयिता नास्ति संसर्गप्रतिषेधनात् ।
संसर्गिप्रतिषेधोऽपि सुतरां सिद्धिमेष्यति ॥ २२ ॥
केवलान्वयितायां वा संसर्गस्यास्तु तन्त्रता ॥ २३ ॥
वस्तुतोऽत्यन्तमेवास्ति तदभावोऽपि कुत्रचित् ।
केवलान्वयिता तस्मात् घटादीनां न विद्यते ॥ २४ ॥
समवायितया नैवं संयुक्तोऽप्यस्य सम्भवात् ॥ २५ ॥

वृत्तित्वाभाववान् इत्यन्वयबोध इति भावः । नन्वाख्यातार्थस्य विशेष्यतावच्छेदकतया भाव्यं नास्तीत्युक्तम् इत्यत्राह, "तदन्यत्रापि" इति । 'तत्' आख्यातार्थस्य धर्मितावच्छेदकतया भाव्यम् । कुत्र दृष्टम् ? इत्याकाङ्क्षायामाह, "यो यः" इति । अत्र हि वीप्सासमभिव्याहारात् शूद्रान्नपाककर्तृत्वाच्छेदेन निन्दितत्वान्वय इति निर्णीतमिति ध्येयम् ॥ २१ ॥

नन्वेवं सर्वत्र घटादिसंसर्गस्यात्यन्ताभावाभ्युपगमे, घटादीनां केवलान्वयित्वप्रसङ्गः अत्यन्ताभावाप्रतियोगित्वस्यैव केवलान्वयित्वात् इत्याशङ्क्याह, "केवलान्वयिता नास्ति" इत्यादि ॥ २२ ॥

"केवलान्वयितायां वा" इत्यादि । तथा च अत्यन्ताभावाप्रतियोगिसंसर्गप्रतियोगित्वं केवलान्वयित्वमिति भावः ॥ २३ ॥

"वस्तुतोऽत्यन्तमेवास्ति" इत्यादि । तथा च यत्र घटसंसर्गस्यात्यन्ताभावः तत्रैव घटस्याप्यत्यन्ताभाव इति न केवलान्वयित्वम् ।

यत्तु समवायितया गेहे घटात्यन्ताभाव एव तत्र प्रतीयते इति,

घटस्यैव निषेधोऽत्र घटकालस्तु नेष्यते ।
संसर्गघटकस्तत्र प्राहुरन्ये मनीषिणः ॥ २६ ॥
घटापसारणेनैव जन्यते, पुनरप्यसौ ।
घटानयनमात्रेण भूतलादौ विनश्यति ॥ २७ ॥
संसर्गाभाव एवायम् अत्युत्पत्तिविनाशवान् ।
तूर्यः सामयिकेत्युक्त इत्याहुः केऽपि कोविदाः ॥ २८ ॥
वैशिष्ट्याख्यस्वभावानां नात्र सम्बन्ध इष्यते ।
नानात्वे लाघवाभावाद् एकत्वेऽतिप्रसञ्जनात् ॥ २९ ॥

तन्न घटवत्यपि गेहे तादृशप्रतीत्यापत्तेः, न चैवम्, इत्येतदेवाह, "समवायितया नैवम्" इति ॥ २५ ॥

"घटस्यैव निषेधोऽत्र" इति। तथा च गृहे घटो नास्तीत्यत्र गृहे घटात्यन्ताभाव एव भासते इत्यर्थः। "घटकालस्तु" इत्यादि। 'तत्र' घटात्यन्ताभावे। तथा च तत्तत्कालीनतत्तद्भूतलत्वादिकमेवात्यन्ताभावस्य संसर्ग इत्यन्ताभावस्य नित्यत्वेऽपि घटकाले न घटात्यन्ताभावबुद्धिरिति भावः ॥ २६ ॥

यत्र तु भूतलादौ घटादिकं स्थितं, पश्चादपसारितं, पुनरप्यानीतं, तत्रोत्पत्तिविनाशशाली सामयिकनामा चतुर्थः संसर्गाभाव इति केषाञ्चिन्मतमाह, 'घटापसारणेनैव" इत्यादि ॥ २७ ॥

केचित् तु अभावस्य वैशिष्ट्याख्यमतिरिक्तं सम्बन्धमिच्छन्ति, तन्मतं निरस्यति, "वैशिष्ट्याख्यस्वभावानाम्" इति। "एकत्वेऽति-

अर्थान्तरमभावन्तु नेच्छन्त्यन्ये विपश्चितः।
कैवल्यं भूतलादीनां घटादेस्तद्वदन्ति च ॥ ३० ॥
कैवल्यं भूतलत्वादिरूपमन्यच्च दुर्वचम्।
निर्विवादं तदस्त्येव घटवत्यपि भूतले ॥ ३१ ॥
किञ्च गन्धाद्यभावस्य सलिलादेर्न विद्यते।

प्रसञ्जनात्" इति। तथा हि यदेव घटाभावस्य वैशिष्ट्यं तदेव घटाभावस्यापीति घटाभाववति सत्यपि घटे घटाभावबुद्धिप्रसङ्गः, घट एव तत्र प्रतिबन्धक इति चेन्न तथापि प्रतिबन्धकाभावः अपेक्षितः स च वैशिष्ट्यसम्बन्धेन विद्यत एव इति न निस्तार इति विभावनीयम् ॥ २९ ॥

केचित् तु अधिकरणात्मकत्वमभावानामाचक्षते तन्मतमाह, "अर्थान्तरमभावन्तु" इति। "कैवल्यम्" इत्यादि। 'तत्' इत्यभावपरामर्शः। तथा च भूतलादीनां कैवल्यमेव घटादेरभावस्वरूपमिति वदन्तीत्यर्थः ॥ ३० ॥

तदेतन्मतं दूषयति; "कैवल्यं भूतलत्वादि—" इति। "अन्यच्च दुर्वचम्" इति। अभावानभ्युपगमादन्यविधं कैवल्यं दुर्वचमित्यर्थः। "निर्विवादम्" इत्यादि। 'तत्' कैवल्यम्। तथा च घटवत्यपि भूतले घटाभावबुद्धिप्रसङ्ग इति भावः। न च घट एव प्रतिबन्धक इति वाच्यं, यतस्तावता घटाभाव एवापेक्षितः स च भूतलादीनां कैवल्यरूपः तच्च कैवल्यं तत्राप्यस्तीति ध्येयम् ॥ ३१ ॥

घ्राणादिग्राह्यतेत्यस्माद् अभावोऽप्यतिरिच्यते ॥ ३२ ॥
बहवः सन्ति विवादाः काणादानां यतोऽसतां शश्वत् ।
एषा रहस्यचिन्ता समुपास्या सूरिभिस्तस्मात् ॥ ३३ ॥

इति श्रीचन्द्रकान्ततर्कालङ्कार-प्रणीतायां तत्त्वावलौ रहस्यचिन्ता नाम अष्टादशः परिच्छेदः ।

समाप्तेयं तत्त्वावलिः ।

अभावानामधिकरणात्मकत्वे गन्धाद्यभावानां घ्राणादिप्रत्यक्ष-गोचरत्वं सर्वसिद्धं न स्यादित्याह, "किञ्च गन्धाद्यभावस्य" इत्यादि ॥ ३२ ॥

इति श्रीचन्द्रकान्त-तर्कालङ्कार-प्रणीतायां तत्त्वावलिटीकायां रहस्यचिन्ता नाम अष्टादशः परिच्छेदः ।

समाप्ता च तत्त्वावलिटीका ।

अतैव शिवम् ।